GOVERNMENT OF INDIA

DEPARTMENT OF ARCHAEOLOGY

CENTRAL ARCHAEOLOGICAL LIBRARY

CALL No. Sa 8K Jag-Sha

D.G A. 79.

22

Poona Oriental Series No. 50

ORIENTAL ARCHAEOLOGICAL LIBRARY New Delhi

पण्डितराजराजतिलकजगन्नाथप्रणीतः

॥ भामिनीविलासः ॥

पण्डितहरदत्तशर्मकृतया चषकाख्यया टीकया समेतः ।

BHĀMINĪVILĀSA

OF

PANDITARĀJA JAGANNĀTHA

Critically edited with his own commentary called 'Caṣaka' in Sanskrit and Translation and Notes in English

8431

BY

Vidyā-sudhākara HAR DUTT SHARMA, M.A., Ph.D.
SOMETIME PROFESSOR OF SANSKRIT
S. D. COLLEGE, CAWNPORE

C.R.K.
Jag. Sha.

POONA:
ORIENTAL BOOK AGENCY
1935

WORKS BY THE SAME AUTHOR

			Rs. As.
1.	Padmapurāṇa and Kālidāsa.	...	2—0
2.	Jayamangalā	...	2—0
3.	Saduktikarṇāmṛta.	...	10—0
4	Sāṅkhyakārikā—Gauḍapādabhāṣya.	...	2—0
5.	Sāṅkhyakārikā—Tattva-Kaumudī	...	3—0
6	Kāvyaprakāśa	...	3—0
7	Bhāminīvilāsa	...	2—0

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 8431
Date 7-3-57
Call No. 891.2 Jag/Sha

Printed by : S. R. Sardesai B.A., LL.B., at the Samarth Vidyalaya's 'Samarth Bharat Press', 947 Sadashiv Peth, Poona 2.

Published by Dr. N. G. Sardesai, for the Oriental Book Agency, Poona 2.

CONTENTS

OF

भामिनीविलासः

		Pages
Introduction		iii–xv
List of Abbreviations		xvi
प्रास्ताविकविलासः	Text	1–59
,,	Translation	1–16
,,	Notes	1–28
शृङ्गारविलासः	Text	1–58
करुणविलासः	,,	1–11
शृङ्गारविलासः	Translation	1–16
करुणविलासः	,,	1– 4
शृङ्गारविलासः	Notes	1–13
करुणविलासः	,,	14–16
शान्तविलासः	Text	1–21
,,	Translation	1 –6
,,	Notes	1–10
श्लोकानां सूची		1– 4
Appendix		5–16

All rights reserved by the Publishers

Published by—Dr N G Sardesai, L.M & S., Manager, Oriental Book Agency, 15 Shukrawar Peth, Poona 2

Printer—S. R Sardesai, B.A., LL.B, Navin Samarth Vidyalaya's Samarth Bharat Press, 947 Sadashiv, Poona 2

INTRODUCTION

The Text

The text of the *Bhāmatīvilāsa* is printed here on the basis of the following printed editions:—

1. L. R. Vaidya's edition, Bombay, 1887.
2. S. M. Paranjape's edition, Poona, 1895.
3. Śeṣādrī edition, Bombay (no date given).
4. Bal's edition with Mahādeva Sūri's Gloss, Bombay, 1895.
5. Nirṇayasāgara edition with Acyutarāya's commentary, Bombay, 1933.
6. Nirṇayasāgara edition of Rasagangādhara, Bombay, 1916.

Before fixing any reading, I have taken into consideration the readings of these editions as well as those which are given in their foot-notes. In the Notes appended at the end of the book the various readings and their propriety or otherwise have been fully discussed.

Traditions about the Author

In spite of the fact that the author Jagannātha Panditarāja flourished as late as about the 17th century A.D., we have no historical account or authentic tradition on which we can base his life. A considerable mass of traditions has sprung round him and it is well nigh impossible in the present state of our knowledge to differentiate fact from fiction. Some of these traditions are given below.

1. Jagannātha came from Tailanga country and

started a school at Jaipur.[1] Once upon a time a Kazi came to Jaipur and challenged the pandits of the place to a debate. None could meet his challenge, but Jagannātha studied the muslim religious books and defeated the Kazi on his own ground. The Emperor of Delhi hearing of our poet's fame invited him to Delhi and granted him his patronage. The poet there fell in love with a muslim girl[2] whom he married and spent his youth at the Moghul capital. In his old age he went to Benares but he was excommunicated by pandits like Appayadīkṣita on the ground that he was contaminated by the contact of a muslim woman. Being very much distressed at it Jagannātha went to the Ganges and seated on the Ghāt stairs began to sing the praise of Gangā in extempore verses. These verses are known by the name of Gaṅgālaharī. The mother Gangā was very much pleased by his devotion and began to rise

1. Pandit Durgāprasāda says that the Jaipur-Jagannātha, who was a Mahārāṣṭra brāhmaṇa, is different from our author. The descendants of Jaipur-Jagannātha are still found in Brahmapurī near Jaipur. He composed the following works in 1731 A.D. at the instance of the Rajput King of Jaipur—सिद्धान्तसम्राट्, सिद्धान्तकौस्तुभ, and रेखागणित (a translation of Euclid). The Maharaja of Jaipur, named Savāi Jaisiṁha, was born in 1688 A.D. and ascended the throne in 1700. He performed an *aśvamedha* sacrifice in 1714 and died in 1728 A.D.

2. Jagannātha is alleged to have composed the following verses about the muslim girl—

यवनीरमणी विपद्‌ शमनी कमनीयतमा नवनीतसमा ।
जहिकङ्किबचोऽमृतपूर्णमुखी स सुखी जगतीह यदङ्कगता ॥
यवनी नवनीतकोमलाङ्गी शयनीये यदि नीयते कथंचित् ।
नवनीतमेव साधु मन्ये न वनी माधवनी विनोदहेतुः ॥
न याचे गजालिं न वा वाजिराजिं न वित्तेषु चित्तं मदीयं कदाचित् ।
इयं सुस्तनी मस्तकन्यस्तहस्ता लवङ्गी कुरङ्गीदृगङ्गीकरोतु ॥

one step at the end of each verse After the 52nd verse the river took the poet and his muslim wife in her lap and carried away both of them in her current.

2. When Jagannātha lived under the patronage of Akbar, Emperor of Delhi, he married a muslim girl named Lavangī. After some time the wife died[3] and Jagannātha in his sorrow for her, went to live at Benares. But he was insulted by the pandits of Benares At this the poet went to the river Ganges and after having praised Gaṅgā by means of his Gangālaharī leaped into its rain swollen current

3 When Jagannātha was enjoying the favours of the royal court at Delhi he received an invitation from some ruling Prince. To the invitation he sent the following reply:[4]

"Either the Lord of Delhi or the Lord of the Universe can fulfil (my) desires. Favours granted by other kings can only suffice for vegetables or salt."

4 Jagannātha had performed austerities to please a Goddess who granted him the following boons:[5]

"Roam till the land of Kurus (in the North) and do not doubt your success in debates with your oppo-

---

3 करुणाविलास of our book is said to have been inspired by this sad event On this Pandit Durgāprasāda pertinently remarks that we should infer from the following verse that the poet lost his son also—

अपहाय सकलबान्धवचिन्तामुद्वास्य गुरुकुलप्रणयम् ।
हा तनय विनयशालिन् कथमिव परलोकपथिकोऽभूः ॥

Rasagangādhara, p 33

4 दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः ।
अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात् ॥

5. आकुरुदेश विचरेर्मा कुरु परवादनिर्जये शङ्काम् ।
स्वीकुरु वरमेकं मे व्याकुरु भो वत्स शास्त्राणि ॥

nenta, but, my child, accept one boon from me and explain the S'āstras "

5. Haridīksita, the teacher of the celebrated Nāgeśabhatta, went to Delhi and challenged Jagannātha. The poet feared him and his superior scholarship. He tied a charm round his arm and next day defeated the opponent Haridīksita. The great grammarian was very much vexed and disappointed and on returning home he resolved either to destroy himself or vanquish Jagannātha. Through the help of some divinity he defeated Jagannātha next day.

6. Jagannātha became a renowned pandit through the favour of the mother Gangā. Then he went to Delhi and described his poverty-ridden condition in the following verse before the Emperor.

शीतार्ता इव सङ्कुचन्ति दिवसा नैवाम्बरे शर्वरी
शीघ्रं मुञ्चति किं च हुतभुक्कोणं गतो भास्करः ।
एवं चानलहुताशभाजि हृदये सीमन्तिनीनां गतो
नास्माकं नयनं न वा युवतयः कुत्र व्रजामो वयम् ॥

He received the royal patronage and had relations with a muslim girl. He never married her. From the above verse, it is evident that when he came to Delhi he was unmarried.[6]

Of all the incidents mentioned above the only things about which we can be absolutely sure, are that our poet had a patron in some Moghul Emperor and that he had some relationship with a muslim girl.

His parentage and date.

Jagannātha was a Tailanga brahmin from South India. He was born in Vegināda family and his father's

6. According to Acyutarāya, the verse शीतार्ता., etc., indicates that the poet had no wife when he came to the Court of the Emperor of Delhi.

name was Perubhatta The father of our poet studied Vedānta under Jñānendrabhiksu, Nyāya and Vaiśeṣika under Mahendra, Pūrva-Mīmāṁsā under Khaṇḍadeva and the Mahābhāṣya under Vīreśvara Śeṣa Jagannātha's mother's name was Lakṣmī He studied mostly under his own father. In his youth he visited the court of Emperor Shah Jehan and obtained from him the title of Panditarāja [7] He enjoyed the patronage of the Emperor and that of his son Dara Shikoh

It is a mistake to think that our poet lived in the reign of Akbar In one of his verses[8] Jagannātha praises

---

7. " तैलंगान्वयमंगलालयमहालक्ष्मीदयालालितः ।
श्रीमत्पेरुभट्टसूनुरनिशं विद्वल्ललाटंतपः ॥
संतुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनं ।
श्रीमत्पंडितराजपंडितजगन्नाथो व्यधासीदिदम् ॥ " प्राणाभरण 52.

" मूर्तिमतेव भगवाराफलानरूप प्रसादेन द्विजकुलसेवाहेवाकिवाङ्मनःकायेन माथुरकुलसमुद्रेंदुना रागमुकुंदेनादिष्टेन सार्वभौमश्रीशाहजहाप्रसादाधिगतपंडितराज-पदवीविराजितेन तैलंगकुलावतंसेन पंडितजगन्नाथेनासफविलासाख्येयमाख्यायिका निर्मीयत ॥ " *Āsafavilāsa Introduction*

" श्रीमज्ज्ञानेंद्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपंचः ।
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ॥
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं ।
शेषाद्वप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः ॥ "
" पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥ "

रसगंगाधर, *Introduction*, p. 2

8. " श्याम यज्ञोपवीतं तव किमिति मया संगमात्कुत्र जातं
सोऽयं शीताशुकन्याप्रियसि कथमभूत्तज्जलं कज्जलाभम् ।
त्वाकुप्यन्नूरदीनक्षितिरमणरिपुक्षोणिभृत्पक्ष्मलाक्षी-
लक्षाक्षीणाश्रुधारासमुदितसरितां सर्वतः संगमेन ॥ " रसगंगाधर, p. 52 ।

Nūradīn which name Mr Vaidya identifies with Nuruddin Muhammad Jehangir. On this Mr. Vaidya conjectures that Jagannātha lived in the reign of Jehangir also. But I am inclined to think that our poet here praises the father of his patron Shah Jehan. It seems rather unlikely that Jagannātha should have lived so long a life as to enjoy the patronage of three generations.

Now, with regard to the incident that Haridīkṣita, teacher of Nāgeśabhaṭṭa, had challenged Jagannātha, it has been suggested by Mr. Vaidya, on the testimony of Dr. Kielhorn (who thinks that Haridīkṣita must have lived in about 1750 A.C.), that Haridīkṣita and Jagannātha could not have been contemporaries. But, as pointed out by the late Pandit Durgāprasāda (Rasagangādhara, introduction p. 6), the approximate date of Nāgeśabhaṭṭa is 1706 A.D. The following table given by P. Durgāprasāda makes the position still clearer:



Thus, it is just possible that Jagannātha and Haridīkṣita were contemporaries. Again, from the benedictory stanza of Nāgeśa in the beginning of his gloss on Rasagangādhara नत्वा गंगाधरं ममप्रकाशं तनुते गुरुम् we learn that Gangādhara was one of the teachers of Nāgeśa. In a Ms. of the Subhāsitahārāvalī, an anthology of Sanskrit poets by Hari Kavi we come across two verses

of Jagannātha in which Gangādhara is mentioned. They are—

वितण्डाहेरवाद्यैरतिचिततवाक्यैरपि नृभि, र्न ज्ञेयोऽसौ विद्वज्जनसदसि गंगाधरबुधः। पुरारिप्रोच (च्च) ब्रजटिलो(?) कूनितशिर, स्तटिन्यम्भःपूरोपमचलनवाचालि [त] मुखः ॥ fol. 33a, 122

उरस्यस्य भ्रश्यत्कबरभरनिर्यत्सुमनसः, पतन्ति स्वर्बालाः स्मरपरवशा दीनमनसः। सुरास्त गायन्ति स्फुरिततनु गंगाधरमुखा,–स्तवाग्र दृष्टातो मदुपरि कृपातो विलसति ॥ fol. 67 a, 599

(The last verse is from Jagannātha's Lakṣmīlaharī, 3.)

I am inclined to identify this Gangādhara with Gangādhara the teacher of Nāgeśa. Now, if one teacher of Nāgeśa can become Jagannātha's contemporary then there is strong reason to suppose that the other was also one.

Jagannātha, therefore, lived in the middle of the 17th and the beginning of the 18th century A.D.

His works

1. *Piyūṣalaharī* or *Gangālaharī*, the well-known poem in praise of Gangā. It is very popular and has been printed many times at different places.

2. *Sudhālaharī*, a short poem of 30 verses in praise of the god Sun, printed in K. M. I, pp. 16–22.

3. *Amṛtalaharī*, a short poem of 11 verses in praise of the goddess Yamunā, printed in K. M. 1, pp. 99–101.

4. *Karuṇālaharī*, a poem of 60 verses in praise of god Viṣṇu, printed in K. M. 11, pp. 55–61.

5. *Lakṣmīlaharī*, a poem of 41 verses in praise of goddess Lakṣmī, printed in K. M. 11, pp. 104–111.

6. *Yamunā-varṇana*, a prose work which is not yet found. We find only two quotations from it in Rasagangādhara.

" तनयमैनाकमावेष्टलीकृतजलधिजठरप्रविष्टहिमगिरिमुद्यमानया भगवत्या भागीरथ्या सखी ॥ " P. 19.

"रविकुलप्रीतिमावहन्ती भरविकुलप्रीतिमावहति। अवारितप्रवाह-मुवारितप्रवाहा॥" P. 128

7. *Āsafa-vilāsa*, in praise of Nawab Asaf Khan, probably identical with Khan Khanan of Shah Jehan. Only two quotations from this work are found in Rasagangādhara pp 166 and 457

8 *Prāṇābharana*, a poem in 53 verses with the author's own gloss in praise of Prāṇanārāyana, king of Kāmarūpa, published in K M I, pp 79-90

9. *Jagadābharana*, P. Durgāprasāda, in his introduction to Rasagangādhara, says that it is a panegyric on Dara Shikoh and that this poem is identical with Prāṇābharaṇa, with the name of Dara inserted in place of Prāṇanārāyaṇa According to the late Mr S M Paranjape, who examined a Ms of this poem, the poem in this form must have been intended for the Rajput prince Jagatsiṁha, son of Rāṇā Karnasiṁha of Udaipur. Rāṇā Karnasiṁha died in 1628 A D. This conclusion of Mr. Paranjape is based upon the following last verse and the colophon found in the Ms.

तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालित
श्रीमत्वेरमभट्टसूनुरनिशं विद्वल्ललाटंतप।
श्रीराणाकलिकर्णनन्दनजगत्सिंहप्रमोर्वर्णन
श्रीमत्पंडितराजसत्कविजगन्नाथो व्यतानीदिदम्॥

इति महामहोपाध्यायपदवाक्यप्रमाणपारावारीणतैलङ्गकुलावतंसश्रीवेरम-भट्टसूरेस्तनयेन विनिर्मितं जगदाभरणाख्यं जगत्सिंहवर्णनम्॥

Mr Paranjape adds—"But as the line, दुग्धाब्धे भवता, etc., is found in the R G as दुग्धाब्धे भवता समो विजयते दिल्लीश्वरावल्लभः, it is likely that the copy seen by Pandit Durgāprasāda might have got some expression pointing out to Dara. Still it should be remembered that the name Jagadābharana suits well with the description of Jagatsimha only"

10 *Citramīmāmsā-khaṇḍana*, a collection of those faults which Jagannātha found with Appaya Dīkṣita's views as described in Citramīmāṁsā and which are scattered in Rasagangādhara The book is published in the K. M. Series.

11 *Manoramā-kucamardana*, a work on grammar devoted to a criticism of Manoramā, Bhattojidīksita's commentary on his own Siddhānta-Kaumudī The work is still in a Ms. form.

12 *Rasagangādhara*, an incomplete work on rhetorics which suddenly breaks down in the midst of Uttara *alamkāra*. It is the masterpiece of Jagannātha in which he shows his mastery of logic, subtle thinking, perspicuity of style and a wonderful grasp and insight in the *alamkāra-s'āstra*. It is a pity that the author left it incomplete, otherwise it would have entirely eclipsed even Mammata's Kāvvaprakāśa. Although there are many guesses as to why it was left incomplete, but most probably it is due to author's unexpected death The work is published in the K. M. Series with Nāgeśabhatta's commentary.

13 *Bhāminīvilāsa*, a beautiful *kāvya* in four chapters—*Prāsādikavilāsa*, *S'rngāravilāsa*, *Karunavilāsa* and *S'āntavilāsa*. According to Nāgeśabhaṭṭa the poem was written before the author composed his Rasagangādhara and it served as a store-house from which he drew his illustrations In Rasagangādhara we read—

निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र निहितं न परस्य किंचित्।

On this Nāgeśa says—

तत्तदलंकारादिलक्ष्यत्वेनोक्तं काव्यं भामिनीविलासाख्यम्

But it is better to understand the word *kāvya* in the sense of poems in general

There is a very great discrepancy with regard to the number of verses in this work. Messers Seshadri and Vaidya give 129 verses in the first, 183 in the second, 19 in the third and 45 in the fourth *vilāsas*. The total number of verses in their editions comes to 376. But the texts of Messers Paranjape, Bal and Acyutarāya Modak (as published in the Nirnayasāgara edition) give 101 in the first, 102 in the second, 19 in the third and 32 in the fourth *vilāsas*. I follow their arrangement in this edition. The total number of verses here comes to 254. The extra verses are given in the appendix. For the detailed discussion over this point I would refer the readers to the excellent introduction given by Mr. Paranjape. Thus, we get an excess of about 121 verses. Out of these about 100 are not found in the Rasagangādhara. Although these verses are nowhere found in the name of another man, yet I very much doubt that they are from Jagannātha's pen.

Now let us examine the following verses from Bhāminīvilāsa and compare them with the verses found in the *Bhāminīvilāsa* and *Anyaktimuktāvalī*.

Bhāminī Vilāsa	*Anyokti Muktāvalī*
पुरा सरसि मानसे विकचसारसा- लिस्खलत्-	आस्ते रोहरकनककमले केलिपात्रे मृदान्गा।
परागसुरभीकृते पयसि यस्य यातं वयः।	खेलद्देलोन्मादमधुकरीमानसे मानसे यः।
स पल्वलजलेऽधुना मिलदने- कभेकाकुले	भेकोद्रेकप्रणयिनि वलद्वाल जम्बालजाले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ २ ॥	स स्यादुत्कः परिमितजले पल्वले किं मराल ॥ १२ ॥
वैरस्यं गुणगणवानपि सतां द्विजिह्वै- रेन्यतां नीतः।	कान्तिलोचनवर्तिरद्भुतमयी मूर्तिर्महासौरभं

Bhāmini Vilāsa

तानपि वहसि पटीरज किं कथया-
मस्त्वदीयमौजत्यम् ॥ १९ ॥

अपनीतपरिमलान्तरकथे पद न्यस्य
देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वांछसि चेद्
भ्रमर धन्योऽसि ॥ २० ॥

गुणीगणेषु गुरुगर्वनिमीलिताक्ष
किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।
सीमामिमां कलय भिन्नकरीन्द्रकुम्भ-
मुक्ताभवां हरिविहारवसुंधराया ॥२७॥

Bhāmini Vilāsa

दिगन्ते श्रूयन्ते मदमलिनगण्डा करटिन
करिण्यः कारुण्यास्पदमसनशीला खलु मृगा ।
इदानीं लोकेऽस्मिन्नुपमशिखिनां

Anyokti Muktāvalī

निष्यन्दोऽय सुधाकरादपि
सुधास्यंदादपि ह्लादक ।
सर्वोऽयं विरलो जगत्यपि
गुणग्रामोऽभिरामो हहा
पद्मोल्लसभुजगसंगमसुख श्रीखड ते
खंडित ॥ ७२ ॥

येनास कमलाविलासकलके
किंजल्कपानोत्सवो
यो लीला वितनोति नाभिनलिनोत्सवो
तथा शार्ङ्गिण ।
तस्य स्वाकुसुमान्तरे मधुलिह-
कुत्राप्यहो न स्थिति-
र्न प्रीतिर्न रतिर्न केलिसमयो नो
विस्मयो व साव ॥ २६ ॥

अद्रिद्रोण्यां निवस दिवस
जातलीलानुषंगै-
रंगैर्मा स्म स्मयतरलितैरंग सारंग
रंग ।
दर्पद्वार द्विरदकदनोद्यमपाणिर्यदीशे
प्रत्यासन्नो वनविहरणक्रीडया
कुञ्जरारि ॥ १२ ॥

Bhāvavilāsa

येन शैशवपदे मदेभराड्-
गण्डसीमनखरैर्विखंडितम् ।
यौवनोत्सवमवाप्य केसरी
केषु दर्शयतु सोऽद्य
पौरुषम् ॥ १०४ ॥

Bhāmini Vilāsa	*Bhāvavilāsa*
पुनरयं नखानां पाटित्यं प्रकटयतु कस्मिन् मृगपतिः ॥ १ ॥	
येनामद्भमरेंदे दलदरविंदे दिनान्यनायिषत । कुटजे खलु तेनेहा तेने हा मधुकरेण कथम् ॥ ९ ॥	नीरजान्यपि निषेव्य निर्भर नीरसानि कुटजानि वांछसि । चंचलत्वमिह मंजरीक ते साहजं कथमिव विमोक्ष्यसि ॥४१॥
नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च संगतिः । तथापि हरते तापं लोकानामुन्नतो घनः ॥ ३७ ॥	कस्माद्दिन्दुरसौ धिनोति जगतीं पीयूषवर्षैः करैः कस्माद्वा जलधारयैव धरणिं धाराधरः सिंचति । भासं भासमयं च नन्दयति वा कस्मात् त्रिलोकीं रविः साधूनां हि परोपकारकरणे नोपाध्यपेक्षं मनः ॥ २६ ॥

This comparison will clearly show that not only the ideas but even the phraseology is common between Bhāminīvilāsa, Bhāvavilāsa and Anyoktimuktālatā. The author of Anyoktimuktālatā is Śambhu Mahākavi who flourished in the reign of king Harṣa of Kashmir (1088-1100 A.D.). Now, this similarity goes against the contention of Jagannātha, viz., निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र विहितं न परस्य किंचित्, unless we understand that Jagannātha has not borrowed any complete verse of any author, although he may have done the शब्दापहार or अर्थापहार. As regards Bhāvavilāsa, its author Rudra Nyāya Vācaspati flourished in the reign of king Bhāvasimha of Jaipur, who was a contemporary of Akbar. Those who believe

Jagannātha to be a contemporary of Akbar might well accuse Rudra Kavi as having borrowed from Jagannātha. Hence, in spite of our author's care and anxiety expressed in दुर्ज्ञेया जारजन्मानो हरिष्यन्तीति शकया। मदीयपद्यरत्नानां मञ्जूषैषा कृता मया॥ the essence, if not the actual verses, was stolen from Bhāminīvilāsa. Again, if the verses यवनी नवनीतकोमलांगी, etc., quoted in the footnote 2 above, are supposed to have been those of Jagannātha then they ought to have been incorporated in the Bhāminīvilāsa. When Panditarāja made this Bhāminīvilāsa as a sort of box to protect his verse-jewels, then he ought to have placed them here. Why he forgot to do so can be explained only when we suppose that they are not written by him. But if our Panditarāja is put in Shah Jehan's reign (as there is every evidence to show), then he himself cannot be free from the guilt of काव्यापहार.

As a poet Jagannātha stands second to Kālidāsa only. His pride about his learning is not without justification. His style is full of perspicuity (*prasāda*) and he has wonderfully succeeded in combining the *rasas* and *alamkāras* without in any way undermining the former. It is easy to depict a *rasa* or *rasas* in a long poem, but to do it, and that also successfully, in *muktakas* (single verses) is an art of highest excellence. His Bhāminīvilāsa was written perhaps in honour of his wife Bhāminī, although there are many scholars who dispute this view.

I have derived much help from the edition of the late Mr. S. M. Paranjape in preparing the Notes. I also owe a deep debt of gratitude to Dr. N. G. Sardesai for help rendered to me in various ways.

HAR DUTT SHARMA.

LIST OF ABBREVIATIONS

नि०—Nirṇayasāgara edition of Bhāminīvilāsa with Acyutarāya Modak's Commentary

र०—Nirṇayasāgara edition of Rasagaṅgādhara

शे०—Bhāminīvilāsa, edited with Sanskrit Commentary by Śeṣādri Śarmā, son of Subrahmanya Indian Printing Press, Bombay

वै०—L R Vaidya's edition of Bhāminīvilāsa Bombay 1887

बा०—Bhāminīvilāsa, with the Sanskrit Commentary of Mahādeva Sūri Dīkṣita Paṇḍitarāja, edited by B G. Bal, Bombay, 1895

प०—Bhāminīvilasa, edited by S M. Paranjape, Poona, 1895

R G.=Rasagangādhara

U R =Uttararāmacarita

P. R =Prasannarāghava

Bh =Bhartṛhariśatakas

Pt =Pañcatantra

Kuv.=Kuvalayānanda.

S =Śakuntalā

Sk =Siddhāntakaumudī

Ku =Kumarasambhava

Chan =Chānakyaśataka

॥ श्री ॥

पण्डितराजराजतिलकजगन्नाथप्रणीत

॥ भामिनीविलासः ॥

प्रास्ताविक-अन्योक्ति-विलासः ।

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीला खलु मृगाः[1] ।
इदानीं लोकेऽस्मिन्नुपमशिखानां पुनरयं
नखानां पाण्डित्यं[2] प्रकटयतु[3] कस्मिन्मृगपतिः ॥ १ ॥

[1] प०—A. वनमृगाः । २ बा०—पाटिन्यं । [3] प०—H. बा०—प्रकटयति ।

संसाराब्धिगभीरवारितरणं वाञ्छन्ति ये मानवा
जानन्तो भयदानपीह विषयांस्त्यक्तुं न दैन्यात्क्षमाः ॥
भक्तानां भवतु स्वमूढमनसां तेषामनुक्रोशवान्
कल्याणं तनुतामुमार्धतनुभान्देव सदा शङ्करः ॥
भृगुकुलसूर्यात्ताताच्छङ्करदत्तेति नामभाजोऽहम् ।
सम्प्राप्तसकलविद्यो व्याख्या वितनोमि हरदत्तः ॥
वाणी पण्डितराजस्य मधुरा मधुनोऽपि या ।
तस्याः पानाय लघुधीर्व्याख्यानं चषकं मम ॥
दण्डान्वयः पाठभेदाः शब्दाः पर्यायवाजिनः ।
अलङ्काराश्च भावार्थो व्याख्यानेऽस्मिन्निबोधत ॥

इह खलु पण्डितराजो जगन्नाथो दत्तपरकृतोदाहरणेभ्यो मम्मटादिभ्यः साहित्यकारेभ्यः स्ववैलक्षण्यं प्रतिपिपादयिषुः स्वनिर्मिते रसगङ्गाधर आत्मविरचितान्येव पद्यान्युदाजहार। किन्तु तदानीन्तनेषु पण्डितमन्येषु काव्यचौरणप्रथां परां कोटिमारूढां पश्यन् स्वकाव्यापहारभिया जगन्नाथो ग्रन्थमिमम-प्रकाशयत्। उक्तं चानेनैव ग्रन्थस्यान्ते—

दुर्वृत्ता वारजन्मानो हरिष्यन्तीति शङ्कया ।
मदीयपद्यरत्नानां मञ्जूषैषा कृता मया ॥

यद्यपि सत्यप्येतादृशे प्रयत्ने तत्काव्यापहारोऽन्यकृतकाव्यनिवेशश्चास्मिन्नेव ग्रन्थे समजनि तत्सर्वमस्माभिर्भूमिकायां प्रतिपादितत्वान्नात्र पुनराख्यायते ।

दिगन्त इति ॥ मदमलिनगण्डाः । मदेन मलिनाः गण्डाः कपोला येषां ते । करटिनः गजाः । करटो गजकपोलः । दिगन्ते । दिशां अन्ते अतिदूरे इत्यर्थः । न तु प्राच्यादिदिक्प्रान्ते । श्रूयन्ते । न तु दृश्यन्ते इत्यर्थः । तेषां सिंहभयात्पलायितत्वात् । करिण्यः हस्तिन्यः । स्त्रीत्वात् कारुण्यास्पदम् करुणास्थानम् । दयायोग्या इत्यर्थः । मृगाः असमशीलाः । असमं अतुल्यं शीलं स्वभावो येषां ते । नहि ते सिंहवत् पराक्रमस्वभावाः किन्तु भीरवः अतः तुच्छा एव । इदानीं एव गते । अयं मृगपतिः सिंहः । अस्मिन् लोके । अनुपमाशीखानाम् । अनुपमाः असाधारणाः शिखाः अग्रभागाः येषां तेषाम् । अत्यन्ततीक्ष्णाग्रभागानां इत्यर्थः । नखानाम् । पाण्डित्यं विदारणादिचातुर्यम् । पुनः । कस्मिन् प्रकटयतु । ये खलु मदोन्मत्ताः अत एव च योद्धुं योग्याः हस्तिनः ते भयात् पलाय्य दूरं गताः न ते प्रत्यक्षं दृश्यन्ते । करिणीनां च स्त्रीत्वात् न तासु सिंहस्य विक्रमः शोभते अपि तु अनुकम्पैव । मृगाश्च अत्यर्थं भीरुत्वात् तुच्छा एव । एवं गते सति सिंहोऽयं कुत्र स्वविक्रमं दर्शयेदिति मुख्योक्तिः । अन्योक्तिस्तु—ये खलु पाण्डित्याभिमानिनः ते तु नाम शुरवैव मदीयं दूरं पलायिताः । स्त्रीकवीषु च दर्पः शोभते न तासां सह शास्त्रार्थः अन्ये च अल्पश्रुताः अतुल्यबलत्वात् उपेक्षितुमेव योग्याः । ईदृश्यामवस्थायां न कोऽपि पुरतः स्थातुं योग्यो विद्वान् उपलभ्यते येन सह शास्त्रविवादः क्रियेत । सर्व एव पराजिताः इत्यर्थः । अत्र अप्रस्तुतप्रशंसा अलङ्कारः । तस्य लक्षणं काव्यप्रकाशे — "अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया" इति । अत्र अप्रस्तुतेन मृगपतिना स्वसदृशः प्रस्तुतः पण्डितः कश्चित् गम्यते । पद्येऽस्मिन् शिखरिणीवृत्तम् । "रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति लक्षणम् । एवमेतत्समग्रग्रन्थे अप्रस्तुतप्रशंसायामुदाहृतम् (पृ० ४०२) ॥ १ ॥

पुरा सरसि मानसे विकचसारसा[1]लिस्खल-
त्परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलजलेऽधुना मिलदनेकमेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ २ ॥

वा०—'शालि' इति टीकायाम् ।

पुरेति ॥ पुरा पूर्वं । मानसे तन्नामके सरसि सरोवरे । विकचसारसालिस्खलत्परागसुरभीकृते विकचानि प्रफुल्लानि सारसानि सरसि भवानि कमलानि । तेषां आलिः पङ्क्तिः । तस्याः सकाशात् स्खलन् अधःपतन् । परागः पुष्परेणुः । तेन सुरभीकृते वासिते । पयसि जले । यस्य राजहंसस्य । वयः आयुः । यातं व्यतीतम् । सः । मरालकुलनायकः मरालानां हंसानाम् । कुलं समूहः । तस्य नायकः स्वामी राजहंसः । मिलदनेकमेकाकुले मिलन्तः एकीभवन्तः । भेकाः मण्डूकाः । तैः आकुले व्याप्ते । पल्वलजले पल्वलं अल्पसरः तस्य जले । अधुना कथं केन प्रकारेण । वर्तताम् वासं करोतु । इति रे कथय । येन राजहंसेन कमलानां रजसा सुगन्धिते मानससरोवरस्य जले स्वकीयं पूर्वं वयः गमितं सोऽधुना मण्डूकैः परिपूर्णे अल्पजले लघुसरसि कथं जीवनं निर्वाहयतु—इति सुस्योक्तिः । अन्योक्तिस्तु—येन खलु केनचित् महाभागेन कस्मिंश्चित् रमणीये प्रदेशे पूर्वं दिवसाः सुखेन नीताः, स यदि अधुना नीचप्रदेशे वाचालानां च सङ्गतौ पतितः तर्हि शेषान् दिवसान् महता कष्टेनातिवाहयिष्यति । अत्रापि अप्रस्तुतप्रशंसा अलङ्कारः लक्षणमुक्तं प्राक् । अत्र अप्रस्तुतेन राजहंसेन पूर्वमनुभूतसुखः किन्त्वधुना व्यसनपतितः कश्चित् महापुरुषः गम्यते । पृथ्वी च वृत्तम् । लक्षणं तु—" जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः " । एतदपि पत्रं स्वगङ्गाधरे पठ्यते (पृ ४०३) ॥ २ ॥

तृष्णालोलविलोचने कलयति प्राचीं चकारीगणे[2]
मौनं मुञ्चति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किं नु[3] विधौ विधातुमुचितो धाराधराडम्बरः ॥३॥

[1] र०—चकोरव्रजे । २ र०—नु ।

तृष्णेति ॥ धातरन्दे नवान् । तृष्णालोलविलोचने तृष्णया चन्द्रिकायाः पिपासया । लोले चञ्चले उत्सुके इत्यर्थः । विलोचने नयने । यस्य तस्मिन् चकोरिगणे चकोरीणां समूहे । स्त्रीत्वात् अतिकरुणार्हे इत्यर्थः । प्राचीं पूर्वां दिशम् । कलयति स्वीकुर्वति पश्यति सति । किं च कैरवकुले कैरवाणाम् । यानि चन्द्रो विकासयति एतादृशानां श्वेतकुमुदानां समूहे । मौनं मुकुलितत्वं । मुञ्चति सति । विकसति सति इत्यर्थः । कामे धनुर्धुन्वति टङ्कारेण कम्पयति सति । अथ च । मानवतीजनस्य मानः अपराधे प्रियं प्रति रोषः । स अस्या अस्तीति मानवती । तासां समूहस्य । माने क्रोधे । सपदि तत्क्षणं । प्रस्थातुकामे गन्तुकामे सति । अधुना एतादृशे व्यतिकरे । विधो चन्द्रे । धाराधराडम्बरः धाराधराणाम् मेघानां । आडम्बरः विस्तारः विधातुं कर्तुम् । उचितः योग्यः । किं नु । हे धातः सति चन्द्रोदये चकोर्यः हर्षिताः, कुमुदानि विकसितानि, कामः उद्दीपितः, तथा मानिनीनां मानः विगलितः भविष्यति । प्रतीक्षमाणेष्वेतेषु त आसन्नं चन्द्रोदयं यत् त्वं मेघानां विस्तारेण वारितवानसि न तत् त्वया शोभनं कृतं—इति मुख्योक्तिः । अन्योक्तिस्तु—सर्वेषां आनन्ददायकः नव चाभ्युदयं गच्छन् यदि कश्चित् राजकुमारः केनापि दुष्टेन, भगवता कृतान्तेन वा परिभूयते न तत् शोभनम् । तत्र विधे दोषः—इति । श्लोकोऽयं रसगङ्गाधरे असूयाख्यस्य भावस्योदाहरणे पठ्यते (पृ० ९५–९६) । अत्र हि कविना उच्छृङ्खलं विधातारं प्रति असूया प्रकाशिता । अप्रस्तुतप्रशंसा चालङ्कारः । अत्र अप्रस्तुतेन चन्द्रवृत्तान्तेन प्रस्तुतं राजकुमारादिवृत्तान्तं गम्यते । शार्दूलविक्रीडितं वृत्तम्—"सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणम् ॥ ३ ॥

अयि दलदरविन्द स्यन्दमानं[1] मरन्दं
तव किमपि[2] लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्[3]
परिमलमयमन्यो बान्धवो गन्धवाहः ॥४॥

१. वा०—नि०—' स्यन्दमानं । २ प०—H कमपि । ३ प०—A विरान्वन्

अयीति ॥ अयि । दलदरविन्द दलत् विकासं प्राप्नुवत् अरविंद कमलमा तत्सम्बुद्धिः । तव । स्यन्दमानं स्रवत् । मरन्दं मधु लिहन्तः आस्वादयन्तः

भृङ्गः अमरः । किमपि अनिर्वचनीयं यथा स्यात्तथा । मञ्जु मनोहरम् । गुञ्जन्तु शब्दं कुर्वन्तु । अयं निरपेक्षः निराकाङ्क्षः, लोभरहित इत्यर्थः । गन्धवाहः वायुः । दिशि दिशि सर्वासु दिशासु । तावकीनं त्वदीयं । परिमलं जनमनोहरं गन्धं । विवृण्वन् उद्घाटयन्, विस्तारयन् इत्यर्थः । अन्यः भृङ्गादिभिः विलक्षणः । बान्धवः सखा, उपकाररत इत्यर्थः । अमराः खलु तव रसलोभेन आकृष्टाः गुञ्जनेन कृत्रिमं बन्धुत्वं त्वयि दर्शयन्ति, वायुस्तु विना केनापि लोभेन सर्वतः तव गन्धं विस्तारयन् भृङ्गैर्विलक्षणः सहजश्च बन्धुः—इति कमलं प्रति कवेः मुख्योक्तिः । अन्योक्तिस्तु—कश्चित् उपदेष्टा शिष्यादिकं उपदिशति—ये इमे तव धनादिलोभात् चाटूनि कुर्वन्ति बन्धुत्वं च प्रकटयन्ति न ते सन्मित्राणि, किन्तु अस्मादृशः एव विनापि उपकारापेक्षया त्वदीयं हितं कुर्वन् तव गुणांश्च प्रख्यापयन् सहृदः—इति । अत्र अप्रस्तुतेन कमलेन प्रस्तुतः कश्चित् उपदेशार्हः राजकुमारादिः गम्यते । मालिनी वृत्तम् । "ननमयययुतेयं मालिनी भोगिलोकैः"—इति लक्षणम् ॥ ४ ॥

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ५ ॥

समुपागतवतीति ॥ हे कुटज वृक्षविशेष । 'कुडा' इति महाराष्ट्रभाषायां प्रसिद्धः । दैवात् विधिवशात् । समुपागतवति समीपं प्राप्तवति । मधुकरे भ्रमरे । अवहेलां अवमानताम् । मा गाः मा गच्छ, मा दर्शयेत्यर्थः । अयम् । मकरन्दतुन्दिलानां मकरन्देन पुष्परसेन तुन्दिलानां परिपूर्णानाम् । अरविन्दानां कमलानाम् । महामान्यः अतीव पूज्यः । हे कुटजवृक्ष यदि दैवात् भ्रमरोऽयं मधुरहितस्यापि तव पार्श्वं आगतः, तर्हि अस्मिन् उपेक्षां मा दर्शय, अस्य अनादरं मा कुरु, यतः मधुपूर्णानां कमलानामपि अतीव पूज्योऽयम् इति मुख्योक्तिः । अन्योक्तिस्तु—यदि कश्चित् विद्वान्, यः गुणवद्भिः अपि राजभिः पूजितः, कथञ्चित् निर्गुणस्य स्वामिनः पार्श्वमागतः, तर्हि तेन निर्गुणेन तस्य अनादरो न कार्यः, अपि तु पूजा तस्य कार्या । अत्रापि अप्रस्तुतप्रशंसा । अप्रस्तुतेन कुटजेन मधुकरेण अरविन्देन च प्रस्तुतः निर्गुणः कश्चित् स्वामी गम्यते, तद्गृहमागतो विद्वान्, गुणवांश्च कश्चित् नृपः ।

अत्र आर्यागीतिः वृत्तम् । "आर्याप्रथमार्धसमं यस्याः परार्धमीरिता गीतिः" इति लक्षणम् ॥ पद्मिनि रसगङ्गाधरे अप्रस्तुतप्रशंसोदाहरणे पठ्यते (पृ ४०४) ॥ ५ ॥

तावत्कोकिल विरसान्यापय दिवसान्[1] वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ६ ॥

[1] र०–दिवसान् यापय विरसान्

तावदिति ॥ हे कोकिल । वनान्तरे अन्यस्मिन् वने । निवसन् । तावत् तत्कालपर्यन्तम् । विरसान् रसहीनान्, स्वप्रयोजनशून्यान् । दिवसान् । यापय गमय । कालक्षेपं कुरु इत्यर्थः । यावत् । मिलदलिमालः मिलन्ती अलीनां भ्रमराणां माला यस्मिन् सः । भ्रमरैः परिवृत इत्यर्थः । कोऽपि । रसालः आम्रवृक्षः । समुल्लसति उदेति । हे कोकिल यदि ते प्रयोजनसिद्धिर्न भवति तर्हि तूष्णीं स्थित्वा कस्मिंश्चित् वने तावत्कालक्षेपं कुरु, यावत् कश्चित् भ्रमरपूर्णः आम्रः नोद्गच्छति–इति मुख्योक्तिः । अन्योक्तिस्तु-हे विद्वन् यावत्कालपर्यन्तं तव प्रयोजनसाधकः कश्चित् गुणग्राही नोत्पद्यते तावत्कालपर्यन्तं धैर्यमवलम्ब्य स्थीयतामिति कश्चित् कंचिदुपदिशति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन कोकिलेन प्रस्तुतः कश्चित् विद्वान्, रसालेन च प्रस्तुतः कश्चित् गुणग्राही गम्येते । आर्यावृत्तम् । "यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥" इति लक्षणम् । इदमपि पद्यं रसगङ्गाधरे अप्रस्तुतप्रशंसोदाहरणे पठ्यते (पृ० ४०४) ॥ ६ ॥

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥ ७ ॥

नितरामिति ॥ हे कूप । अहं नितरां अत्यन्तम् । नीचः निम्नः, पक्षे हीनः । अस्मि इति । त्वं कदापि । खेदं दुःखम् । मा कृथाः मा कुरु । यतः यस्मात् कारणात् । अत्यन्तसरसहृदयः अत्यन्तसरसं अतीव जलपूर्णं हृदयं अन्तःप्रदेशो यस्य सः । पक्षे अत्यन्तसरसं अतीव रसिकं हृदयं यस्य सः । परेषां अन्येषां । गुणग्रहीता रज्जुग्राहकः । पक्षे गुणानां शौर्यादीनां ग्रहीता ज्ञाता । असि । हे कूप अतिगम्भीरत्वात् मा ते मनसि दुःखं भूत्, त्वं

हि जलपूर्णं कलशादीनां रज्जुं गृह्णासि—इति मुख्योक्तिः । अन्योक्तिस्तु—आत्मानं नीचं मन्यमानं प्रति कस्यचिदुपदेशः । अहं अत्यन्तहीनः इति त्वया मनसि खेदः न कार्यः । यतः तव हृदयं रसैः परिपूर्णं, सहृदयोऽसि । अन्येषां च गुणानां मर्मज्ञोऽसि—इति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन कूपेन प्रस्तुतः कश्चित् आत्मानं हीनं मन्यमानः गम्यते । आर्यागीतिवृत्तम्—लक्षणमुक्तं प्राक् । पद्यमिदं रसगङ्गाधरे क्लिष्टविशेषणाया अप्रस्तुतप्रशंसाया उदाहरणे पठ्यते (पृ० ४०३) ॥ ७ ॥ केचित् श्लोकमिमं अग्रिमश्लोकानन्तरं पठन्ति ।

कमलिनि मलिनीकरोषि चेतः
किमिति बकैरवहेलितानभिज्ञैः[1] ॥
परिणतमकरन्दमार्मिकास्ते
जगति भवन्तु[2] चिरायुषो मिलिन्दाः ॥८॥

१ बा, प०—H. —बकैरवलेहितामभिज्ञैः । २. बा०, प०:—H. जयन्तु ।

कमलिनीति ॥ हे कमलिनि । अनभिज्ञैः मूर्खैः । बकैः अवहेलिता उपेक्षिता । किमिति कस्मात् कारणात् । चेतः चित्तम् । मलिनीकरोषि कलुषं दूषितं करोषि । ते तव परिणतमकरन्दमार्मिकाः परिणतः परिपक्वः मकरन्दः पुष्परसः तस्य मार्मिकाः परीक्षकाः । मिलिन्दाः भ्रमराः । जगति चिरायुषः दीर्घजीविनः । भवन्तु । हे कमलिनि यदि मूर्खाः बकाः तवानादरं कुर्वन्ति तर्हि दुःखं मा कुरु । यावत् तव परिपक्वस्य रसस्य मर्मज्ञाः भ्रमराः दीर्घं जीवन्ति न तावत् दुःखस्य अवसरः—इति मुख्योक्तिः । अन्योक्तिस्तु—हे कवे यदि अरसिकास्तव अनादरं कुर्वन्ति तर्हि खेदो न कार्यः । ये मर्मज्ञाः रसिकाः ते यदि दीर्घायुषः तर्हि त्वया सर्वमेव लब्धम्—इति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतैः कमलिनीबकमिलिन्दैः प्रस्तुताः केचन कविमूर्खरसिकाः गम्यन्ते । पुष्पिताग्रावृत्तम् । "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणम् ॥८॥

येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेन हा मधुकरेण कथम् ॥ ९ ॥

येनेति ॥ येन मधुकरेण भ्रमरेण । अमन्दमरन्दे अमन्दः अनल्पः

मरन्दः मधु यस्मिन् तस्मिन् । दलदरविन्दे दलत् विकसत् अरविन्दं कमलं तस्मिन् । दिनानि । अनायिषत नीतानि । हा इति खेदे । तेन मधुकरेण । कुटजे खलु । ईहा वाञ्छा । कथं । तेने कृता । मधुना परिपूर्णे विकसिते च कमले दिनानि नीत्वा यदर्थं मधुकरः कुटजे अधुना बद्धभावः तत् अतीव अनुचितम्–इति मुख्योक्तिः । अन्योक्तिस्तु–यः खलु सकलसुखसामग्रीयुक्तं रसिकं च स्वामिनं सेवित्वा स्वकालं क्षपितवान्, स यदधुना कस्मिंश्चित् निर्गुणे प्रभौ आश्रयमिच्छति तर्हि महत् अनौचित्यम्–इति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुते अरविन्दकुटजमधुकरे प्रस्तुताः केचन सगुणस्वामिनिर्गुणस्वामिसेवकाः गम्यन्ते । आर्या वृत्तम् । लक्षणमुक्तं प्राक् ॥ ९ ॥

अयि मलयज महिमायं कस्य गिरामस्तु[1] विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ १० ॥

[1] प–c अस्ति for अस्तु

अयीति ॥ अयि मलयज चन्दनवृक्ष । अयं ते तव महिमा माहात्म्यम् । कस्य गिरां वाणीनां । विषयः अस्तु । न केनापि वर्णयितुं योग्यं ते गौरवं इत्यर्थः । यत्–गरलं विषं । उद्गिरतः वमतः । फणिनः सर्पान् । परिमलोद्गारैः परिमलस्य जनमनोहरगन्धस्य उद्गारैः संभारैः । पुष्णासि सन्तर्पयसि । हे चन्दनतरो अवर्णनीयं तव महिमा, त्वं विषं वमतोऽपि सर्पान् स्वमनोहरगन्धैः पोषयसि–इति मुख्योक्तिः । अन्योक्तिस्तु–कश्चित् अपकारिणं अपि उपकर्तारं कश्चित् सज्जनः स्तौति, अवर्णनीयं ते माहात्म्यमिति–इति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन मलयजेन प्रस्तुतः कश्चित् सज्जनः गम्यते, तथा अप्रस्तुतेन फणिना प्रस्तुतः कश्चित् अपकर्ता च गम्यते । आर्या गीतिः वृत्तम् । लक्षणमुक्तं प्राक् ॥ १० ॥

पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
[1]यत्पिषतामपि नृणां पिष्टोऽपि तनोषि परिमलः पुष्टिम् ॥ ११ ॥

१. ग, घ. –H. यः for यत् । शे०, प०, वे०–यत्पिषतामपि नृणां

पाटीरेति ॥ हे पाटीर चन्दन । इमां तव परिपाटीं रीतिम् । उरीकर्तुं स्वीकर्तुम् । कः पटीयान् चतुरः । यत् यस्मात् हेतोः । पिषतामपि चूर्ण-

यतामपि । नृणां जनानाम् । पिष्टोऽपि चूर्णितोऽपि । परिमलैः मनोहरगन्धैः । पुष्टिं पोषम् । तनोषि विस्तारयसि । हे चन्दन न कोऽपि तव रीतिं स्वीकर्तुं समर्थः । त्वं चूर्णितोऽपि चूर्णयतामपि जनानां स्वगन्धैः चित्तमाह्लादयसि— इति मुख्योक्तिः । अन्योक्तिस्तु—कश्चित् सज्जनः अपकारिणि क्रियमाणे अपकारे अपि तानेव स्वशरीरेण पोषयति—स अन्यः कथयति— 'धन्यस्त्वम् । नान्यः कश्चित् त्वत्समः ।' इति—इति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन चन्दनेन परोपकाररतः प्रस्तुतः कश्चित्सज्जनः गम्यते । आर्यागीतिः वृत्तम् । लक्षणमुक्तं प्रागेव ॥११॥

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ १२ ॥

नीरेति ॥ हे हंस । नीरक्षीरविवेके नीरं जलं क्षीरं दुग्धं, तयोः विवेके पृथक्करणे । त्वमेव आलस्यं । तनुषे करोषि । चेत् यदि तर्हि अधुना । विश्वस्मिन् सर्वस्मिन् त्रैलोक्ये इत्यर्थः । कः अन्यः । कुलव्रतं कुलधर्मं पालयिष्यति । हे हंस न कश्चित् त्वदन्यः क्षीरात् जलं पृथक्कर्तुं समर्थः । त्वमेव यदि अस्मिन् कर्मणि आलस्यं करोषि, तर्हि कोऽन्यः एतत् करिष्यति— इति मुख्योक्तिः । अन्योक्तिस्तु—मौनावलंबिनं कमपि उत्कृष्टगुणं मध्यस्थं प्रति कस्यचित्कवेः अन्यस्य वा उक्तिः । उत्कृष्टगुणतया त्वमेव तारतम्यपरीक्षायां कुशलः । मौनमवलम्बसे चेत् त्वं, तर्हि कोऽन्यः मध्यस्थतां अवलम्बताम्— इति । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन हंसेन प्रस्तुतः कश्चिद् गुणविवेचकः गम्यते आर्या वृत्तम् ॥ १२ ॥

उपरि करवालधाराकाराः क्रूरा भुजङ्गमपुङ्गवात्[1]
अन्तः साक्षाद्द्राक्षादीक्षागुरवो जयन्ति केऽपि जनाः ॥ १३ ॥

[1] प०—भुजङ्गपुङ्गवत् । E भुजङ्गपुङ्गवत् ।

उपरीति ॥ उपरि बहिः । करवालधाराकाराः करवालः खड्गः तस्य धारा तदाकाराः तत्सदृशाः खड्गधारातीक्ष्णाः इत्यर्थः । भुजङ्गमपुङ्गवात् सर्पश्रेष्ठात् । क्रूराः क्रूरतराः । किन्तु अन्तः मनसीत्यर्थः । साक्षात् । द्राक्षादीक्षागुरवः । द्राक्षायाः मृद्वीकायाः दीक्षा उपदेशः । तस्याः गुरवः उपदेष्टारः । के अपि अनिर्वचनीयाः । जनाः जयन्ति । सर्वोत्कर्षेण वर्तन्ते ।

येषां बाह्य आचारः सहजवत् तीक्ष्ण सर्पवत् च क्रूर, परंतु येषां मनः द्राक्षावत् मधुरं शीतलं हितकारि च, ते अनिर्वचनीयमहिमानः सज्जनाः सर्वोत्कृष्टा—इति भावार्थः । अत्र उल्लेख अलङ्कारः । तल्लक्षणं च—"एकस्य वस्तुनो निमित्तवशाच्छब्दनैकैर्ग्रहीतृभिरनेकप्रकारक ग्रहण तदुल्लेखः" इति रसगङ्गाधरे । तत्रैव च (पृ० २७५) पद्यमेतदुदाहृतम् गीतिवृत्तम् । तल्लक्षणं चोक्तं प्राक् । 'सुभगमपुंगवात्' इत्यत्र 'मधुग' इति विषमे सप्तमे स्थाने जगणस्य प्रयोगो दुष्टः । उक्तं च रसगङ्गाधरटिप्पण्याम्—"आर्यापूर्वार्धे 'नेह भवति विषमे ज' इति नियमादत्र च विषमे सप्तमस्थाने जगणस्य सत्त्वाच्छन्दो-भङ्गदूषितमेतदार्यापूर्वार्धमिति ज्ञेयम्" । इति ॥ १३ ॥

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ।
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणप्रवीणः ॥१४॥

स्वच्छन्दमिति । हे दलदरविन्द विकसत्कमल । ते मरन्दं मधु । स्वच्छन्द यथेच्छम् । विन्दन्तः प्राप्नुवन्तः । मिलिन्दा भ्रमराः । गुञ्जितं शब्दं । विदधतु कुर्वन्तु । अथ हरिदन्तराणि हरितां दिशां अन्तराणि मध्य-काष्ठान् । आमोदान् गन्धान् । नेतुम् । इह जगति संसारे । समीरणात् वायोः । अन्य इतरः । प्रवीण चतुरः । न विद्यते इति शेषः । पद्यमेतत् 'अपि दलदरविन्द' इति चतुर्थपद्येन समानार्थम् । अतः ते एव अन्योक्ति-मुख्योक्ती अत्रापि । अलङ्कारोऽपि समानः । प्रहर्षिणीवृत्तम् । "त्रौ त्रौ गश्चिदशयतिः प्रहर्षिणीयम्" इति लक्षणम् ॥ १४ ॥

याते मध्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसंततिरसौ[1] संतापमालाकुला ।
घर्मे[2] यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षाल्यते
धन्य जीवनमस्य मार्गसरसो धिग्वारिधीना जनुः ॥१५॥

१. प०—A F "लहति" । २. F इत्य ।

याते इति ॥ मध्ये । निदाघमिहिरज्वालाशतैः । निदाघस्य ग्रीष्मस्य मिहिरः सूर्यः । तस्य ज्वालाशतैः ज्वालानां अर्चिषां शतैः । अचिरात्

शीघ्रमेव । शुष्कतां नीरसता निर्जलतामिति यावत् । याते गते सति । असौ । संतापमालाकुला सन्तापानां आतपानां मालाभिः आकुला पीडिता । पान्थसन्ततिः पान्थानां पथिकानां सन्ततिः समूहः । कं प्रति गन्ता गमिष्यति । इति एवं अमुना प्रकारेण । निरन्तराधिपटलैः । निरन्तरा सततां ये आधयः चिन्ताः । तेषां पटलैः समूहैः । यस्य सरसः । वपुः शरीरं । नित्यं क्षीयते क्षयं प्राप्नोति[1] । अस्य एतादृशस्य । मार्गसरसः मार्गे अध्वनि स्थितस्य सरसः जलाशयस्य । जीवनं अस्तित्वं जलं च । धन्यं सफलम् । वारिधीनां समुद्राणां । जन्मः जन्म । धिक् । ग्रीष्मर्तौ सूर्यकिरणैः शोषितजले मयि पिपासाकुलाः पथिकाः क्व प्रति यास्यन्ति—इत्येवं चिन्ताशतैर्व्याकुलहृदयस्य क्षयं च गच्छतो मार्गजलाशयस्य जन्म सफलं, दूरस्थितस्य परिपूर्णजलस्य पथिकानामुपकारकरणे चायोग्यस्य समुद्रस्य जन्म निष्फलम्— इति मुख्योक्तिः । अर्थोक्तिस्तु—आपत्तिभिः पीडितो निर्धनोऽहं यदा भविष्यामि तदा याचकवर्गः कस्मात्साहाय्यं प्राप्स्यतीति चिन्तापीडितहृदयस्य सदा परोपकारनिरतस्य वदान्यस्य जन्म सफलम्, वस्तु स्वार्थमात्रपरायणः स धनपूर्णोऽपि नितरां निन्दितजन्मा—इति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मार्गसरसा प्रस्तुतः परोपकारी दानी गम्यते, तथा चाप्रस्तुतेन समुद्रेण प्रस्तुतः स्वार्थपरायणो धनिको गम्यते । शार्दूलविक्रीडितं वृत्तम् । लक्षणमुक्तं प्राक् ॥१५॥

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि[1] समाश्रयन्ति[2] ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ १६ ॥[3]

[1] प. C E F and G read रसालकुसुमानि । २. प C °श्रयन्ते । A C °श्रयन्ते । [3]. प. A, however, reads this verse after २१.

आपेदिर इति ॥ हे सरः । त्वयि संकोचं ग्रीष्मतापात् ह्रासम् । अञ्चति भजति सति । पतङ्गाः पक्षिणः । परितः समन्तात् । अम्बरपथं आकाशम् । आपेदिरे प्राप्ताः भृङ्गाः रसालमुकुलानि आम्रकुड्मलानि । समाश्रयन्ति निषेवन्ते । किन्तु । हन्त इति खेदे । दीनदीनः दीनेभ्यो भृङ्गादिभ्योऽपि

दीनः निराश्रयः, अनन्यगतिक इति यावत् । मीनः मत्स्यः । कतमां गतिं । अभ्युपैतु प्राप्नोतु । सति जलाशयस्य जलक्षये पक्षिणः आकाशं गताः भ्रमराश्च रसालमञ्जरीं सेवन्ते, किन्तु अनन्यगतिकः मत्स्यः क्व गच्छतु, नास्ति तस्यान्यत् शरणम्–इति मुख्योक्तिः । अन्योक्तिस्तु–क्षीणवित्ते राजनि उपसेवकाः तं परित्यज्य गच्छन्ति, किन्तु तन्मात्रावलम्बी पुरुषः कुत्रापि गन्तुं न शक्नोति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सरसा प्रस्तुतः क्षीणधनो नृपादिर्गम्यते, मीनेन च तन्मात्रसहायः कश्चित्पुरुषविशेषः । वसन्ततिलकावृत्तम् । "ज्ञेया वसन्ततिलका तभजा जगौ गः" इति लक्षणम् । पद्यमिदं रसगङ्गाधरे (पृ. ४०७) अप्रस्तुतप्रशंसायामुदाहृतम् ॥ १६ ॥

मधुप इव मारुतेऽस्मिन्या सौरभलोभमम्बुजिनि मंस्था ।
लोकानामेव मुदे महितोऽप्यात्मामुनार्थितां नीतः[1] ॥ १७ ॥

[1] प०–F. महतः

मधुप इति ॥ हे अम्बुजिनि । कमलिनि । मधुपे भ्रमरे इव । अस्मिन् मारुते वायौ । सौरभलोभं सौरभस्य गन्धस्य लोभं । या मंस्थाः मा जीगणः । अमुना वायुना । महितः श्रेष्ठः । अपि आत्मा । लोकानां एव । मुदे हर्षाय, सन्तोषायेति यावत् । अर्थितां याचकतां । नीतः प्रापितः । हे कमलिनि, भ्रमरस्तव गन्धं आत्मार्थं गृह्णाति, किन्तु वायुस्तु नेदृशः–यद्येन श्रेष्ठेनापि याचकता स्वीकृता तत्र परोपकार एव कारणम्–इति मुख्योक्तिः । अन्योक्तिस्तु–नायमितरयाचकवत् स्वार्थं साधयितुं त्वदन्तिकमुपागतः, किन्तु परोपकारप्रेरितः सन् पूज्योऽपि याचारूपं लघुत्वं स्वीकरोति–इति राजानं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । गीतिवृत्तम्–लक्षणं प्रागुक्तम् ॥ १७ ॥

गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥ १८ ॥

गुञ्जतीति ॥ हे मालति । मिलिन्दे भ्रमरे । मञ्जु मधुरं । गुञ्जति रवं कुर्वति सति । मौनं अप्रफुल्लीभावं मूकत्वं च । मा उपयासीः मा गमः । वदान्यगुरवः वदान्येषु दातृषु गुरवः श्रेष्ठाः । सुरतरवः कल्पवृक्षाः । एनं शिरसा सादरं । वहन्ति धारयन्ति । पद्यमेतत् "समुपागतवति दैवात्"

(५) इति पद्येन समानार्थम् । अप्रस्तुतप्रशंसालङ्कारः । उद्गीतिवृत्तम् । तल्लक्षणं च "आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः" ॥ १८ ॥

यैस्त्वं गुणगणवानपि[1] सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीय[2]मौन्नत्यम् ॥ १९ ॥

[1]. वा. गुणगणवानसि [2]. वा. तव for त्वदीय

यैरिति ॥ हे पटीरज चन्दनतरो ! यैः द्विजिह्वैः सर्पैः, पिशुनैरिति च गम्यते । गुणगणवानपि गुणसमूहवानपि । त्वं । सतां सज्जनानां । असेव्यतां अनाश्रयतां । नीतः प्रापितः । तान् गुणनाशकान् द्विजिह्वानपि । वहसि । धारयसि । त्वदीयं औन्नत्यं महत्त्वं । किं कथयामः कथं वर्णयामः । हे चन्दनवृक्ष धन्योऽसि यत्त्वं सौरभ्यादिगुणयुक्तोऽपि यैः सर्पैः सज्जनानामगम्यः कृतः, तानेव धारयसीति व्याजस्तुतिरूपा मुख्योक्तिः । अन्योक्तिस्तु—यैः पिशुनैः स्वमहागुणयुक्तस्त्वं सज्जनासेव्यः कृतः तान् धारयन् त्वं आत्मनः विवेकराहित्यं प्रकटयसीति राजानं प्रति कस्यचिदुक्तिः । अत्राप्रस्तुतप्रशंसा व्याजस्तुतिश्चेति अलङ्कारौ । अत्राप्रस्तुतेन पटीरजेन द्विजिह्वैश्च प्रस्तुतः विवेकरहितः प्रभुः पिशुनाश्च गम्यन्ते । औन्नत्यरूपया स्तुत्या च विवेकहीनतारूपा निन्दा गम्यते । गीतिवृत्तम् ॥ १९ ॥

अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे[1] ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर[2] धन्योसि ॥ २० ॥

१. प.—A. सुरतरु° २. प.—A. H मधुप for भ्रमर. Before this A. F. insert the following आर्या—

गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकारं न प्रपेदे मधुपेन भवत्तमं (A. तथोपमा) जगति ॥

अपनीतेति ॥ हे भ्रमर । अपनीतपरिमलान्तरकथे अन्यः परिमलः परिमलान्तरं परिमलान्तरस्य कथा परिमलान्तरकथा, अपनीता दूरीकृता परिमलान्तरकथा अन्यगन्धवार्ता येन, तस्मिन्-सर्वोत्कृष्टगन्धयुक्ते-इत्यर्थः । देवतरुकुसुमे कल्पवृक्षपुष्पे । पदं । न्यस्य स्थापयित्वा कुसुमानि सेवयित्वा इत्यर्थः । पुष्पान्तरे अन्यस्मिन् साधारणे पुष्पे । गन्तुं । वाञ्छसि इच्छसि चेद् यदि । तर्हि धन्यः असि-इत्युपालम्भः-त्वां धिक् इत्यर्थः । सर्वोत्कृष्ट-

गन्धयुक्तं कल्पवृक्षपुष्पं निषेव्य पुनरपि यदि साधारणं पुष्पं सेवसे तर्हि तिरस्कारयोग्योऽसि हे भ्रमर-इति मुख्योक्तिः । अन्योक्तिस्तु-सर्वोत्कृष्टगुणयुक्तं कंचित् नृपविशेषं निषेव्य अधुना यदि साधारणजनसेवां कर्तुं इच्छसि चेत् तर्हि धिक्कारयोग्योऽसि इति इति सेवकं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसा व्याजस्तुतिश्चालङ्कारौ । अत्राप्रस्तुतेन देवतरुकुसुमेन कश्चित् नृपविशेषः गम्यते, पुष्पान्तरेण साधारणः जनः, भ्रमरेण च कश्चित् सेवकः । धन्योऽसीति स्तुत्या त्वां धिक् इति निन्दा गम्यते । आर्यावृत्तम् ॥ २० ॥

तटिनि चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः ।
शुष्यन्त्या अपि युक्तं किं खलु रथ्योदकादानम् ॥ २१ ॥

तटिनीति ॥ हे तटिनि नदि । विन्ध्यभुवः विन्ध्यात् पर्वतात् भूः जन्म यस्याः तस्याः अत एव पवित्रायाः तव । शुष्यन्त्या क्षयं प्राप्नुवन्त्या अपि । रथ्योदकादानं रथ्यायाः प्रतोल्याः उदकस्य जलस्य आदानं ग्रहणम् । किं खलु युक्तं उचितम् । अनुचितमित्यर्थः । इति चिराय बहुकालं । विचारय । विन्ध्यपर्वतप्रसूतायाः अत एव पवित्रायाः, शुष्कजलायाः अपि तव मार्गवर्तिदुर्गन्धजलग्रहणं अनुचितमिति नदीं प्रति कस्यचिदुक्तिः-इति मुख्योक्तिः अन्योक्तिस्तु---कुलीनः सकलापन्नोऽपि नीचात् यदि किंचित् गृह्णाति तर्हि एतदनुचितम् । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतया नद्या प्रस्तुतः कश्चित् कुलीनः गम्यते । उद्गीतिवृत्तम् ॥२१॥

पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं वृतं च खलु शूकैः ।
उपसर्पेम भवन्तं बर्बुर वद कस्य लोभेन ॥२२॥

पत्रेति ॥ हे बर्बुरवृक्ष । पत्रफलपुष्पलक्ष्म्या पत्राणां फलानां पुष्पाणां च लक्ष्म्या शोभया युक्तमिति शेषः । कदापि अदृष्टं । अस्माभिरिति शेषः । शूकैः कण्टकैश्च । खलु । वृतं व्याप्तं । भवन्तं कस्य वस्तुनः । लोभेन । वयं उपसर्पेम स्वस्यार्थे आगमनं करवाम । इति त्वमेव । वद कथय । पत्रपुष्पफलादिभिः सर्वथा हीनं प्रत्युत कण्टकाकीर्णं भवन्तं केन गुणेन आकृष्टा वयं उपगच्छेम-इति मुख्योक्तिः । अन्योक्तिस्तु— न केवलं गुणरहितं अपि तु दोषसहितं भवन्तं केन अभिलाषेण उपगच्छेम इति दुष्टं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन बर्बुरेण प्रस्तुतः

निर्गुणं कश्चित् दुष्टः गम्यते । आर्यावृत्तम् ॥२२॥

एकस्त्वं गहनेऽस्मिन् कोकिल न कलं[1] कदाचिदपि कुर्याः ।
साजात्यशङ्कयामी न त्वां निघ्नन्ति[2] निर्दयाः काकाः ॥ २३ ॥

१. प०—A. कलह २. प०—निघ्नन्तु ।

एक इति ॥ हे कोकिल । अस्मिन् गहने वने । एकः एकाकी । त्वम् । कदाचिदपि । कलं मधुरकूजनम् न कुर्याः । अमी । निर्दयाः निष्करुणाः । काकाः । त्वां । साजात्यशङ्कया समाना जातिः सजातिः, तस्याः भावः साजात्यं तस्य शङ्कया—अस्मज्जातीयोऽयं इति बुद्ध्या । न निघ्नन्ति न व्यापादयन्ति । तव स्वरं श्रुत्वा तु कोकिलोऽयं इति परिचिताः भविष्यन्ति । परभृताः स्वाण्डानि काकनीडेषु निधाय उड्डीयन्ते । काकाश्च तानि निजान्येव मन्यमानाः पोषयन्ति । उक्तं च कालिदासेनापि—'अगन्तरिक्षगमनात् स्वमपत्यजातमन्यैर्द्विजैः परभृताः परिपोषयन्ति' । अन्योक्तिस्तु—दुर्जनसमुदाये गुणवान् तूष्णीं एव तिष्ठेत्, अन्यथा ते तं व्यापादयेयुः । अप्रस्तुतप्रशंसालङ्कारः । अत्र अप्रस्तुतेन कोकिलेन प्रस्तुतः कश्चिदसहायः विद्वान् गम्यते, अप्रस्तुतैः काकैश्च प्रस्तुताः दुष्टाः गम्यन्ते । गीतिवृत्तम् ॥२३॥

तरुकुलसुषमापहरां[1] जनयन्तीं जगति जीवजातार्तिम्[2] ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥२४॥

१ प०—A F. °कुसुमा° २. प०—A. F. जीवजातार्ती

तरुकुलेति॥ हे भवानीतात भवान्याः पार्वत्याः तात पितः, हिमालय। तरुकुलसुषमापहरां तरूणां वृक्षाणां कुलस्य समूहस्य सुषमां परमां शोभां अपहरन्तीं अपाकुर्वतीम्। जगति संसारे। जीवजातार्तिं जीवजातस्य प्राणिसमूहस्य आर्तिं पीडाम्। जनयन्तीं उत्पादयन्तीम्। इमां हिमानीं हिमसंहतिम्। केन गुणेन। वहसि धारयसि। हे हिमालय इयं हिमसंहतिः लतावृक्षादीनां शोभां नाशयति सकलं च प्राणिवर्गं शीतेन पीडयति, तथापि केन अस्याः गुणेन आकृष्टः इमां धारयसीति मुख्योक्तिः। अन्योक्तिस्तु—एवंविधमहत्त्वयुक्त सज्जन किमर्थं सर्वोपकारिणं त्वं धारयसीति कस्यचित् कंचित् प्रति उपदेशः। अप्रस्तुतप्रशंसालङ्कारः। अत्राप्रस्तुतेन हिमालयेन प्रस्तुतः कश्चित्

महापुरुषः गम्यते, तथा च अप्रस्तुतया हिमान्या प्रस्तुतः कश्चित्सर्वोपकारी । आर्यावृत्तम् ॥ २४ ॥

कलभ तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः[2] ॥ २५ ॥

१. प०–A F द्विपवर्याणां २. प०–F महामान्यः ।

कलभेति ॥ हे कलभ करिशावक । तव अन्तिकं निकटं । आगतं । एनम् । आलिं भ्रमरम् । कदापि मा अवज्ञासीः मा अवमंस्थाः । अयं दान सुन्दराणां दानेन मदेन सुन्दराणां रुचिराणां । द्विपधुर्याणां गजश्रेष्ठानां । अपि । शिरोधार्यः महामान्यः । पद्यमिदं पूर्वप्रक्रान्तेन रत्नमेन पद्येन समानार्थकम्, अलङ्कारोऽपि तत्समानमेव, अतो नात्र दीप्यते । गीतिवृत्तम् ॥ २५ ॥

अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य ।
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥ २६ ॥

अमरेति ॥ अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य अमराणां देवानां तरवो वृक्षाः कल्पवृक्षाः, तेषां कुसुमानां सौरभः शोभनो गन्धः तस्य सेवनेन संपूर्णाः सकलाः अखिलाः कामाः मनोरथाः यस्य तस्य । भ्रमरस्य । इयं । पुष्पान्तरसेवा अन्यत् पुष्पं पुष्पान्तरं तस्य सेवा । महती विडम्बना उपहासः खलु । पद्यमेवैतत् 'अपनीतपरिमलातरुके' इत्यादि (२०) पद्येन समानार्थम् । अतस्तथोक्ता एव अन्योक्तिमुख्योक्त्यलङ्कारादयः । आर्यावृत्तम् ॥ २६ ॥

पृष्टाः[1] खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्वे ।
[2]माकन्द न प्रवेदे मधुपेन तवोपमा[3] जगति ॥ २७ ॥

१. प०–C. स्पृष्टाः २. र०– भेदेन भुवि न वेदे साधर्म्यं ते रसाल मधुपेन. ३. प०–तवोपमम् ।

पृष्टा इति ॥ हे माकन्द आम्रवृक्ष । मधुपेन भ्रमरेण । परपुष्टाः कोकिलाः । कोकिला हि काकनीडेषु स्वाण्डानि स्थापयन्ति, काकाश्च तानि स्वाण्डबुद्ध्या पोषयन्ति, अत एव तासां परपुष्टत्वम् । खलु निश्चयेन । पृष्टाः प्रश्नं कृताः । सर्वे विटपिनः पादपाश्च । दृष्टाः स्वयं अवलोकिताः ।

तथापि । तवोपमा तव सादृश्यम् । जगति न प्रपेदे न प्राप्तम् । सर्वत्र भ्रमणानन्तर अपि त्वत्सदृशो भ्रमरेण न कचिदपि प्राप्त इति आम्रवृक्षं प्रति कस्यचिदुक्तिरिति–मुख्योक्तिः । अन्योक्तिस्तु–हे राजन् सर्वत्रान्विष्यन्नपि याचकवर्गोऽयं त्वद्गुणसदृशमन्यं न प्राप्तवानिति राजानं प्रति कस्यचिदुक्तिः । एतामिमां रसगङ्गाधरे अनन्वयव्यन्ग्युदाहरणे (पृ. २०९) पठ्यते–तत्रोत्तरार्धं तु–' भेदेन भुवि न पेदे साधर्म्यं ते रसाल भवुदेन ' इति । अस्यार्थः–भेदेन साधर्म्यं सादृश्यं न पेदे न गृहीतम्–अर्थात् त्वन्निभः त्वत्सदृशश्च न कोऽपि दृष्टः, अपि तु त्वत्सदृशः त्वत्तोऽभिन्नः, त्वमेवेत्यर्थः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन भाकन्दन प्रस्तुतः कश्चिद् राजादिः गम्यते । आर्यावृत्तम् ॥ २७ ॥

तोयैरल्पैरपि[1] करुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता[2] विश्वतो वारिदेन ॥२८॥

१ वा.०–'रति २ प०–A F वितरता.

तोयैरिति ॥ हे मालाकार माला पुष्पस्रजं करोतीति मालाकारः । भवता । भीमभानौ भीमः भीषणः भानुः सूर्यः यस्मिन् । एतादृशे । निदाघे ग्रीष्मकाले । करुणया दयया । अल्पैः कृपाशुष्कैः । अपि । तोयैः जलैः । अस्य तरोः वृक्षस्य । या पुष्टिः पालनम् । व्यरचि विरचितम् कृतमित्यर्थः । सा पुष्टिः इह लोके । प्रावृषेण्येन प्रावृषि वर्षाकाले भवेन । वारां जलानाम् । धारासारान् धारासपातान् विश्वतः सर्वतः । अपि । विकिरता प्रक्षिपता । वारिदेन मेघेन । जनयितुं उत्पादयितुं । शक्या किम्? अपि तु न शक्येत्यर्थः । ग्रीष्मार्तौ स्वल्पेनापि जलेन, हे मालाकार, यस्य वृक्षस्य त्वया पुष्टिः क्रियते सा वर्षाकाले प्रभूतैरपि जलैः मेघेन कर्तुं न शक्येति मुख्योक्तिः । अन्योक्तिस्तु–हे दयालो, उचिते समये स्वल्पमपि साहाय्यं त्वया कृतं, अस्मयं कृतात् महतोऽपि साहाय्यात् श्रेयः, इति धनिकं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मालाकारेण प्रस्तुतः कश्चित्सम्भवोपकारी गम्यते । मन्दाक्रान्ता वृत्तम् । लक्षणं च–' मन्दाक्रान्ता

जलधिपङ्कगम्भौ नतौ ताडुरु चेत्' इति ॥ २८ ॥

आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुःसहः ।
एवं धन्वनि[1] चम्पकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ॥२९॥

१ बा०—धुन्वति.

आरामेति ॥ आरामाधिपतिः आरामस्य उद्यानस्य अधिपतिः पालकः । विवेकविकलः विचारशून्यः । नूनं निश्चितं अस्तीति शेषः । रसा पृथ्वी । नीरसा निर्गतानि रसाः जलानि यस्याः सा शुष्का इत्यर्थः । वात्याभिः वातसमूहैः । दश दिशः । परुषीकृताः रूक्षीकृताः । चण्डातपः चण्डः तीव्रः आतपः, अथवा चण्डः आतपो यस्य स सूर्यः । दुःसहः असह्यः त्वम् । धन्वनि मरुप्रदेशे । चम्पकस्य तन्नामकवृक्षस्य । सकले समग्रे । संहारहेतौ नाशकारणे उपस्थिते इति शेषः । अपि । हे तोयद मेघ । अमृतेन अमृतरूपेण जलेन । सिञ्चन्, चम्पकमिति शेषः । वेधसा ब्रह्मणा त्वम् । कुतोऽपि ? आविष्कृतः प्रकटीकृतः । मरुभूमौ चम्पकस्य सर्वाणि नाशकारणान्युपस्थितानि—उद्यानपालकः विचारहीनः, पृथ्वी निर्जला, प्रचण्डवातैः सर्वासु दिक्षु रूक्षत्वमापादितं, सूर्यस्यातपश्च असह्य—एतादृशे समये ब्रह्मणा जलवर्षणेन चम्पकं प्रत्युज्जीवयन् दयालुर्मेघः समुत्पादितः—इति मुख्योक्तिः । अन्योक्तिस्तु—सकलेऽपि नाशहेतौ अतीव विपन्नं प्रति दयां दर्शयसीति कश्चिदुपकारिणं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मरुदेशस्थितेन चम्पकेन प्रस्तुतः कश्चित् विपद्ग्रस्तः गम्यते, तोयदेन च कश्चिद् दयालुः । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

न यत्र स्थेयानं दधुरतिभयभ्रान्तनयना[1]
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे[2] भवति परलोकं गतवतो[3]
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥ ३० ॥

१ बा० °हृदयाः २ बा०—स्खलन्मुक्ताभारे ३ बा०—गतवति.

नेति ॥ यत्र हरेः सिंहस्य द्वारे । अतिभयभ्रान्तनयनाः अतिभयेन

अतुलभीरवो भ्रान्तानि घूर्णितानि वचनानि येषां ते । गलद्दानोद्रेकभ्रमद्दलिकदम्बाः गलन् स्रवन् यद्दान गजमदः तस्य उद्रेकः बाहुल्यं तेन भ्रमन्त बलीना भ्रमराणां कदम्बाः समूहा येषु ते । करटिनः गजा. । स्थेमानं स्थिरत्वं न दधुः धारयामासुः । तत्र । परलोकं गतवतः मृतस्य । हरे सिंहस्य । लुठन्मुक्ताभारं लुठन्तः मुक्तानां भाराः यस्मिन् तस्मिन् । द्वारे । शिव शिवेति खेदे । शिवानां शृगालानां कलकलः कोलाहलः । भवति । यस्मिन् सिंहद्वारे पुरा मत्ता अपि गजा भवेन स्थातुं नाशक्नुवन् तत्रैवाद्य सिंहमरणानन्तर शृगालानां हाहारव. श्रूयत इति–मुख्योक्तिः । अन्योक्तिस्तु–करटिपौरुषयुक्तस्य नरस्य मृत्योरनन्तर तस्य गृहे क्षुद्रा अपि जना आविरत्य जल्पन्ते । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सिंहेन प्रस्तुतः कश्चिन्महासत्त्वो गम्यते, शृगालैश्च क्षुद्रा नरा । शिखरिणी वृत्तम् । लक्षणं तु प्रागुक्तमेव ॥ ३० ॥

दधानः प्रेमाणं तरुषु समभावेन विपुला[1]
न मालाकारोऽसावकृत करुणां बालबकुले ।
अयं तु द्राग्युद्यत्कुसुमनिकराणां परिमलै-
र्दिगन्तानातेने[2] मधुपकुल[3]झङ्कारभरितान् ॥३१॥

[1] बा०–विपुल. [2] प०–Cालेने. [3] प०–H°कल°.

दधान इति ॥ असौ मालाकारः उद्यानपालकः । तरुषु वृक्षेषु । समभावेन समदृष्ट्या । प्रेमाणं स्नेहं । दधान धारयन् । बालबकुले नवीने बकुलद्रुमे । विपुलां महतीं । करुणां दयां । न अकृत नाकरोत् । अयं बकुलः । तु । द्राक् शीघ्रं । उद्यत्कुसुमनिकराणां उद्यन्ति आविर्भवन्ति यानि कुसुमानि तेषां निकराणां समूहानां । परिमलैः मनोहरगन्धैः । मधुपकुलझङ्कारभरितान् मधुपानां भ्रमराणां कुल समूहः तस्य झङ्कारेण गुञ्जितेन भरितान् पूर्णान् । दिगन्तान् दिग्विभागान् । आतेने चकार । मालाकारः सर्वेषु तरुषु समदृष्टिः, सचाचिकं प्रयत्नमपेक्षमाणे बालकेसरवृक्षे न विशेष यत्नमदर्शयत्, किन्तु वृक्षोऽयं तथापि स्वसौरभैः सर्वा दिशः पूरयतीति–मुख्योक्तिः । अन्योक्तिस्तु—समदृष्टित्वात् राज्ञोपेक्षितः, किन्तु मृदुत्वात्प्रयत्नाधिक्यमपेक्षमाणः गुणवान् सेवकः स्वगुणैर्दिशः पूरयत्येव ।

अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मालाकारेण प्रस्तुतः कश्चिद्राजा गम्यते, बकुलेन च कश्चिद्गुणवान् सेवकः । शिखरिणी वृत्तम् ॥ ३१ ॥

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ।
एकः किंतु मनागयं जनयति स्वान्ते ममाधिज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥३२॥

मूलमिति॥ हे तरुपते वृक्षराज । तव मूलं । अतीव अत्यन्तम् । स्थूलं महत् । तथा बन्धनदृढं बन्धनेन वेष्टनेन दृढं अचलम् । शाखाः शतं शतशः बहुत्वं इत्यर्थः तथा मांसला पुष्टाः । दुर्गमहीधरे दुर्गं दुःखेन गन्तुं शक्यः महीधरः पर्वतः,तस्मिन् । वासः स्थितिः । इत्थम् । तव कुत्र कस्मात् । भीतिः भयम् । किंतु । ज्वालालीवलयीभवन् ज्वालानां शिखानां आलीभिः पङ्क्तिभिः वलयीभवन् मण्डलीभवन् । अयं एकः । अकरुणः निर्दयः । घस्मरः भक्षकः । दावानलः वनवह्निः । मम स्वान्ते मानसे । आधिज्वरं आधेः चिन्तायाः ज्वरं सन्तापम् । मनाक् ईषत् । जनयति उत्पादयति । दृढमूलस्य शाखापरिवृतस्य पर्वतोपरिस्थितस्य वृक्षस्य न किंचिद् भयकारणं पश्यामः केवलं सर्वभक्षकोऽयं ज्वालामंडलैः सर्वतः परिवृण्वन् वनवह्निरस्माकं चेतसि चिन्तामुत्पादयतीति—कुत्योक्तिः । अन्योक्तिस्तु—सर्वथा सुरक्षितस्य सर्वसुखोपेतस्यापि नरस्य कुतोऽप्यकस्मात् भयमुत्पद्यते । अप्रस्तुतप्रशंसालङ्कारः अत्राप्रस्तुतेन तरुपतिना प्रस्तुतः कश्चित्सर्वथा सुरक्षितो गम्यते, दावानलेन चाकस्मिकी विपत्तिः । शार्दूलविक्रीडितं वृत्तम् ॥३२॥

ग्रीष्मे भीष्मतरैः[1] करैर्दिनकृता दग्धोऽपि यश्चातक-
स्त्वां ध्यायन् घन वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवालोचनगोचरेण भवता तस्मिन्निदानीं यदि[2]
स्वीचक्रे करकानिपातन[3]कृपा तत्कं प्रति ब्रूमहे ॥३३॥

१ बा०–ग्रीष्मतरैः २. प०–A. F.अपि ३. प०–A. F °भिपातनकृपा°

ग्रीष्म इति ॥ हे घन मेघ । य चातकः । ग्रीष्मे निदाघे । भीष्मतरैः सरदायपेक्षया तीक्ष्णतरैः । करैः किरणैः कृत्वा । दिनकृता सूर्येण । दग्धोऽपि तप्तोऽपि । त्वां ध्यायन् चिन्तयन् । द्राघीयसः दीर्घतरान् ।

वासरान् दिवसान् । कथमपि अतिकाठिन्येन । नीतवान् गमितवान् । तृष्णाव्याकुलोऽपि अन्यतो जलं न जग्राह, किंतु त्वय्येव बद्धाशस्तथा— इत्यर्थः। तस्मिन् चातके। इदानीं दैवात् भाग्यात्। लोचनगोचरेण नयनपथमागतेन । भवता । यदि । करकानिपातनकृपा करकाणां वर्षोपलानां निपातनस्य प्रक्षेपणस्य कृपेति सोल्लुण्ठम् । स्वीचक्रे स्वीकृता । तत् तर्हि । कं प्रति वयं ब्रूमः । सूर्यस्य तीव्रकिरणैर्ग्रीष्मे सन्तापितोऽपि चातकोऽन्यस्याजलमगृह्णन् त्वय्येव बद्धाशोऽतिष्ठत्—एतादृशेऽपि त्वयके, हे मेघ, यदि करकावर्षणं कुरुषे, तर्हि कोऽन्यश्चातकहितकारी अस्माभिरन्वेष्टव्य इति मुख्योक्तिः । अन्योक्तिस्तु—अनन्यपरायणे सर्वथानुरक्ते भक्ते यदि कश्चित्समर्थः प्रभुः उपकारस्थानेऽनुपकारं करोति तर्हीतदनुचितम् । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मेघेन प्रस्तुतः कश्चित्समर्थः प्रभुर्गम्यते, चातकेन चानन्यभक्तः सेवकः । शार्दूलविक्रीडितं वृत्तम् ॥२३॥

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥२४॥

दवदहनेति ॥ अयि जलधर मेघ । दवदहनजटालज्वालजालाहतानाम् दवदहनस्य दावानलस्य जटालानां दीर्घाणां ज्वालानां शिखानां जालैः समूहैः आहतानाम् ताडितानाम्। परिगलितलतानां परिगलिता लता येभ्यः तेषाम्। भूरुहाणां वृक्षाणाम्। म्लायतां ग्लानिं प्राप्नुवतां सताम्। अनादरे षष्ठी। एतादृशान् वृक्षान् अनादृत्येत्यर्थः । शैलश्रेणिशृङ्गेषु शैलानां पर्वतानां श्रेणिः पङ्क्तिः तस्याः शृङ्गेषु शिखरेषु बहु प्रभूतं तोयं जलम् । वितरसि वर्षसि अयं कः । तावकीनः त्वदीयः । श्रीमदस्तावकीनः । अतीव निंदनीयोऽयं तव विकारः । दावानलदग्धा म्लायन्तो वृक्षा जलमपेक्षन्ते, किन्तु तानना-दृत्य यत् त्वं पर्वतशिखरेषु वर्षसि तन्महदनौचित्यं तवेति मेघं प्रति कस्यचिदुक्तिरिति—मुख्योक्तिः । अन्योक्तिस्तु—पात्रे दानमुचितम्, किन्तु सत्यपि विपद्ग्रस्ते अत एव सुतरां साहाय्ययोग्ये पात्रे धनगर्वगर्विता अपात्रे धनं विसृजन्ति तदतीवानुचितमिति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन

वृक्षेण प्रस्तुत कश्चिद्दुष्टो गम्यते, मेघेन च बलगर्वगर्वित । मालिनी वृत्तम् ॥ ३४ ॥

शृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः ।
विश्वार्तिवारणसमर्पितजीवनोऽयं
नाकर्णितः किमु सखे भवताम्बुवाहः ॥३५॥

शृण्वन्निति ॥ रे पान्थ पथिक । हन्तेति खेदे । अस्य मेघस्य । पुरः अग्रे वर्तमानं । परुषगर्जितं दुःसहं गर्जनाम् । शृण्वन् । मनाक् ईषत् । अपि । विह्वलमना व्याकुलचित्तः । न स्याः मा भूः । हे सखे । भवता । अयम् । विश्वार्तिवारणसमर्पितजीवनः विश्वस्य सर्वस्य जगतः आर्तेः पीडायाः वारणाय अपहरणाय समर्पितं दत्तं जीवनं जलं पक्षे प्राणाः येन स अम्बुवाहः येन । न आकर्णितः न श्रुतः । किमु । अपि तु श्रुत एवेत्यर्थः । हे पथिक अस्य मेघस्य कठोरगर्जनां श्रुत्वा व्याकुलचित्तो मा भूः, किं त्वया न श्रुतं यदेष संसारसंतापहरणाय स्वजलं वर्षति—इति मुख्योक्तिः । अन्योक्तिस्तु—हे वाचक, आपाततः कटुरप्ययं दयालुरेव दाता, असौ स्वप्राणदानेनापि परसंतापहरणे सर्वदा प्रस्तुत इति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन मेघेन प्रस्तुतः कश्चित् प्रत्यक्षकटुः किन्तु दयार्द्रहृदयो दाता गम्यते । वसंततिलका वृत्तम् ॥ ३५ ॥

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं तु[1] लोकोत्तरं
कीर्तिः किं च दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानिमान् निगिरति श्रीखण्ड ते सुन्दरान्
उज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥३६॥

[1] वा०—तु

सौरभ्यमिति ॥ हे श्रीखण्ड चन्दन । ते सौरभ्यं परिमलः । भुवनत्रये लोकत्रये । अपि । विदितं ज्ञातं प्रसिद्धमित्यर्थः । शैत्यं संतापहारकं शीतलत्वं तु । लोकोत्तरं अलौकिकम् । किं च । ते कीर्तिः यशः । दिगङ्गनाङ्गणगता दिशः पूर्वाद्याः एव अङ्गनाः स्त्रियः तासां अङ्गणं चत्वरं तत्र गता सर्वदिग्व्यापिनीत्यर्थः । किंतु । एतत् एकं दोषसूचकं वचः शृणु ।

इयं ते कोटरेषु । गरलज्वालां विषज्वालां । उज्झन्ती त्यजन्ती । द्विजिह्वावली द्विजिह्वानां सर्पाणां अवली पंक्ति । सर्वान् एव सुन्दरान् गुणान् । खलु निश्चयेन । निगिरति ग्रसति । हे चन्दन, त्वयि सौरभ्यशैत्यादयो गुणा विद्यन्ते, सर्वत्र च प्रसिद्धोऽसि, किन्तु मेव विषमुद्गमन्ती सर्पावली त्वया स्वकोटरे स्थापिता सा सर्वानपि ते गुणान् लोपयतीति—मुख्योक्ति । अन्योक्तिस्तु—रम्यत्वादिगुणैः सर्वत्र ख्यातकीर्तिरपि दुष्टजनाश्रयदानेन महदनौचित्यं करोषीति गुणवन्तं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः अत्राप्रस्तुतेन चन्दनेन प्रस्तुतः कश्चिद्गुणवानपि खलजनाश्रयदाता गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

नापेक्षा[1] न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः ।
तथापि हरते तापं लोकानामुन्नतो घनः ॥३७॥

[1] ख०—नापेक्ष्य.

नापेक्षेति ॥ अपेक्षा प्रत्युपकारादिवाञ्छा । न विद्यत इति शेषः । न च दाक्षिण्यं परचित्तानुवर्तनम्—अन्युत्तरावस्तु 'दाक्षिण्यं समुद्रोदकमादाय दातृत्वात्स्वतः सामर्थ्यमपि नास्तीत्यर्थः' न प्रीतिः स्नेहः । न च संगतिः सहवासश्चापि नास्ति । तथापि उन्नतः उच्चः, पक्षे उदारधीः । घनः मेघः । लोकानां तापम् । हरते अपाकरोति । योऽयं उच्चदेशस्थो मेघो जनानां संतापमपहरति,न तस्य लोकैः सह कापि मैत्री न च तेभ्यः किमपि वाञ्छति-इति मुख्योक्तिः । अन्योक्तिस्तु—उदाराः पुरुषाः विनापि प्रत्युपकारादिवाञ्छां निस्वार्थमेव च परहितमाचरन्तीति । अत्र विभावनालङ्कारः, अप्रस्तुतप्रशंसा च । विनापि कारणं यत्र कार्योत्पत्तिः सा विभावना—अत्रापि विनापि अपेक्षां मेघः तापं हरति । विभावनालक्षणं च 'क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना' इति । अत्राप्रस्तुतेन मेघेन प्रस्तुतः कश्चिन्निरपेक्षः परोपकारी गम्यते । उभयोरालङ्कारयोः संसृष्टिः । अनुष्टुभ्वृत्तम् ॥ ३७ ॥

[1]समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं[2]
निवासः[3] पद्मायाः सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥३८॥

१. ख०—F. reads the first line thus—समुत्पत्तिः पद्मारमणपदपङ्क' मलनखात् । २. ख०—F. G निवसतिः । ३ ख०—C. E. H. निलास .

समुत्पत्तिरिति ॥ हे अम्बुज कमल तव स्वच्छे निर्मले । सरसि तडागे । समुत्पत्तिः उद्भवः । एतेन निर्मलकुलोत्पत्तिः सूच्यते । हरिहस्ते हरेः विष्णोः हस्ते । निवसनं निवासः । विष्णोः शङ्खचक्रगदापद्मधारित्वात् । यद्वा-हरेः सूर्यस्य हस्त किरणे निवसनं विकासरूपा स्थितिः । सूर्योदये कमलानां विकसनात् । पद्मायाः लक्ष्म्याः निवासः वासस्थानम् । परिमलः मनोहरगन्धः । सुरहृदयहारी देवानां मनोहरणशीलः । एतैः पूर्वोक्तैः अन्यैरपि कामिनीमुखताडयादिभिः गुणैः ललितस्य सुन्दरस्य । तव । यदि द्विजोत्तंसे पक्षिश्रेष्ठे हंसे—ब्राह्मणे च गम्यते । रतिः प्रीतिः । तर्हि इयं तव अतीव उन्नतिः उत्कृष्टता भवतीति शेषः । हे कमल, स्वच्छे तडागे समुत्पन्न, विष्णुहस्तनिवासी, लक्ष्मीनिवासस्थान तथा देवानामपि मनो हरसि स्वगन्धेन—सत्स्वप्येतादृशेषु गुणेषु यदि हंसेष्वादरं दर्शयसि तर्हि सुतरां प्रशंसनीयस्त्वमिति—मुख्योक्तिः । अन्योक्तिस्तु—श्रेष्ठकुलोत्पन्नत्वादिगुणविशेषैर्युक्तो नरो यदि ब्राह्मणभक्तोऽपि तर्हि सुगन्धयुक्तसुवर्णवत् सुतरां प्रशंसनीयः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन कमलेन प्रस्तुतः कश्चित् सद्गुणोपेतो नरो गम्यते । केचित्तु—'समुत्पत्तिः पद्मारमणपदपद्मामलनखात्' इति प्रथमं पादं पठन्ति । गंगालहरीस्थस्य (२१) 'समुत्पत्तिः पद्मा' इत्यादिपद्यस्य प्रथमपादविनिमयजन्या भ्रान्तिरियम् । अस्य पाठस्य त्रासंगतत्वात् । । शिखरिणी वृत्तम् ॥३८॥

साकं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमा[1]
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमपि[2] च प्रौढिं परामुन्नतेः
किं निंदान्यथवा स्तवानि[4] कथय क्षीरार्णव त्वामहम् ॥३९॥

१ बा०-बालार्कबिम्बोपमा २. प०-A F अथ. ३. प०-H निन्दामि. ४. प०-A. स्तवीमि and H. स्तवामि

साकमिति ॥ हे क्षीरार्णव हे पयोधे । तव तीरे । ग्रावगणैः पाषाणखण्डसमूहैः । साकं अर्कबिम्बोपमाः अर्कस्य सूर्यस्य बिंब मंडलः उपमा येषां ते सूर्यमंडलवदीप्ताः । मणयः लुठन्ति—इतस्ततो विकीर्णा इत्यर्थः । नीरे जले च । नीरचरैः मत्स्यादिभिर्नीचैः जलचरैः । समं सह । भगवान्

नारायणः विष्णुः । निद्राति शेते । एवं तव अविवेकं मणिपाषाणयोरेकत्र विकीर्णत्वात् विचारराहित्यम् । अपि च उन्नतेः महत्त्वस्य । परां उत्कृष्टां प्रौढिं गुरुत्वं—नारायणाश्रयभूतत्वात् च वीक्ष्य दृष्ट्वा । अहं त्वां किं निन्दामि अथवा स्तवानि प्रशंसानि इति कथय ब्रूहि । हे समुद्र, तव तीरे मणयः पाषाणखण्डाश्च एकत्रैव विकीर्णाः, त्वदन्तश्च सकललोकपूज्यो भगवान् शेते, एवं विवेकराहित्यं उन्नतत्वं चेत्युभयमपि त्वयि दृष्ट्वा—निन्दां करोमि स्तुतिं वेति न जानेऽहमिति—मुख्योक्तिः । अन्योक्तिस्तु—नीचे महति च समदृष्टित्वात् त्वं वर्णनातीत इति सत्पुरुषं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन समुद्रेण प्रस्तुतः कश्चित्समदर्शी गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

किं खलु रत्नैरेतैः किं पुनरभ्यायितेन[1] वपुषा ते ।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥४०॥

[1] प०—A. F. किं खलु रत्नायितेन.

किमिति ॥ हे अर्णव समुद्र । एतैः परिदृश्यमानैः रत्नैः किं फलम् । ते अभ्यायितेन अभ्रवन्मेघवदाचरितेन तद्वत् स्निग्धेनेत्यर्थः वपुषा शरीरेण । च किं फलम् । उभयमपि निष्प्रयोजनमेवेत्यर्थः । यत् यस्मात् तावकं तव । सलिलं जलं अपि । तृषितानां पिपासाकुलानाम् । वदनं मुखम् । न प्रयाति न गच्छति । हे समुद्र तव रत्नानि सुन्दरं शरीरं चेत्युभयमपि निष्फलम्, यतस्तव जलं अपि लोकानां पिपासापहरणे असमर्थमिति—मुख्योक्तिः । अन्योक्तिस्तु—यदि ते धनं अल्पमपि परोपकारं कर्तुमसमर्थं तर्हि महता ते धनेन सुन्दरेण च शरीरेण किं फलमिति कस्यचित् धनिकं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन समुद्रेण प्रस्तुतः कश्चिदनुपयुक्तधनो गम्यते । गीतिवृत्तम् ॥ ४० ॥

इयत्या संपत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि[1] कासार सदृशः ।
निदाघे चण्डांशोः[2] किरति परितोऽङ्गारनिकरा[3]—
स्त्वशीभूतः केषामहह परिहर्तासि खलु ताम् ॥४१॥

१ प०—A. यदि हरसि and F परिहरसि. २ प०—F चण्डांशोः, ३ का—प०—°निकर.

इयत्यामिति ॥ हे कासार तडाग । अधुना त्वं सलिलानां जलानां इयत्यां सपत्तौ समृद्धौ । अपि । आर्तानां पीडितानां तृष्णयेति शेषः । तृष्णां पिपासां । यदि सहसा न हरसि न निवारयसि । तदा । निदाघे ग्रीष्मे । चण्डांशौ सूर्य । अङ्गारनिकरान् अङ्गारवत् दाहकान् किरणसमूहान् । परितः सर्वतः । किरति क्षिपति सति । कृशीभूतः जलस्य शोषणेन कृशतामापन्न । केषां खलु तां तृष्णां । परिहर्तासि अपनेष्यसि । केषांचिदपि पिपासां परिहर्तुं न शक्ष्यसीति भावः । अहह इतिखेदे । प्रभूतजलसम्पूर्णोऽपि यदि पिपासाकुलानां पीडां न नाशयसि तर्हि ग्रीष्मे जलाभावात् शुष्कस्य केषां तृषामपनेष्यसीति सरोवरं प्रति कस्यचिदुक्तिः—इति मुख्योक्तिः। अन्योक्तिस्तु—प्रभूतधनधान्यसमृद्धोऽपि यदि त्वमधुना पीडितानां साहाय्यं नाचरसि, तर्हि दैवकोपात् क्षीणवित्तः कस्य सहायतां करिष्यसीति धनिकं प्रतिकस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन कासारेण प्रस्तुतः कश्चिद् व्ययमकुर्वाणो धनवान् गम्यते । शिखरिणी वृत्तम् ॥ ४१ ॥

अयि रोषमुरीकरोषि नो चे-
त्किमपि त्वां प्रति वारिधे वदामः ।
जलदेन तवार्थिना विमुक्ता[1]-
न्यपि तोयानि महान्न हा जहासि ॥ ४२ ॥

१ ब-आपमुक्तानि.

अयीति ॥ हे वारिधे समुद्र । रोषं कोपम् । नो उरीकरोषि न स्वीकरोषि कुपितो न भवसि । चेत् यदि । त्वां प्रति किमपि हितं किन्तु कटु । वदामः उपदिशामः । तव अर्थिना याचकेन । जलदेन मेघेन । विमुक्तानि वृष्टानि तोयानि जलानि । महान् अपि सन् । न जहासि न त्यजसि । हा इति खेदे । त्वत्तो जलं गृहीत्वा मेघोऽन्येभ्यो ददाति, त्वं तु, हे समुद्र, तेभ्यः पुनर्गृह्णासि, अतीवानुचितमेतदिति समुद्रं प्रति कस्यचिदुक्तिरिति—मुख्योक्तिः । अन्योक्तिस्तु—याचकाय दत्तं धनं, तेन याचकेन अन्येभ्यः प्रतिपादितं त्वं पुनर्गृह्णासि—इति कृपणं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन समुद्रेण प्रस्तुतः कश्चित् कृपणो गम्यते । मालभारिणी वृत्तम् । तल्लक्षणं च—' सरजा. प्रथमे पदे गुरू चेत् । सभरा येन च मालभारिणी स्यात् ' इति ॥ ४२ ॥

न धारयामो भवतीं विशन्तीं वर्षानदि स्रोतसि जह्नुजायाः ।
न युक्तमेतत्तु पुरो यदस्यास्तरङ्गभङ्गान्[1] प्रकटीकरोषि ॥४३॥

१. प–E तरंगलीलाम्.

नेति ॥ हे वर्षानदि—एतेन क्षणिकैश्वर्यत्वं सूचितं—ग्रीष्मे जलाभावात् । भवतीं त्वां । जह्नुजायाः जाह्नव्याः गङ्गायाः । स्रोतसि प्रवाहे । विशन्तीं प्रविशन्तीम् । वयं न धारयामः निषेधामः । एतत् वक्ष्यमाणम् । तु न युक्तं नोचितम् । यत् अस्याः आश्रयदायिन्याः भागीरथ्याः । पुरः अग्रे । तरङ्गभङ्गान् तरङ्गाणां भङ्गान् कौटिल्यानि—एतेन अहंकारजन्या भ्रूभेदा ध्वन्यन्ते प्रकटीकरोषि आविष्करोषि । हे वर्षाप्रवृद्धजले नदि गङ्गाया आश्रय यदि गृह्णासि तर्हि नात्र कश्चिद्दोषः, किन्तु तत्र कुटिलतरंगाणामाविष्करणमयुक्तमिति नदीं प्रति कस्यचिदुक्तिरिति—मुख्योक्तिः । अन्योक्तिस्तु—महतामाश्रयग्रहणे न कश्चिद्दोषः, किन्तु तेषामग्रेऽहंकारप्रदर्शनमतीवानुचितमिति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतया नद्या प्रस्तुतः कश्चिदाश्रयदातुः पुरतोऽहंकार दर्शयन् गम्यते । उपजातिवृत्तम् ॥ ४३ ॥

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्रातसमुज्झितानि कुसुमान्याजघ्रिरे निर्जरैः ।
तस्मिन्नद्य मधुव्रते विधिवशान्माध्वीकमाकाङ्क्षति
त्वं चेदञ्चसि लोभमम्बुज तदा किं त्वां प्रति ब्रूमहे ॥४४॥

पौलोमीति ॥ हे अम्बुज पौलोमीपतिकानने पौलोमी शची तस्याः पतिः इन्द्रः तस्य कानने वने नन्दने इत्यर्थः । विलसतां शोभमानानाम् । गीर्वाणभूमीरुहां भूम्यां रोहन्तीति भूमीरुहाः वृक्षाः गीर्वाणानां देवानां भूमीरुहाः देववृक्षाः कल्पवृक्षा इति यावत् । येन मधुव्रतेन भ्रमरेण । आघ्रातसमुज्झितानि पूर्वं आघ्रातानि पश्चात् समुज्झितानि त्यक्तानि उच्छिष्टानीत्यर्थः । कुसुमानि पुष्पाणि । निर्जरैः देवैः । आजघ्रिरे घ्रातानि आस्वादितानीत्यर्थः । अद्य विधिवशात् दैवकोपवशात् । तव माध्वीकं मधु । आकाङ्क्षति वाञ्छति सति । त्वं लोभं कृपणताम् । अञ्चसि गच्छसि । तदा त्वां प्रति किं ब्रूमहे किं कथयामः । हे कमल, यद्भुक्तोज्झितानि कल्पतरुपुष्पाणि देवैरप्यास्वाद्यन्ते स भ्रमरस्त्वां मधु याचते सेत्यथा लोभो न कार्य इति भ्रमरं प्रति

कस्यचिदुक्तिरिति–मुख्योक्तिः । अन्योक्तिस्तु–दानयोग्ये सत्पात्रे धनलोभं कुर्वन्तं कृपणं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन भ्रमरेण प्रस्तुतः कश्चित् दानयोग्यो गम्यते, भ्रमरेण च कृपणः । शार्दूलविक्रीडितं वृत्तम् ॥ ४४ ॥

भुक्ता मृणालपटली भवता निपीता–
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥४५॥

भुक्तेति ॥ रे राजहंस ! यत्र सरोवरे । भवता मृणालपटली मृणालस्य बिसस्य पटली संघः । भुक्ता आस्वादिता । अम्बूनि जलानि निपीतानि । तथा च नलिनानि पद्मानि । निषेवितानि उपभुक्तानि । तस्य सरोवरस्य केन कृत्येन कर्मणा । कृतोपकारः कृतः उपकारः येन सः । भवितासि भविष्यसि । इति वद् ब्रूहि । हे राजहंस यस्मात्सरोवरादुपकारस्त्वया प्राप्तवानसि तस्य कथं प्रत्युपकारं करिष्यसीति राजहंसं प्रति कस्यचिदुक्तिरिति –मुख्योक्तिः । अन्योक्तिस्तु–कृतसहस्रोपकारस्य प्रत्युपकारं कर्तुमसमर्थं प्रति कस्यचिदुक्तिरियम् । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन राजहंसेन प्रस्तुतः कश्चिदुपकृतो गम्यते । वसंततिलका वृत्तम् ॥ ४५ ॥

प्रारंभे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी–
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामञ्चति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥४६॥

प्रारंभ इति ॥ हे चञ्चरीक भ्रमर । कुसुमाकरस्य वसन्तस्य प्रारंभे । यस्य रसालशाखिनः आम्रवृक्षस्य । उल्लसन्मंजरीपुंजे उल्लसन्त्यः विकसन्त्यः या मञ्जर्यः कुसुमस्तबकास्तेषां पुञ्जे राशौ । परितः सर्वतः । मञ्जुलगुञ्जितानि मञ्जुलानि मनोहराणि गुञ्जितानि । रचयन् कुर्वन् । तान् अवर्णनीयान् । उत्सवान् महान् । आतनोः अरचयः । अद्य । दैवात् प्रतिकूलभाग्यात् । तस्मिन् रसालशाखिनि आम्रवृक्षे । कृशां हीनाम् । दशां अवस्थां । अञ्चति गच्छति सति । त्वं विनयं दाक्षिण्यं । मुञ्चसि चेत् तर्हि त्वदन्यः

कः नीचः अस्ति । न कोऽपीत्यर्थः । हे भ्रमर, सम्पद्दावस्थायां लाजाक्षस्य तत्र महान्तमुपभोगमकरोः, अथ दैवाद्दुर्दशामापन्ने तस्मिन्नाशे यदि त्वमनादरं दर्शयसि तर्हि नीचतमोऽसीति भ्रमरं प्रति कस्यचिदुक्तिरिति–मुख्योक्तिः । अन्योक्तिस्तु–यस्य सम्पदावस्थायां आनन्दोपभोगः कृतस्तस्मिन् विषये अनादरं दर्शयन्तं कंचित् कृतघ्नं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन भ्रमरेण प्रस्तुतः कश्चित्कृतघ्नो गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ४६ ॥

एणीगणेषु गुरुगर्वनिमीलिताक्ष[1]
किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।
सीमामिमां[2] कलय भिन्नकरीन्द्रकुम्भ-
मुक्तामयीं हरिविहारवसुंधरायाः ॥४७॥

१.बा०–°निमीलिताक्ष । प०–H. निमिलिताक्षम् । २.प० H शोभानिमाम् ।

एणीगणेष्विति ॥ हे कृष्णसार मृगविशेष । गुरुगर्वनिमीलिताक्ष गुरुणा महता गर्वेण कस्तूर्यभिमानेन निमीलिते अक्षिणी यस्य सः । अस्मिन् कानने वने । एणीगणेषु एणीनां मृगीणां गणेषु समूहेषु । किं खलु खेलसि । इमां स्वक्रीडाभूमिम् । हरिविहारवसुंधरायाः हरेः सिंहस्य विहारस्य क्रीडायाः वसुधरायाः भूमेः । भिन्नकरीन्द्रकुम्भमुक्तामयीं भिन्नाः पाटिताः विदारिताः वा करीन्द्राणां गजेन्द्राणां कुम्भाः कपोलाः तेषां या मुक्ता मौक्तिकानि तैः पूर्णाम् । सीमां मर्यादाम् । कलय अवधारय । हे हरिण यत्र त्वमभिमानभरितो रमसे, सेयं हस्तिकपोलविदारणक्षमस्य सिंहस्य क्रीडाभूमिरिति हरिणं प्रति कस्यचिदुक्तिरिति–मुख्योक्तिः । अन्योक्तिस्तु–तेजस्विविहारयोग्ये स्थले न क्षुद्रैर्भवं कार्यं इति । अप्रस्तुतप्रशंसालङ्कारः अत्राप्रस्तुतेन मृगेण प्रस्तुतः कश्चित् क्षुद्रो गम्यते, सिंहेन च तेजस्वी . वसंततिलका वृत्तम् ॥ ४७ ॥

जठरज्वलनज्वलताप्यपगतशङ्कं समागतापि पुरः ।
करिणामरिणा हरिणा हरिणाली हन्यतां नु कथम् ॥४८॥

जठरेति ॥ करिणा गजाना । अरिणा शत्रुणा नाशकेनेति यावत् । साभिप्रायमिदं विशेषणम् । जठरज्वलनज्वलता जठरस्य उदरस्य ज्वलनः

अग्निः तेन ज्वलता दहनेन । अपि–अत्यन्तबुभुक्षितेनापीत्यर्थः । अपगतशङ्कं अपगता शङ्का भीतिः यस्मिन् कर्मणि यथा स्यात्तथा । पुरः अग्रतः । समागता समायाता । अपि । हरिणाली मृगपङ्क्तिः । कथं हन्यताम् । नु इति वितर्के । अतिबुभुक्षितोऽपि सिंहः पुरः आगतान् मृगानतुल्यबलतया नैव हन्तीति–मुख्योक्तिः । अन्योक्तिस्तु–व्यसनपतिता अपि तेजस्विनो हीनबलान्नाक्रमन्त इति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सिंहेन प्रस्तुतः कश्चिदतुलपराक्रमः पुरुषो गम्यते, मृगैश्च हीनबला नराः । आर्या वृत्तम् ॥ ४८ ॥

येन भिन्नकरिकुम्भ[1]विस्खलन्मौक्तिकावलिभिराश्रिता मही ।
अद्य तेन हरिणान्तिके कथं कथ्यतां नु हरिणा पराक्रमः ॥४९॥

[1] बा०—"कुम्भनिषजात्"

येनेति ॥ येन । हरिणा सिंहेन । भिन्नकरिकुम्भविस्खलन्मौक्तिकावलिभिः भिन्नाः विघटिताः ये करिकुम्भाः गजकपोलाः तेभ्यो विस्खलन्ति पतन्ति मौक्तिकानि तेषां अवलिभिः पङ्क्तिभिः । मही पृथ्वी । आश्रिता पूजिता अलंकृतेति यावत् । तेन हरिणा अद्य । हरिणान्तिके हरिणानां समीपे । स्वकीयः पराक्रमः शौर्यं । कथं केन प्रकारेण । कथ्यतां नु केनापि प्रकारेण वक्तुं न शक्यत इत्यर्थः । यः सिंहः पूर्वं गजकपोलान्विदार्य स्वपराक्रमं दर्शितवान्, अधुना दुर्दैवात् स क्षुद्रमध्यपतितः स्वकीयं पूर्वपराक्रमं असत्सु वर्णयितुमप्यसमर्थः इति–मुख्योक्तिः । अन्योक्तिस्तु–महापराक्रमशाली क्षुद्रबलेषु स्वविक्रमं प्रकाशयितुमसमर्थः इति। अप्रस्तुतप्रशंसालङ्कारः अत्राप्रस्तुतेन सिंहेन प्रस्तुतः कश्चिन्महापराक्रमो गम्यते। रथोद्धता वृत्तम्। तल्लक्षणं च–'रो नराविह रथोद्धता लगौ' इति ।

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥५०॥

स्थितिमिति ॥ रे मदान्धेक्षण मदेन गर्वेण अन्धे ईक्षणे नयने यस्य तत्सम्बुद्धौ । गजश्रेणीनाथ गजयूथपते । सखे मित्र । त्वं इह जटिलायां

लतादिबाहुल्येन निबिडायां । वनभुवि काननप्रदेशे । क्षणमपि । स्थितिं अवस्थानम् । मा दध्याः मा कुरु । अस्मौ कुम्भिभ्रान्त्या कुम्भिनाल करिणां भ्रान्त्या-गजोऽयमिति शङ्कया । खरनखरविदारितमहागुरुग्रावग्रामः खरा तीक्ष्णाः. ये नखराः. नखाः तैः विदारिताः विदारिताः महान्तः गुरवः अत्यन्तस्थूलाः ग्रावाणः पाषाणखण्डाः तेषां ग्रामः समूहो येन तादृश — तीक्ष्णनखविपाटितशिलाखण्ड । हरिपतिः सिंहराजः । गिरिगर्भे पर्वतकन्दरे स्वपिति । निद्राभङ्गे सिंहोऽयं हनिष्यति त्वां, हस्तिशक्या पर्वतानपि विदारयत्येषः, अतो गर्वं त्यक्त्वा क्षिप्रं दूरमितोऽपजेति करिणं प्रति कस्यचिदुक्तिरिति मुख्योक्तिः । अन्योक्तिस्तु—यावत् पराक्रमशाली शत्रुर्न पश्यति तावत् दुर्बलेन नरेण तत्स्थानं गर्वं च परित्यज्य दूरे पलायनं कर्तव्यम् । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन गजेन प्रस्तुतः कश्चिद् दुर्बलो नरो गम्यते, सिंहेन च तेजस्वी रिपुः । शिखरिणी वृत्तम् ॥ ५० ॥

गिरिगह्वरेषु गुरुगर्वगुम्फितो
गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनंधयो
भविता करेणुपरिशेषिता मही ॥५१॥

गिरीति ॥ हे गजराजपोत करीन्द्रशिशो । गुरुगर्वगुम्फितः गुरुणा गर्वेण अभिमानेन गुम्फितः वेष्टितः, पूरित इति यावत् । गिरिगह्वरेषु पर्वतकन्दरेषु । कदापि न संचरेः भ्रमणं मा कुरु । यदि स्तनंधयः स्तनं धयते पिबति इति स्तनधयः स्तनपायी अपि । हरिशिशुः सिंहशावः । बुध्यते जागर्ति । तर्हि । मही पृथ्वी । करेणु परिशेषिता करेणवः हस्तिन्य एव परिशेषिता हननादवशेषिता यस्यां सा । शूरैः स्त्रीणामवध्यत्वात्—गजास्तु सर्वानेव हनिष्यत्यसौ सिंहशिशुः । भविता भविष्यति । हे हस्तिकलभ, पर्वतकन्दरासु निर्भीकेण न भ्रमितव्यम्, अन्यथा अत्यल्पतया अपि सिंहशिशुः अखिलान् गजानुन्मूलयिष्यति—इति मुख्योक्तिः । अन्योक्तिस्तु— तेजस्वी शत्रुः बालोऽपि सकलान् शत्रून् उन्मूलयितुं समर्थः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सिंहशिशुना प्रस्तुतस्तेजस्वी बालो गम्यते । मञ्जुभाषिणी वृत्तम् । तल्लक्षणं च—' सजसा जगौ भवति मञ्जुभाषिणी ' इति ॥ ५१ ॥

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्रापि निदधे ।
इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्ता कुसुमभर[1]सौरभ्यभरितम् ॥५२॥

[1] प०–H. कुसुमतति ।

निसर्गादिति ॥ निसर्गात् स्वभावात् । आरामे उपवने । तरुकुलसमारोपसुकृती तरूणां वृक्षाणां कुलस्य समूहस्य समारोपः संरोपणं तेन सुकृतं पुण्यं यस्यास्तीति । कृती कुशलः । अपि । मालाकारः उद्यानपालकः । कुत्रापि उपवनस्य यस्मिन् कस्मिन्नपि प्रदेशे । बकुलं तन्नामकं वृक्षं । निदधे स्थापितवान् । कुशलोऽपि बकुलवृक्षमितरवृक्षवत्र कुत्रापि निक्षिपेत्यर्थः । एतेनास्य विवेकराहित्यं सूचितम् । इदं पुनः को जानीते यत् कोणान्तरगतः उद्यानैकदेशे स्थितः । अपि । अयं बकुलः । इह । जगज्जालं विश्वमण्डलं । कुसुमभरसौरभ्यभरितं कुसुमानां यो भरः अतिशयः तस्य सौरभ्येण सुगन्धेन भरितं पूर्णम् । कर्ता करिष्यति । यद्यपि विवेकशून्यो मालाकार उद्यानस्य कोणे बकुलं निक्षिप्तवान्, तथाप्यसौ बकुलः स्वपुष्पपरिमलैः जगत्पूरयति–इति । मुख्योक्तिः । अन्योक्तिस्तु—विवेकहीनैरविशिष्टस्थाने स्थापितोऽपि गुणवान्नरः स्वगुणैरात्मसौभाग्यं प्रकटयति । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन बकुलेन प्रस्तुतः कश्चिद् गुणवान् गम्यते । शिखरिणी वृत्तम् ॥ ५२ ॥

यस्मिन् खेलति[1] सर्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिङ्गलाङ्गकवलीकारक्रियाकोविदः
क्रीडे क्रीडतु कस्य केलिकलहत्वस्कार्णवो राघवः ॥५३॥

[1] प०, वै०, बा०–वेलति which means चलति.

यस्मिन्निति ॥ यस्मिन् राघवे । खेलति क्रीडति सति । हरिद्दन्तावलाः हरिता दिशां दन्तावलाः गजाः दिग्गजा इति यावत् । सर्वतः समन्तात् । परिचलत्कल्लोलकोलाहलैः परिचलन्तः प्रसरन्तः कल्लोलाः तरङ्गाः तेषां कोलाहलैः । हृदि मनसि । मन्थाद्रिभ्रमणभ्रमं मन्थाद्रेः मन्दरपर्वतस्य भ्रमणं

विलोडन तस्य भ्रम इङ्गाम् । वेदिरे प्राप्तु । सः अयं । तुङ्गतिमिङ्गलाङ्गकवलीकारक्रियाकोविद- तुङ्गानां महतां तिमिगलानां मत्स्यविशेषाणां अङ्गानां गात्राणां कवलीकारे ग्रासीकरणे या क्रिया तस्यां कोविद चतुर । 'अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायत । तिमिंगिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव' इति वचनात् । राघवः मत्स्यभेद । केलिकलहत्यक्तार्णव- केलौ क्रीडायां कलह विरोध तेन त्यक्त अर्णव समुद्र येन । कस्य क्रोडे भुजमध्ये । क्रीडत । न कस्याप्यन्यस्य क्रोडे राघवाश्रयदाने समर्थ । यस्य महामत्स्यस्य क्रीडनमात्रेण पुनः समुद्रमथनभ्रमो जायते, स यदि कौतुकेन समुद्रत्यजेत्तर्हि कोऽन्यस्तदाश्रयदाता भवितु योग्य इति-मुख्योक्तिः । अन्योक्तिस्तु—महानेव महते आश्रय दातु समर्थो भवति, नान्य । अप्रस्तुतप्रशंसालंकार । अत्राप्रस्तुतेन राघवेण प्रस्तुत कश्चिन्महापुरुषो गम्यते । पद्मिनि रमणाचरे (पृ० ४०३) अप्रस्तुतप्रशंसायामुदाहृतम् । तत्र 'हरिद्भावला ।' इत्यस्य स्थाने 'हरिद्भूथाधिपा' इति पठ्यते । 'तुङ्गतिमिंगिल' इत्यादिस्थाने च 'तुङ्गतिमिङ्गिलाङ्गगिलनव्यापारकौतूहल' इति पाठभेद । अस्यार्थश्च—गिलनं ग्रासः तस्य व्यापारे कर्मणि कौतूहल परिश्रमाभावो यस्य । 'केलिकलह' इत्यादिस्थाने च 'केलिरभस' इत्यादि पठ्यते । रभसेन वेगेनेत्यर्थ । शार्दूलविक्रीडित वृत्तम् ॥ ५३ ॥

लूनं मत्तगजैः[1] कियत्कियदपि च्छिन्नं तुषारार्दितै-
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयन्ती[2] दिशा
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥५४॥

[1]प०—मत्तमतङ्गजैः कियदपि. [2]प०—H आनन्दयन्ती

लूनमिति ॥ कानन वन । मत्तगजैः कियत् किंचिदित्यर्थः । लूनं छिन्न । तथा तुषारार्दितैः तुषारेण हिमेन अर्दितैः पीडितैः लोकैरिति शेषः । कियत् अपि इन्धनार्थं छिन्न खण्डितम् । शिष्टं अवशिष्ट च । ग्रीष्मजभीष्मभानुकिरणैः ग्रीष्मजः निदाघोद्भवः अतएव भीष्मः भयानकः भानुः सूर्यः तस्य किरणैः । भस्मीकृतं नीरसतामापादितं हा कष्ट । एषा कोणगता यथाकथंचिदवशिष्टा । परिमलैः गन्धैः । दिशः मुहुः वारवारम् ।

अमोदयन्ती सुरभयन्ती । ललिता शोभना । लवङ्गलतिका । दावाग्निना वनवह्निना । दह्यते । अनेकाभिर्विपत्तिभिर्ध्वस्यमाने वने यथाकथञ्चिदवशिष्टा लवङ्गलता आत्मनो गन्धैः सर्वा दिशः सुरभयति—परन्तु दुर्दैवशात् । दावाग्निस्तामपि भस्मसात्कुरुत इति—मुख्योक्तिः । अन्योक्तिस्तु—आत्मरक्षासमर्थो गुणवानपि दुर्दैववशाद्विपद्यत एव । अप्रस्तुतप्रशंसालंकारः । अत्राप्रस्तुतया लवङ्गलतिकया प्रस्तुतः कश्चिदापद्गतो गुणवान् गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

स्वर्लोकस्य शिखामणिः सुरतरुग्रामस्य धामाद्भुतं
पौलोमीपुरुहूतयोः परिणतिः पुण्यावलीनामसि ।
सत्यं नन्दन किं त्विदं सहृदयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खाण्डवरङ्गताण्डवनटो दूरेऽस्तु वैश्वानरः ॥ ५५ ॥

स्वर्लोकस्येति ॥ हे नन्दन देवोद्यान । त्वं स्वर्लोकस्य स्वर्गस्य । शिखामणिः चूडामणिः तद्वत् शिरोधार्यः अमरकूट इति यावत् । तथा । सुरतरुग्रामस्य कल्पवृक्षसमूहस्य । अद्भुतं विचित्रं । धाम स्थानं । असि तथा । पौलोमीपुरुहूतयोः पौलोमी इन्द्राणी शची पुरुहूतः इन्द्रः तयोः । पुण्यावलीनां बहूनां पुण्यानां । परिणतिः परिपाकः फलं इति यावत् । असि । इति सर्वं सत्यम् । किंतु तथापि । सहृदयैः सदाशयैः । विधिः ब्रह्मा । नित्यं । इदं प्रार्थ्यते याच्यते । यत् खाण्डवरङ्गताण्डवनटः खाण्डववनविशेषः स एव रङ्गः नर्तनस्थानं तत्र ताण्डवे उद्धततृत्ते नटः नर्तकः—खाण्डववन भस्मकारी । वैश्वानरः अग्निः । त्वत्तः दूरे अस्तु । सर्वप्रकाराद्भुतगुणसामग्रीविभूषितमपि नन्दनं वनं दावानलाद्भिभेत्येवेति—मुख्योक्तिः । अन्योक्तिस्तु—सर्वसुखोपेतस्यापि भयस्थानानि विद्यन्त एवेति । अप्रस्तुतप्रशंसालंकारः । अत्राप्रस्तुतेन नन्दनेन प्रस्तुतः कश्चिद् गुणवान् गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥५५॥

स्वस्तस्यापूतिमन्नमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटितारपुटो[1] यास्याम्यहं पञ्जरात् ।
एवं[2] कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यन्तः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥५६॥

[1].र० चञ्चूकोटिनिराकृतार्गलः । ना०–"कोटिविपाटितायसपुट । नि०–"विपाटितारलकुट । प०–A. " विपाटिताचिरपुटः, C. " विपाटितारकपुट" । [2].प० A. इत्थं.

स्वस्येति ॥ स्वस्वव्यापृतिमग्नमानसतया स्वस्य स्वस्य निजस्य व्यापृतिः व्यापारः तस्मिन् मग्न समासक्तं मानसं मनः तस्य भावः तया–निजकर्मासक्तचित्ततया । जने सन्निकटस्थे लोके । मत्तः मत्सकाशात् । निवृत्ते पराङ्मुखे अपक्रान्ते इत्यर्थः सति । चञ्चूकोटिविपाटितारपुट चञ्चवा कोट्या अग्रभागेन विपाटितं विदारितं तारपुटं कपाटयुगलं, पञ्जरद्वारमित्यर्थः, येन स. । अहं पञ्जरात् बहिः । यास्यामि गमिष्यामि–उड्डीयेति शेषः । एवं अनेन प्रकारेण । कीरवरे शुकश्रेष्ठे । मनोरथमयं साकल्पिकं न तु वास्तवं । पीयूषं अमृतं । आस्वादयति सति । वारणकराकारः वारणस्य गजस्य करः शुण्डादण्डः तस्य आकारः इव आकारो यस्य सः । फणिग्रामणीः फणिनां सर्पाणां ग्रामणीः नायकः श्रेष्ठ इति यावत् । अन्तः पञ्जरस्येति शेषः । संप्रविवेश सन्निकृष्टः जनः यदा असावधाना भविष्यन्ति तदैव पञ्जरं त्रोटयित्वा बहिर्भविष्यामि–इति यावच्छुको विचिन्तयति तावद् भीमकायः सर्पः पञ्जराभ्यन्तरं प्रविष्टवानिति–मुख्योक्तिः । अन्योक्तिस्तु–इह जगति लोका भावनामयानि भवनानि निर्माय सुखनिमग्ना भवन्ति किन्तु बहुशः आकस्मिकाः वज्रोपमा दुर्दैवविपाकास्तान् मध्य एव नाशयन्ति । अप्रस्तुतप्रशंसालंकारः । अत्राप्रस्तुतेन कीरवृत्तान्तेन प्रस्तुतः कश्चित्संसारी गम्यते । अलंकारश्चायं विषादनाम्नेन अलंकारेण अनुप्राणितः । तल्लक्षणं च 'अर्थापार्थविरुद्धलाभो विषादनम्' रसगंगाधरे (पृ. ५०६) । शार्दूलविक्रीडितं वृत्तम् ॥५६॥

रे चाञ्चल्यजुषो मृगाः श्रितनगाः कल्लोलमालाकुला–
मेतामम्बुधिकामिनीं व्यवसिताः संगाहितुं वा कथम् ।
अत्रैवोच्छलदम्बुनिर्भरमहावर्तैः समावर्तिता
यद्ग्रावेव[1] रसातलं पुनरसौ[2] यातो गजग्रामणीः ॥५७॥

[1] ना०–ग्राहेव । प०–AF ग्राहेण । C ग्रावेण. [2] प०–E. सरसं

रे इति ॥ रे चाञ्चल्यजुषः चाञ्चल्यं चपलत्वं जुषन्ते सेवन्ते इति ।

श्रितनगाः श्रितः आश्रितः नगः पर्वतः, यैः ते—पर्वतवासिन इत्यर्थः । मृगाः । कल्लोलमालाकुलां कल्लोलानां महोर्मीणां मालाभिः पङ्क्तिभिः आकुलां व्याप्तां। एतां पुरतो दृश्यमानां अम्बुधिकामिनीं अम्बुधेः समुद्रस्य कामिनीं स्त्रियां नदीमित्यर्थः । संगाहितुं प्रवेष्टुं । कथं वा केन कारणेन । व्यवसिताः उद्युक्ताः । यत् यस्मात् कारणात् । अत्रैव । उच्छलदम्बुनिर्भरमहावर्तैः उच्छलद् उद्गच्छद् अम्बुजलं तस्य निर्भरः आधिक्यं तेन महान्तः आवर्ताः जलभ्रमाः तैः । समावर्तितः इतः ततः भ्रामितः । असौ गजग्रामणीः गजश्रेष्ठः । पुनः । ग्रावा पाषाण इव । रसातलं पातालं । यातः—मग्न इत्यर्थः । अस्यां नद्यां करीन्द्रोऽपि जले मग्नः, अतस्त्वयापि युष्माभिरत्रावहागाहनचेष्टा न कार्येति मृगान् प्रति कस्यचिदुक्तिरिति—मुख्योक्तिः । अन्योक्तिस्तु महद्भिरप्यसाध्ये कर्मणि क्षुद्रचेष्टा न कार्या । अप्रस्तुतप्रशंसालंकारः । अत्राप्रस्तुतैर्मृगैः प्रस्तुताः केचनासमर्था नराः गम्यन्ते, करीन्द्रेण च कश्चित्समर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५७ ॥

पिब स्तन्यं पोत त्वमिह मद[1]दन्तावलिधिया
दृगन्तानाधत्से किमिति हरिदन्तेषु परुषान् ।
त्रयाणां लोकानामपि हृदयतापं परिहर-
त्ययं धीरं धीरं ध्वनति नवनीलो जलधरः ॥५८॥

[1] या० किल

पिबेति ॥ हे पोत शिशो सिंहस्येति शेषः । त्वं इह मदीयं स्तन्यं दुग्धं पिब । इति सिंहिन्याः स्वशिशुं प्रत्युक्तिः । मद्दन्तावलधिया मदीयाः तद्वन्तः ये दन्तावलाः गजाः तेषां धिया बुद्ध्या—इमे मत्ता गजा इति मन्यमानः । हरिदन्तेषु हरितां दिशां अन्तेषु भागेषु । किमिति कथं । परुषान् क्रोधेन तीक्ष्णान् । दृगन्तान् दृशोः नेत्रयोः अन्तान् कोणान्—कटाक्षानिति यावत् । आधत्से क्षिपसि । ननु । त्रयं । त्रयाणां लोकानां । हृदयपरितापं हृदयस्य ग्रीष्मादिजन्यं परितापं दुःखं। परिहरन् निवारयन् । नवनीलः नवश्चासौ नीलश्च । जलधरः मेघः । धीरं धीरं गम्भीरं यथा स्यात्तथा । ध्वनति गर्जति । हे शिशो क्रोधं मा कुरु, नेमे ते स्वभावैरिणो गजा अपि तु लोकत्रयतापहारी मेघोऽयं गर्जतीति सिंहिन्याः स्वशिशुं प्रत्युक्तिरिति—

मुख्योक्तिः । अन्योक्तिस्तु–तेजस्वी शैशवेऽपि स्वशत्रोराभासं न सहते । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सिंहशिशुना प्रस्तुतः कश्चिद्विशुद्धस्तेजस्वी गम्यते । शिखरिणी वृत्तम् ॥ ५८ ॥

धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः ।
उन्मदवारणबुद्ध्या मध्येजठरं समुच्छलति ॥५९॥

धीरेति ॥ हे नीरद मेघ । ते तव । धीरध्वनिभिः धीराः गम्भीराः ध्वनयः गर्जितानि तैः । अलं । गर्जना मा कुरु–इत्यर्थः । यतः मे मासिकः मासैकमात्रः । गर्भः । उन्मदवारणबुद्ध्या उन्मदाः मत्ताः ये वारणाः गजाः तेषां बुद्ध्या भ्रान्त्या । मध्येजठरं जठरस्य उदरस्य मध्ये । 'पारे मध्ये षष्ठ्या वा' इति समासः । समुच्छलति बहिरागमनाय समुच्चलति । रसगङ्गाधरे (पृ० ३११)अतिशयोक्तेरुदाहरणमेतत् । तथा चोक्तं तत्र– 'यत्रासंबन्धेऽपि संबन्धो वर्ण्योत्कर्षार्थः अत्र सिंहीवचने समुच्छलनासंबन्धेऽपि समुच्छलनसंबन्धोक्तिः शौर्यातिशायिका' । केचित्त्वत्राप्रस्तुतप्रशंसां मन्यन्ते । उपगीतिः वृत्तम् ॥ ५९ ॥

वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥६०॥

वेतण्डेति ॥ वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना वेतण्डानां गजानां गण्डाः कपोलाः तेषां कण्डूतिः घर्षणं तत्र यत्पाण्डित्यं नैपुणं तस्य परिपन्थिना विरोधिना । हरिणा सिंहेन । सिंहो हि गजानां हननेन न केवलं तेषां विरोधी अपितु कण्डूतियुक्तानां तेषां कपोलानामपि । हरिणालीषु मृगपंक्तिषु । कः पराक्रमः शौर्यं । कथ्यतां वर्ण्यताम् । पद्यमेतत् ४९ पद्येन समानार्थम् । अप्रस्तुतप्रशंसालङ्कारः । अनुष्टुप् वृत्तम् ॥ ६० ॥

नीरान्निर्मलतो जनिर्मधुरता रामामुखस्पर्धिनी[1]
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत्प्रीतिमुरीकरोषि मधुपे तत्त्वां किमाचक्ष्महे ॥६१॥

१ वै०–वामा°

नीरादिति ॥ हे अंभोरुह कमल । यस्य ते तव । निर्मलतः निर्मलात् ।

नीरात् जलात् । जनिः उत्पत्तिः । मधुरता मनोहरता । रामामुखस्पर्धिनी रामाणां स्त्रीणां मुखेन सह स्पर्धितुं शीलमस्या रमणीमुखसदृशीत्यर्थः । तथा हरेः विष्णोः । करे हस्ते । वासः वसति । परिमलः गन्धः च । गीर्वाणचेतोहरः गीर्वाणानां देवानां चेतसः हरः अपहारकः—देवानामपि मनांसि हरतीत्यर्थः । महाकविगिरां महाकवीनां गिरां वाणीनां । सर्वस्वं सर्वधनं स्वरूपं । कविभिः सर्वत्र कमलमुपमानतयाङ्गीक्रियते । तथा कामस्य च सर्वस्व–पञ्चसु अस्त्रेषु कमलस्य परिगणितत्वात् । तद्दो त्वं । मधुपे भ्रमरे, भवति इत्यपि ध्वन्यते । प्रीतिं स्नेहं । उरीकरोषि स्वीकरोषि । चेत् । त्वां किं । आचरामहे कथयामः । सर्वथा निन्दनीयमेतदित्यर्थः । हे कमल, उदात्तं ते कुलं निवासश्च ते श्रेष्ठः, देवानां मनोमोहकस्तथा महाकवीनां कामदेवस्य च सम्मानपात्रमसि तथापि यत्त्वं भ्रमरे स्निह्यसि तदतीवानुचितमिति कमलं प्रति कस्यचिदुक्तिरिति–मुख्योक्तिः । अन्योक्तिस्तु अखिलोत्कृष्टगुणोऽपि किन्तु नीचसहवासकारिणं प्रति कस्यचिदुक्तिः । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन कमलेन प्रस्तुतः कश्चिद्गुणवान् किन्तु नीचसहचारी गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ६१ ॥

लीलामुकुलितनयनं किं सुखशयनं समातनुषे ।
परिणामविषमहरिणा करिनायक[१] वर्धते वैरम् ॥६२॥

[१] प० C करिणायक

लीलेति ॥ हे करिनायक गजेन्द्र ! लीलामुकुलितनयनं लीलया विलासेन मुकुलिते अर्धनिमीलिते नयने यस्मिन् कर्मणि यथा स्यात्तथा । सुखशयनं सुखं आनन्दद शयनं निद्राम् । किं कथम् । समातनुषे करोषि । परिणामविषमहरिणा परिणामे अन्ते विषमः दुःसहः हरिः सिंहः तेन सह । वैरं वर्धते । हे गजेन्द्र किमिति सुखनिद्रामनुभवसि, निकटे प्रबलशत्रुः सिंहो जागर्तीति–मुख्योक्तिः । अन्योक्तिस्तु–प्रबलः शत्रुर्निकटे वर्तते, अतोऽसावधानेन न स्थातव्यमन्यथा महाभयशङ्केति कंचित् प्रति हितोपदेष्टुरुक्तिः । अप्रस्तुतप्रशंसालंकारः । अत्राप्रस्तुतेन करिनायकेन प्रस्तुतः कश्चित्प्रमत्तो नरो गम्यते । उपगीतिवृत्तम् ॥ ६२ ॥

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेत्ते पराञ्चन्ति द्विरदानां रदा इव ॥ ६३ ॥

विदुषामिति ॥ विदुषां पण्डितानां, न तु मूर्खाणां । वदनात् मुखात् । वाचः वचनानि । सहसा एकपदे । बहिः नो यान्ति गच्छन्ति । अविमृश्य न ते वदन्तीत्यर्थः । याताः बहिर्निर्गताः । चेत् । न पराञ्चन्ति परावर्तन्ते । द्विरदानां द्वौ रदौ दन्तौ यस्य सः द्विरदः गजः । तेषां रदाः दन्ताः । गजानां बहुत्वात् बहुवचनम् । इव । पण्डिता अविमृश्य न किञ्चिद्वदन्ति, यत्किञ्चिद्व गदन्ति तत् सर्वथा परिपालयन्तीत्यर्थः । उपमालङ्कारः । तल्लक्षणं च—'साधर्म्य-मुपमा भेदे' इति । अनुष्टुभ् वृत्तम् ॥६३॥

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः[1]
स्यादर्थिप्रवरार्थितार्पणविधावेको[2] विवेको यदि ॥६४॥

[1] प०—A F गुणा...सर्वोऽपि लोकोत्तर [2] बा०—स्यादर्थिप्रकरार्थितार्पणविधौ चैको.

औदार्यमिति ॥ औदार्यं बहुप्रदत्वं । भुवनत्रये लोकत्रये । अपि विदितं प्रसिद्धं । अम्भोनिधेः समुद्रात् । संभूतिः उत्पत्तिः । अपि विदिता । एवं नन्दनकानने नन्दनवने । वासः स्थितिः । तथा च । गीर्वाणचेतोहरः देवानां मनोमोहकः । परिमलः गन्धः । अपि विदित एव । एवं दातृगुरोः दातृषु वदान्येषु गुरुः श्रेष्ठः तस्य सुरतरोः कल्पवृक्षस्य । सर्वे अपि गुणाः । लोकोत्तराः अलौकिकाः । स्युः । यदि । अर्थिप्रवरार्थितार्पणविधौ अर्थिषु याचकेषु प्रवराः श्रेष्ठाः तेषां यत् अर्थितं, याचितं अथवा अर्थिनां प्रवरः उत्कृष्टः यत् अर्थितं, तस्य अर्पणविधौ दानप्रकारे । एकः विवेकः योग्यायोग्यविचारः । स्यात् । कल्पवृक्षस्य जन्मनिवासादयः सर्वेऽपि गुणा उत्कृष्टा भवेयुर्यदि योग्यायोग्यविवेकेन याचकानां मनोरथान् पूरयेदयमिति—मुख्योक्तिः। अन्योक्तिस्तु—नरस्य सत्कुलोत्पत्त्यादयो गुणास्तदैव शोभन्ते यदा याचकमनोरथपूरणादौ योग्यायोग्यविचारोऽपि तस्य स्यात् । अप्रस्तुतप्रशंसालङ्कारः । अत्राप्रस्तुतेन सुरतरुणा प्रस्तुतः कश्चित्सर्वगुणसम्पन्नः किन्तु विवेकहीनो नरो गम्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ६४ ॥

एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिन्त्य मात्ममनसि[1] व्याधानुतापं कृथाः ।
भूपानां भवनेषु किं च विमलक्षेत्रेषु गूढाशया-
साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षा नराः[2] ॥६५॥

[1] र०—मा स्म मनसि [2] र०—कक्षा

एक इति ॥ व्याध लुब्धक । अपघृणः अपगता घृणा करुणा यस्य स, निर्दय इत्यर्थः अहं एक । विश्वसतां विश्वासशालिनाम् । प्राणिनां मृगादीनां जीवानाम् । प्राणान् अपहरामि । इति एवम् परिचिन्त्य । आत्ममनसि स्वचित्ते । अनुतापं पश्चात्ताप । मा कृथाः मा कुरु । यतः— भूपानां राज्ञां भवनेषु गृहेषु । तथा विमलक्षेत्रेषु विमलानि शुद्धानि क्षेत्राणि प्रयागादीनि तीर्थानि तेषु । गूढाशया गूढः पराहितरूपः गुप्त आशयः अभिप्रायः येषां ते । साधूनां सत्पुरुषाणां च । अरयः शत्रवः । त्वत्तुल्यकक्षा त्वया तुल्या कक्षा अवस्था येषां ते । नराः कति न वसन्ति अपि तु बहव एतादृशा निवसन्तीत्यर्थः । राजभवनेषु तथा पुण्यक्षेत्रेषु कपटेन विश्वस्तानां सज्जनानां अपकारं कुर्वन्तो बहव खला विद्यन्ते—अतो न केवलं त्वं विश्वासघातक इति व्याधं प्रति कस्यचिदुक्तिः । एतदेतत् रसगङ्गाधरे (पृ० ४९७) प्रतीपालंकारे उदाहृतम् । तल्लक्षणं च—'उपमानोपमेययोरन्यतरस्य किंचिद्गुणप्रयुक्तमद्वितीयत्वोत्कर्षं परिहर्तुं द्वितीयप्रदर्शनेनोद्भाव्यमानं सादृश्यमपरं (प्रतीप) द्विविधम्'। अत्र व्याध उपमेयः खलानामुपमानत्वम्। विश्वासघातकता च साधारणो धर्मः । तस्या विश्वासघातकतया व्याधगत उत्कर्षः खलगतविश्वासघातकतया परिहृतः । एतन्मूलमेव च व्याधखलयोः सादृश्यम् । अत्रौपम्यस्य व्याधानुतापनाशः फलम् । शार्दूलविक्रीडितं वृत्तम् ॥ ६५ ॥

विश्वास्य मधुरवचनैः साधून्ये वञ्चयन्ति नम्रतमाः[1] ।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ॥६६॥

[1] प०—नम्रतराः र०—नम्रतया

विश्वास्येति ॥ हे मातः काश्यपि पृथ्वि । ये नम्रतमाः अत्यन्तं विनीताः सन्तः । साधून् सज्जनान् । मधुरवचनैः मिष्टवचोभिः ।

विश्वास्य । तान् वञ्चयन्ति प्रतारयन्ति तान् एतादृशान् खलान् अपि । दधासि धारयसि । अतः । तव अपि च । विवेकः सद्असद्विचारः । यातः गतः । पद्मप्रभटसंगङ्गाधरे (पृ० ४६८) काव्यलिङ्गस्य उदाहृतम् । तल्लक्षणं च काव्यप्रकाशे–'काव्यलिङ्गं हेतोर्वाक्यपदार्थता' । अत्र पृथिवी विवेकनाशस्य तद्भक्तपुरुषाणां धारणं काव्यार्थो हेतुः । गीतिवृत्तम् ॥ ६६ ॥

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या[1]
विद्यावतां सकलमेव गिरां दवीयः[2] ॥६७॥

[1] शे०, वै०–°रार्यहृद्या [2] र०सकलमेव गरिष्ठमन्यत् ।

अन्येति ॥ विद्यावतां विदुषां । जगद्धितमयी संसारोपकारिणी । मनसः प्रवृत्तिः व्यापारः । अन्या विलक्षणा । का अपि वचनावलीनां वचनसरणीनां । रचना । अन्यैव अकृतैव । कृतिः आचारः । च । लोकोत्तरा अलौकिकी । आकृतिः स्वरूपं च । आर्तहृद्या आर्तानां पीडितानां हृद्या मनोहारिणी । किं बहुना विदुषां सकलं एव । गिरां वाणीनां । दवीयः दूरतरम् । अतिशयोक्तिरलङ्कारः । तल्लक्षणं च–'प्रस्तुतस्य यदन्यत्वम्' इत्यादि । पद्मप्रभटसंगङ्गाधरेऽतिशयोक्तौ (पृ० ३११) उदाहृतम् । अत्र विदुषां वाण्यादीनां अभेदे अपि लोकोत्तरप्रतिपत्त्यर्थं भेदो विवक्षितः । वसन्ततिलका वृत्तम् ॥ ६७ ॥

आपद्गतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ६८ ॥

आपद्गतइति ॥ महाशयचक्रवर्ती महान् उदारः आशयः स्वभावः यस्य सः, तेषु चक्रवर्ती चक्रवर्तिनृपवत् श्रेष्ठः । आपद्गतः विपत्तिप्राप्तः । अपि । खलु निश्चयेन । अकृतपूर्वं पूर्वं कृतः कृतपूर्वः, न कृतपूर्वः अकृतपूर्वः तं । उदारभावं महत्त्वं । विस्तारयति प्रकटयति । दहनमध्यगतः अग्निमध्यगतः, ज्वलन्नित्यर्थः । कालागुरुः कृष्णचन्दनः । समन्तात् सर्वतः

लोकोत्तरं अलौकिकं । परिमलं गन्धं । प्रकटीकरोति दर्शयति । अत्र प्रतिवस्तूपमालङ्कारः । तल्लक्षणं च–'वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकवाक्यार्थवीप्सार्थमौपम्यं प्रतिवस्तूपमा' (रसगङ्गाधर—पृ० ३३०–१)। आपद्गतः सत्पुरुषो दहनमध्यगतकालागुरुसदृशः । अपूर्वौदार्यविस्तारणं च लोकोत्तरपरिमलप्रकटनम् । उभयोश्च वस्तुप्रतिवस्तुभावः । वसन्ततिलका वृत्तम् ॥ ६८ ॥

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधिया रमणीय एव ।
लोकंपृणे परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि[1] नितान्तरम्या ॥ ६९ ॥

[1] र०—कालागुरौ कटुतापि ।

विश्वेति ॥ विश्वाभिरामगुणगौरवगुम्फितानां विश्वस्य जगतः अभिरामाः मनोहराः ये गुणाः तेषां गौरवेण महत्त्वेन, आधिक्येन वा, गुम्फितानां युक्तानामित्यर्थः । निर्मलधियां शुद्धबुद्धीनां । रोषः क्रोधः । अपि । रमणीय सुन्दर । एव । लोकपृणे लोकं जनं पृणन्ति तर्पयन्तीति लोकपृणा तैः । अलुक् समासः । परिमलैः गन्धैः । परिपूरितस्य । काश्मीरजस्य कुङ्कुमस्य । कटुता अपि । नितान्तरम्या अतीव मनोहारिणी । पद्यमिदं रसगङ्गाधरे (पृ० ३११) प्रतिवस्तूपमायां उदाहृतम् । वसन्ततिलका वृत्तम् ६९ ॥

लीलालुण्ठितशारदापुरमहासंपद्धराणां[1] पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत्पामराः[2] ।
अद्य श्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः[3] ॥७०॥

[1] र०—°पुरविधामस्मादृशानां– [2] र०—चेद्वालिशाः [3] र०—शालावृकाः

लीलेति ॥ विद्यासद्मविनिर्गलत्कणमुषः विद्याया सद्म गृहं तस्मात् विनिर्गलन्तः अश्यमानाः ये कणाः लेशाः तान् मुष्णन्ति चोरयन्तीति–यथाकथञ्चिद्विद्यालवाद्विद्यो लब्धज्ञानलवाः पामराः नीचाः । लीलालुण्ठितशारदापुरमहासंपद्धराणां लीलया अनायासेन लुण्ठिताः प्रसभं गृहीताः

शारदायाः सरस्वत्याः पुरात् सहान्तः सपक्षराः उत्कृष्टा ऐश्वर्यभारा यैः ते-अस्माद्दशा-तेषाम्। अनायासाधिगतागाधपाण्डित्यानाम्। पुरःअग्रे। वल्गन्ति विकत्थन्ते। चेत्। तर्हि। अद्य अधुनैव। श्वः वा। अतिशीघ्रमेवेत्यर्थः। शकुन्तशिशवः शकुन्तानां पक्षिणां शावकाः। फणिनां सर्पाणां। मूर्धसु शिरःसु। तुलेन पदं। धास्यन्ति स्थापयिष्यन्ति। एवमेव-शशाः शशकाः। दन्ताग्रलानां गजानां मूर्धसु। तथा। शालावृकाः श्वानः-तेषां शालासु गृहेष्वेव न तु वनादिषु वृकतुल्यत्वात्। सिंहानां मूर्धसु पदं धास्यन्ति। अत्र पूर्वार्धे बहुशाल्पज्ञयोर्व्यतिरेको गम्यते। पद्यमिदं रसगङ्गाधरे (पृ०४८५) अर्थापत्तावुदाहृतम्। तल्लक्षणं च-केनचिदर्थेन तुल्यन्यायत्वादर्थान्तरस्यापत्तिरर्थापत्तिः' इति। (अत्र प्रकृत) महापण्डितानां पुरतोऽल्पज्ञानां वल्गनं-तुल्यन्यायेन—शुनां सिंहमस्तकेषु चरणाधानम्- (अप्रकृतम्) गमयति। शार्दूलविक्रीडितम् वृत्तम् ॥ ७० ॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम्।
सलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥ ७१ ॥

गीर्भिरिति ॥ नराः। गुरूणां वृद्धानां शिक्षकाणां वा। परुषाक्षराभिः कठोराभिः। गीर्भिः वाणीभिः। तिरस्कृताः भर्त्सिताः। सन्तः। महत्त्वं गौरवम्। यान्ति। अलब्धशाणोत्कषणाः-न लब्धं शाणे रत्नादिघर्षणपाषाणे कषणं घर्षणं यैः ते। मणयः। जातु कदाचिदपि। नृपाणां राज्ञाम्। मौलौ शिरसि। वसन्ति। पद्यमिदं रसगङ्गाधरे (पृ० ३३२) वैधर्म्येण प्रतिपादितायां प्रतिवस्तूपमायामुदाहृतम्। उपजातिवृत्तम् ॥ ७१ ॥

वहति विषधरान्पटीरजन्मा शिरसि मषीपटलं[1] दधाति दीपः।
विधुरपि भजतेतरां कलङ्कं पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥७२॥

[1] प०, शे., वै०— मसीपटलं

वहतीति ॥ पटीरजन्मा चन्दनः। विषधरान् धरन्तीति धराः विषस्य धराः विषधराः सर्पाः तान्। वहति धारयति। दीपः शिरसि मषीपटलं अञ्जनस्य, कज्जलस्येत्यर्थः, पटलं समूहः। दधाति। विधुः चन्द्रः। अपि।

इत्यत्र 'राजन्' शब्दः 'पुरुष'शब्दश्च उभावपि स्वार्थं त्यजतः—अर्थात् 'राजपुरुषः' न स्वयं राजा न वा साधारणः पुरुषः, अपि तु राजसेवानिरतः पुरुषः। अतोऽत्र राजसेवानिरतपुरुषरूपः परार्थः, अभेदैकत्वं अभेदैकत्वसंख्या—अर्थात् यत्र भिन्ना संख्या अभेदेन वर्तन्ते। यथा अस्मिन् राजपुरुषशब्दे—राज्ञः पुरुषः, राज्ञोः पुरुषः, राज्ञां पुरुषः, इति त्रयमपि संभाव्यते। सर्वान्विता संख्या एकस्मिन् राजपदे संनिविष्टा। स चायं राजशब्दः समासेऽस्मिन् विशेषणत्वात् गुणभूतः। तत्पुरुषे हि परः शब्दः प्रधानो भवति। अतो गुणभूते। राजशब्दे अभेदैकत्वसंख्या वर्तते। यस्यान्तः उदात्तमहिमा स्फुरति। सर्वेषां शब्दानां उदात्तानुदात्तस्वरितादिस्वराणामेकतमः स्वरो भवति। किन्तु समासे 'समासस्य' इति पाणिनिसूत्रेण अन्तोदात्तत्वं भवति। यः नित्यः समर्थः। अन्वययोग्यः शब्दः समर्थः—राजपुरुषः इत्यत्र राजशब्दस्य पुरुषशब्देन अन्वयः सम्बन्धो भवितुमर्हति, किन्तु 'राजा अवलोकयति पुरुषः' इत्यत्र राजशब्दस्य अवलोकयति पदेन अन्वयोऽशक्यः, एवमेव च अवलोकयतिपदस्य पुरुषपदेन। अतः 'समर्थः पदविधिः' इति सूत्रानुसारं समर्थानां परस्परमन्वययोग्यानामेव पदानां समासो भवति—अर्थात् समर्थाश्रित एव समासः। एवमत्र लौकिके वृत्तान्ते शास्त्रीयव्यवहारसमारोपः। शिखरिणी वृत्तम् ॥ ७४ ॥

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥७५॥

वंशभव इति॥ वंशभवः सत्कुलोत्पन्नः। गुणवान् दाक्षिण्यादिगुणैर्युक्तः। अपि। पुरुषः सङ्गविशेषेण विशिष्टसहवासेन। पूज्यते आदियते। वीणादण्डः—वंशभव वेणुजन्मा। गुणवान् तन्त्रीयुक्तः। अपि। तुम्बीफलं 'तुबा' इति प्रसिद्धं, तेन विकलः हीनः। महिमानं महत्त्वं। न प्रयाति न प्राप्नोति। तुम्बीयुक्त एव वीणादण्डो वादयितुं शक्यते। पद्यमिदं रसगङ्गाधरे (पृ० ३३२) वैधर्म्यप्रयुक्तायां प्रतिवस्तूपमायामुदाहृतम्। गीतिवृत्तम् ॥ ७५ ॥

अमितगुणोऽपि पदार्थो दोषेणैकेन[1] निन्दितो भवति[2]।
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव[3] ॥ ७६ ॥

[1].प०—H लाकेदोषेण । [2].प० F. निहता याति । [3].प०—F. लशुनेन ।

अमितेति ॥ अमितगुणः अमिताः असंख्या गुणा यस्मिन् सः । अपि । पदार्थः । एकेन दोषेण निन्दितः भवति । निखिलरसायनमहितः निखिलेषु समग्रेषु रसायनेषु पारदादिशोधनेषु महितः पूजितः । लशुनः । उग्रेण तीव्रेण, उद्वेजकेनेत्यर्थः । गन्धेन निन्दितः भवति । पूर्वार्धमत्र सामान्यवचनं, उत्तरार्धं च विशेषवचनम् । अत एव नात्रोपमा, किन्तु उदाहरणालङ्कारः । एतमेतत्प्रसङ्गाधरे (पृ० २१३) उदाहरणालङ्कार उदाहृतम् । तल्लक्षणं च— 'सामान्येन निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोरवयवावयविभाव उच्यमान उदाहरणम्' । आर्यावृत्तम् ॥ ७६ ॥

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥ ७७ ॥

उपकारमिति ॥ सद्गुणः शोभना गुणाः यस्य सः । एतादृशो नरः । विपद्गतः आपत्तिग्रस्तः । अपि । उपकारं हितं । एव । तनुते विस्तारयति । मूर्च्छां गतः मृतः वा पारदः रसः मूर्च्छामृतौ वैद्यशास्त्रोक्तौ संस्कारविशेषौ । अत्र । निदर्शनं उदाहरणम् । एतमेतत्प्रसङ्गाधरे (पृ० २१४) उदाहरणालङ्कार उदाहृतम् । उपगीतिवृत्तम् ॥ ७७ ॥

वनान्ते[1] खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुर्भजति[2] भयहर्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदै[3]
परीता रक्षोभिः श्रयति विवशा कामपि दशाम्[4] ॥ ७८ ॥

[1]. र०—वनान्त । [2]. र०—श्रयति । [3]. र०—शिव शिव परीताश्रुतिवलत्'— [4]. र०—कोटीकोटीभिर्वसति खलु रक्षोयुवतिभिः ।

वनान्त इति ॥ या वनान्ते वनस्य अन्ते दण्डकारण्यस्य एकदेशे । खेलन्ती क्रीडन्ती । शशकशिशुं । आलोक्य दृष्ट्वा । चकिता त्रस्ता सती । सपदि तत्काल । भयहर्तुः भयापहारकस्य । भर्तुः स्वामिनः रामस्य भुजप्रान्तं बाहुमध्यभागं । भजति सेवते । अहो । दशवदननीता रावणापहृता । सा इयं सीता हलरदैः हलसदृशा रदाः दन्ताः येषां तैः

रक्षोभिः राक्षसैः । परीता वेष्टिता । पुनश्च । विवशा परवशीना सती । कामपि दशां अनिर्वचनीयां दुःखमयीं अवस्थां । श्रयति अवलम्बते । पण्डितराजरत्नगङ्गाधरे (पृ० ४४८) विषमालङ्कार उदाहृतम् । तल्लक्षणं च— 'अननुरूपसंसर्गो विषमम्' । उक्तं च तत्रैव जगन्नाथेन— "अत्र सतीशिलाभङ्गेर्भगवत्या राघवधर्मपत्न्या परवशप्रभावयुक्तत्वाद्राक्षसीभिरनाश्रयत्वेऽपि रक्षःकर्तृकनाशस्वरूपयोग्यतावच्छेदकमनुष्यत्वजातियोगेन स्वरूपस्य रक्षोदर्शनेन सौन्दर्यसौकुमार्यादीनां गुणानां च नाश्यत्वेन विरुद्धत्वात् समानाधिकरणसंयोगरूपः संसर्गोऽननुरूपः" शिखरिणी वृत्तम् ॥ ७८ ॥

पुरो गीर्वाणानां निजभुजबलाहोपुरुषिका[1]—
महो कारंकारं पुरभिदि शरं संमुखयतः[2] ।
स्मरस्य स्वर्बालानयनसुमनोमालार्चनपदं[3]
वपुः सद्यो भालानलभसितजालास्पदमभूत् ॥ ७९ ॥

[1]. र०—पुलकितकपोलं प्रणयतो । [2]. इ०—भुजप्रौढिसाक्षाद्भगवति शरं संमुखयितुम् । [3]. र०—°मालार्चितमहो ।

पुर इति॥ गीर्वाणानां देवानाम् पुरः अग्रे । निजभुजबलाहोपुरुषिकां निजभुजयोः बलं स्वबाहुवीर्यं तेन आहोपुरुषिका अहंमन्यता । अहो अहं पुरुषः, समर्थः, इत्यहंकारवान् अहोपुरुषः, तस्य भावः आहोपुरुषिका । 'आहोपुरुषिका दर्पाद्या स्यात्तेभावनात्मनि' इत्यमरः । कारंकारं कृत्वा कृत्वा । अहमेव समर्थ इति वारं वारं देवानामग्रतः स्वाभिमानं प्रदर्श्येत्यर्थः पुरभिदि त्रिपुरदाहके शिवे । शरं बाणं । संमुखयतः अभिमुखं संदधतः सतः । स्मरस्य कामदेवस्य । स्वर्बालानयनसुमनोमालार्चनपदं स्वर्बालाः देवाङ्गनाः तासां नयनानि एव सुमनांसि पुष्पाणि तेषां माला पङ्क्तिः तया यत् अर्चनं पूजनं तस्य पदं स्थानम् । वपुः शरीरं । सद्यः तत्कालम् । भालानलभसितजालास्पदं भालस्य ललाटस्य यः तृतीयनेत्रोत्थितः अनलः अग्निः तेन यत् भसितजालं भस्मसमूहः तस्य आस्पदं स्थानं । अभूत् जगज्जयविजेता मदनः यदा परमाराध्ये शङ्करे शरं दधौ तदा तत्तृतीयनेत्रोत्थानलेन भस्मावशेषो बभूव । शङ्करभगवतस्तु नाभूत् कोऽप्यपकारः प्रत्युत स्वयं मदनस्यैव दुःखप्राप्तिरभूत् । पण्डितराजरत्नगङ्गाधरे (पृ० ४४६) विषमालङ्कार उदा-

इतम् । उक्तं च तत्र जगन्नाथेन–' परस्य दुःखसाधनानवाप्तिः स्वस्य दुःख-साधनप्राप्तिरित्युभयं ' अननुरूपं संसर्गं द्योतयति । शिखरिणी वृत्तम् ॥७९॥

युक्तं सभायां खलु मर्कटानां शाखास्तरूणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी दन्तैर्नखाग्रैश्च विपाटितानि[1] ॥८०॥

[1] र०–विपाटनानि । पद्यमिदं वा० पुस्तके टिप्पण्यां पठ्यते ।

गुरुजनेति ॥ प्रियाविमुक्तस्य नायकस्योक्तिरियम् । हा इति खेदे । गुरुजनभयमह्रिलोकनान्तःसमुदयदाकुलभावमावहन्त्या गुरुजनः श्वश्रूप्रभृतिः तस्माद् भयं, तत्सन्निधौ प्रियवीक्षणानौचित्यात्, तथा मह्रिलोकनं मत्कर्तृकमवलोकनं, तयोः अन्तः मध्ये । अथवा, ताभ्यां अन्तः हृदये । समुदयन् उद्गच्छन् य आकुलो भावः विह्वलता, तं आवहन्त्याः धारयन्त्याः । अनेन लज्जाभयकालस्यैक्यं व्यज्यते । हरिणदृशः मृगाक्ष्याः । दरदलदरविन्दसुन्दरं दर ईषत् यथा स्यात्तथा दलत् विकसत् यत् अरविन्दं तद्वत् सुन्दरं । नयनं न विस्मरामि । पुरा गुरुजनसन्निधौ यथावलोकितायाः प्रियाया मनसि यदा त्रासौत्सुक्ययोर्भावयोः सधि समजनि, तदा सा ईषद्विकसितकमलवच्छोभनेन नेत्रत्रिभागेन मामवलोकितवती—तदह कथंचिदपि

न विस्मरामीति भावार्थः। अत्र गुरुजनभयभङ्गिलोकनयोर्मध्ये व्याकुलत्वादेन त्रासौत्सुक्ययोरन्यतेऽपि तुल्यकक्षत्वम्। उपमालङ्कारः। पुष्पिताग्रावृत्तम्। तल्लक्षणं च—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति ॥ ७ ॥

बदरामलकाम्रदाडिमानामपहृत्य श्रियमुन्नतां क्रमेण।
अधुना हरणे कुचौ यतेते दयिते ते करिशावकुम्भलक्ष्म्याः ॥ ८ ॥

बदरेति। नायकस्य नायिकां प्रति चाटूक्तिरियम्। हे दयिते प्रेयसि। ते तव। कुचौ स्तनौ। बदरामलकाम्रदाडिमानां बदरस्य, आमलकस्य, आम्रस्य, दाडिमस्य च। उन्नतां उत्कृष्टां। श्रियं शोभां। क्रमेण अनुक्रमात्। अपहृत्य चोरयित्वा। अधुना करिशावकुम्भलक्ष्म्याः करिशावः गजपोतः, तस्य कुम्भयोः कटयोः या लक्ष्मीः शोभा तस्याः। हरणे चोरणे। यतेते यत्नं कुरुतः। हे प्रिये तव स्तनौ पूर्वं बदरसदृशौ, तदनन्तरं आमलकसदृशौ, एवं क्रमेणोत्तरोत्तरं महान्तौ कठिनतरौ च जायमानौ, अधुना गजपोतकटाकारं भजत इति भावार्थः। अत्र सारालङ्कारः। तल्लक्षणं च—'उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः' इति। मालभारिणीवृत्तम् ॥ ८ ॥

[एतदनन्तरं कैश्चिदधिकः श्लोकः पठ्यते—

अम्भोरुहिणमतिलम्ब्य लीलयैव म्लानश्रीकृतकमनीयहेमकुम्भौ।
नीलाम्भोरुहनयनेऽधुना कुचौ ते स्पर्धेते किल कनकाचलेन सार्धम् ॥]

कपोलपालिं तव तन्वि मन्ये
लावण्यधन्ये दिशमुत्तराख्याम्।
विभाति यस्यां ललितालकायां
मनोहरा वै श्रवणस्य लक्ष्मीः ॥ ९ ॥

कपोलेति। हे तन्वि कृशाङ्गि। लावण्यधन्ये लावण्येन मौक्तिकसदृशकान्त्या धन्ये कृतिनि। 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥'। तव कपोलपालिं गण्डस्थलीं। उत्तराख्यां दिशं मन्ये। कुत इत्यत आह—यस्यां तव कपोलपाल्यां। ललितालकायां ललिताः मनोहराः अलकाः चूर्णकुन्तलाः यस्या तस्याः। विकल्पे—ललिता मनोहरा अलका कुबेरनगरी तस्या तस्यां। मनोहरा। वै इति निश्चयेन।

श्रवणस्य कर्णस्य । विकल्पे—वश्रवणस्य कुबेरस्य । लक्ष्मीः शोभा । विभाति । अत्र समङ्गलेपोत्थापित , मन्ये इति पदयोस्य उत्प्रेक्षालङ्कारः । उपजातिवृत्तम् ॥ ९ ॥

नीवीं नियम्य शिथिलामुपासि प्रकाश—
मालोक्य वारिजदृशः शयनं जिहासोः ।
नैवावरोहति कदापि च मानसान्मे
नाभेः प्रभा[1] सरसिजोदरसोदरायाः ॥ १० ॥

१ वै० नि०—निभा ।

नीवीमिति ॥ नायकोक्तिरियम् । उपासि प्रत्यूषे । प्रकाशं सूर्यालोकं । आलोक्य दृष्ट्वा । शिथिलां सुरतार्थमौत्सुक्यात् स्वयमेव लस्तां । नीवीं जघनवस्त्रग्रंथिं । नियम्य हस्तेन धृत्वा । शयनं शय्यां । जिहासोः त्यक्तुमिच्छोः । वारिजदृशः कमलाक्षिणः प्रियायाः सम्बन्धिन्याः । सरसिजोदरसोदरायाः सरसिजं कमलं तस्य उदरं निम्नो मध्यभागः तस्य सोदरायाः भगिन्याः, तत्सदृश्या इत्यर्थः । नाभेः प्रभा शोभा । मे मानसात् चित्तात् । कदापि नैव अवरोहति अपगच्छति । महति प्रत्यूषे सूर्यप्रकाशं दृष्ट्वा मत्प्रिया रात्रौ स्खलितां नीवीं हस्तेन संयम्य यदा शय्यां त्यक्तुमैच्छत् तदा कमलोदरसदृशीं तस्या नाभिमहमवालोकयम्, सा च नाभिशोभा न मे चित्तादपगच्छतीति भावार्थः । अत्र सोदरशब्दः सदृशवाचक आर्थीमुपमां प्रयोजयति । उदाहृतं चैतत्पद्यं रसगङ्गाधरे उपमालङ्कारे (पृ० १७९) । वसन्ततिलकावृत्तम् ॥१०॥

आलीषु केलीरभसेन बाला मुहुर्ममालापमुपालपन्ती ।
आरादुपाकर्ण्य गिरं मदीयां सौदामिनीवा सुषमामयासीत् ॥११॥

आलीष्विति ॥ आलीषु सखीषु । केलीरभसेन क्रीडावेगेन । मम आलापं भाषणं । मुहुः पुनः पुनः । आलपन्ती अनुकुर्वाणा । बाला नवोढा प्रिया । आरात् दूरात् । । मदीयां गिरं वाणीं । उपाकर्ण्य श्रुत्वा । सौदामिनीवा विद्युत्सम्बन्धिनी । सुषमां शोभां । अयासीत् प्राप्तवती । विद्युदिव सहसा पलायनं चक्रे । सखीनां मध्ये वारं वारं मत्संभाषणस्यानुकरणं कुर्वाणा मत्प्रिया यदैव मद्गिरं दूरात् शुश्राव, तदैव 'तस्या मद्वचनमाकर्णितं' इति त्रस्ता झटित्यालापं परित्यज्यान्यत्र गमनं चकारेति भावार्थः ।

अत्र वासकसज्जाया व्यभिचारस्य व्यङ्ग्यत्वम्। उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ० ८६)। उपजातिर्वृत्तम् ॥ ११ ॥

मुधैव मन्तुं परिकल्प्य गन्तुं मृषैव रोषादुपजल्पतो मे।
उदश्रुचञ्चन्नयनो नताङ्गी गिरं न कां कामुररीकरोति ॥ १२ ॥

१. बा०—उदस्रचञ्चन्नयन। प०—°चञ्चन्नयन।

मुधैवेति। गन्तुं गमनार्थं। मुधैव व्यर्थमेव। मन्तुं अपराधं परिकल्प्य विनाऽपराधं दोषारोपणं कृत्वा। रोषात् क्रोधात्। मृषैव मिथ्यैव। उपजल्पतः कृत्रिमकोपेन यत्किंचिद्वदतो भाषमाणस्य, मे। उदश्रुचञ्चन्नयना उदश्रुणी अश्रुयुक्ते चञ्चती चपले नयने यस्या सा। नताङ्गी यौवनभरेणेत्यर्थः। कां कां गिरं वाणीं। न उररीकरोति स्वीकरोति। मानमुनेतु किं किं न भाषते। प्रियासकाशाद्गन्तुमिच्छन्नह तस्या मिथ्यादोषारोपणं कृत्वा कृत्रिमकोपं चोद्भाव्य यत्किंचिद्ब्रूते प्रवृत्तः, सा च 'सत्यमेव मदपराधाकुद्धः' इति भीता बहुविधैर्वचनैर्मानमुनेतु प्रावर्ततेति भावार्थः। उपेन्द्रवज्रावृत्तम् ॥१२॥

तदवधि कुशली पुराणशास्त्र—
स्मृतिशतचारुविचारजो विवेकः।
यदवधि न पदं दधाति चित्ते
हरिणकिशोरदृशो दृशोर्विलासः ॥ १३ ॥

१. नि०—श्रुतिशतचारु°। नि०-टीका—श्रुतिशतचार°।

तदवधीति। यदवधि यावत्कालपर्यन्तं। हरिणकिशोरदृशः मृगशावाक्ष्याः। दृशः नयनयोः। विलासः कटाक्षः। चित्ते हृदये। पदं स्थानं। न दधाति स्थापयति। तदवधि तावत्कालपर्यन्तं। पुराणशास्त्रस्मृतिशतचारुविचारजः पुराणानि, धर्मशास्त्राणि, मन्वादिस्मृतयः, तेषां शतस्य यः चारुः समीचीनो विचारः, तस्मात् जातः। विवेकः कर्तव्याकर्तव्यज्ञानं। कुशली क्षेमशाली, चेतसि स्वस्थानवान् इत्यर्थः। शास्त्राभ्यासोत्थं कर्तव्याकर्तव्यज्ञानं तावदेव सुस्थिरं यावत् कामिनीकटाक्षविलसितेन न विद्धो भवति मनुष्यः, सति तु वेधे विवेकभ्रंशो भवत्येवेति भावार्थः। उदाहृतं पद्यमिदं रसगङ्गाधरे (पृ० १३६)। पुष्पिताग्रावृत्तम् ॥ १३ ॥

आगतः पतिरितीरितं जनैः शृण्वती चकितमेत्य देहलीम् ।
कौमुदीव शिशिरीकरिष्यते लोचने मम कदा मृगेक्षणा ॥ १४॥

आगत इति । कस्यचित्पथिकस्योक्तिरियम् । मृगेक्षणा मृगनयना । पतिः आगत इति जनैः सखीजनैः । ईरितं प्रोक्तं वचनं । शृण्वती श्रवणसमकालमेव । देहलीं चकितं सविस्मयं । एत्य आगत्य । कौमुदी ज्योत्स्ना । इव मम लोचने कदा शिशिरीकरिष्यते आनन्दयिष्यति । एषमिद रसगङ्गाधरे (पृ० १९३) उदाहृतम् । उक्तं च पण्डितराजेन तत्र— 'अत्र शृण्वतीति शब्दा प्रत्यायितेन श्रवणसमकालमेव प्रियाया देहल्यागमन-मित्यर्थेनातिशयोक्त्यात्मना गमितस्वरातिशयस्तद्गतौत्सुक्यातिशयं पुष्णाति । कौमुद्युपमा तु तत्परिपोषित प्रधानीभूतं प्रियगतौत्सुक्यं' पुष्णाति शेषः । रथोद्धतावृत्तम् ॥ १४ ॥

अवधौ दिवसावसानकाले भवनद्वारि विलोचने दधाना ।
अवलोक्य समागतं तदा मामथ रामा विकसन्मुखी बभूव ॥१५॥

अवधाविति ॥ दिवसावसानकाले सन्ध्यासमये । अवधौ प्रतिज्ञातायां वेलायां । भवनद्वारि गृहद्वारे । विलोचने नयने । दधाना निवेशयन्ती । मदागमनं प्रतीक्षमाणेत्यर्थः । रामा कान्ता । तदा तस्मिन्नवधिसमये । मां समागतं अवलोक्य अथ अनन्तरं । विकसन्मुखी हर्षोत्फुल्लवदना । बभूव संजाता । सायंकाले पूर्वप्रतिज्ञातायां प्रत्यागमनवेलायां मां प्रतीक्षमाणा द्वार-सन्निविष्टलोचना प्रिया यदा मां दृष्टवती तदा हर्षोत्फुल्लमुखी सञ्जातेति भावार्थः । अत्र मुखविकसने नायिकाया नायकागमनजन्यो हर्षो व्यज्यते । उदाहृतं चैतत्पद्यं रसगङ्गाधरे हर्षाख्ये व्यभिचारिभावे (पृ० ७७) । तल्लक्षणं च तत्र—' इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः' इति । मालभारिणीवृत्तम् ॥१५॥

वक्षोजाग्रं पाणिनाऽऽस्पृश्य[1] दूरं
यातस्य द्वागाननाब्जं प्रियस्य ।
शोणाग्राभ्यां भामिनी लोचनाभ्यां
जोषं जोषं जोषमेवावतस्थे ॥ १६ ॥

१. नि०—°मृश्य । र०—°मृष्य ।

वक्षोजाग्रमिति। भामिनी प्रिया। पाणिना हस्तेन। वक्षोजाग्रं कुचाग्रं। आस्पृश्य ईषत्स्पृष्ट्वा। द्राक् ईषत्। दूरं यातस्य प्रियस्य। आननाब्जं मुखकमलं। शोणाग्राभ्यां आरक्तप्रांताभ्यां। लोचनाभ्यां। जोषं जोषं निर्निमेषं दृष्ट्वा दृष्ट्वा। जोषं एव तूष्णीं एव। अवतस्थे स्थिता। विनोदशील कविशायक प्रियास्तनाग्रं स्पृष्ट्वा यदा किंचिद्दूरं गतस्तदा ईषद्वक्रनेत्रा प्रिया तन्मुखे दत्तनिर्निमेषदृष्टिस्तूष्णीमेव स्थितेति भावार्थः। इहाकस्मिकस्तनाग्रस्पर्शजन्ये नयनारुण्यनिर्निमेषनिरीक्षणे नायिकागतसमर्पांख्य भाव व्यञ्जयतः। उदाहृतं चैतदमर्षांख्यभावलक्षणे रसगङ्गाधरे (पृ० ८८)। शालिनीवृत्तम् ॥ १६ ॥

गुरुभि परिवेष्टितापि गण्डस्थलकण्डूयनचारुकैतवेन[1]।
दरदर्शितहेमबाहुनाला मयि बाला नयनाञ्चलं चकार ॥ १७ ॥

१ वा०—"कौतुकेन।

गुरुभिरिति। गुरुभि श्वश्रूप्रभृतिभि। परिवेष्टिता अपि परिवेष्टितापि। अपिना अनुरागातिशयो व्यज्यते। गण्डस्थलकण्डूयनचारुकैतवेन गण्डस्थलस्य कपोलस्य कण्डूयनस्य खर्जनकरणस्य चारुणा मनोज्ञेन कैतवेन मिषेण। अनेन चातुर्यातिशयो व्यज्यते। दरदर्शितहेमबाहुनाला दरं ईषत् यथा स्यात्तथा दर्शितं हेमबाहुनालं सुवर्णसदृशगौरवर्णं भुजमृणालं यया सा। बाला। मयि नयनाञ्चलं कटाक्षं चकार। गुरुमध्यगतत्वान्नायिका न स्वानुरागं स्फुटं दर्शयितुमशक्नुवत्, अतः कपोलकण्डूयनमिषेण स्वभुजमूलं दर्शयन्ती नायके कटाक्षनिक्षेपमकरोदिति भावार्थः। मालभारिणीवृत्तम् ॥ १७ ॥

गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम्।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ॥१८॥

गुरुमिति। गुरुमध्यगता श्वश्रूप्रभृतिगुरुजनानां मध्ये स्थिता। अत एव नताङ्गी नतशरीरा। मया। नीरजकोरकेण पद्मकुड्मलेन मन्दं ईषत्। निहता ताडिता सती। दरकुण्डलताण्डवं दरं ईषत् कुण्डलयोः ताण्डवं नर्तनं यस्मिन् कर्मणि यथा स्यात्तथा। तथा नतभ्रूलतिकां नतौ भ्रुवौ लतिकेव यस्मिन् कर्मणि यथा स्यात्तथा। मां अवलोक्य दृष्ट्वा। घूर्णिता

भ्रान्ता । आसीत् स्थिता । नायको ब्रूते—यदाहं गुरुजनमध्ये स्थितः स्वप्रियां कमलमुकुलेन मन्दं प्रहृतवान् तदा सा भ्रान्तचित्ताऽभवत्, मदवलोकनक्षणे च तस्या नर्तितकुण्डलं नेत्रभ्रूवल्लि आननं नितरां शुशुभे—इति भावार्थः । पद्यमेतदुत्तमकाव्यत्वेनोदाहृतं रसगङ्गाधरे (पृ० ११) । उक्तं च तत्र—'अत्र घूर्णितासीदित्यनेनासमीक्ष्यकारित्वमनुचितं कृतवानसीत्यर्थसंवलितोऽमर्षश्रवणाविश्रान्तिधामत्वात्प्राधान्येन व्यज्यते' इति । मालभारिणीवृत्तम् ॥ १८ ॥

विनये नयनारुणप्रसारा[1] प्रणतौ हन्त निरन्तराश्रुधारा[2] ।
अयि[3] जीवितसंशय[4] प्रयाणे नहि जाने हरिणाक्षि केन तुष्ये ॥१९॥

१. नि०—°प्रसारा । २. नि०—°धारा । ३. नि०—अपि । ४. नि०—°संशया ।

विनय इति । मानिनीं नायिकां प्रति नायकस्यानुनयोक्तिरियम् । मया विनये नम्रतादिसूचकवचनोक्तौ । क्रियमाणे । तव नयनारुणप्रसाराः नयनयोः अरुणस्य आरुण्यस्य, 'असत्यवाद्यय' इति क्रोधजन्यस्य रक्तत्वस्य प्रसारा विस्ताराः । भवन्तीति शेषः । तथा प्रणतौ अनुनयार्थं चरणयोः पतने क्रियमाणे मयि । निरन्तराश्रुधाराः तव निरन्तरं अश्रुधाराप्रवाहो जायते । तथा प्रयाणे मया गमने क्रियमाणे तु । जीवितसंशयः तत्र प्राणानां संशयो जायते । एवंगते सति, अयि हरिणाक्षि हे मृगलोचने । त्वं केन तुष्ये प्रसीदसि, इति अहं नहि जाने । यदा नम्रो भवामि तदा कुप्यसि, यदा प्रणमामि तदा रोदिषि, यदा गन्तुमुद्यतो भवामि तदा संदिग्धजीविता भवसि—इत्थं केनोपायेन त्वं तुष्यसीति नाहं जाने—इति भावार्थः । मालभारिणीवृत्तम् ॥ १९ ॥

अकरुण मृषाभाषासिन्धो विमुञ्च ममाञ्चलं
तव परिचितः कोऽहं सम्यङ् मयेत्यभिधायिनीम् ।
अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
क इह भवतीं भद्रे निद्रे विना विनिवेदयेत् ॥ २० ॥

१. प० इव ।

अकरुणेति ॥ 'यथा प्रवासगतस्य स्वोऽपि प्रियामेवंभाषिणीं दृष्टवतो निद्रां प्रति कस्यचिदुक्तिः' इति रसगङ्गाधरे (पृ० ८७) पण्डितराजः । हे भद्रे सखि । निद्रे । भवतीं विना कः इह प्रवासे । वक्ष्यमाणस्वरूपां

प्रियां विनिवेदयेदित्यन्वयः। कीदृशीम्?—हे अकरुण निष्कृप। मृषा-भाषासिन्धो मृषा मिथ्या भाषा वाणी तस्याः सिन्धो समुद्र—मिथ्या-भाषिन्नित्यर्थः। त्वं कृत्रिम प्रेम दर्शयसि अतस्त्वत्प्रीतिवचनानि मिथ्या-चाटुकारा इत्यभिप्रायः। मम अञ्चलं वसनान्तं। विमुञ्च त्यज। मया तव स्नेहः कृत्रिम इत्यर्थः। सम्यक् परिचितः ज्ञातः। इति अभिधायिनीं इति वदन्तीं। अविरलगलद्बाष्पां अविरलं निरन्तरं यथा स्यात्तथा गलन्ति क्षरन्ति बाष्पाणि अश्रूणि यस्याः सा ताम्। तन्वीं कृशाङ्गीं। निरस्तविभूषणां अपसारिताभरणां। को विनिवेदयेदिति पूर्वेण सम्बन्धः। अस्मिन् प्रबन्धे 'हे निर्घृण, त्वं मिथ्याभाषसि, तव स्नेहस्तु सम्यग्ज्ञातः, अतः कपटप्रीतिं दर्शयन् मा ममाञ्चलं गृहाण' इत्येव भाषमाणां मानाच्च परित्यक्तभूषणां सततगलदश्रुधारां मम प्रेयसीं, हे भगवति निद्रे त्वामन्तरेण को यथा सह सङ्गमयेदिति भावार्थः। पद्येऽस्मिन् सुताख्यो व्यभिचारिभावो व्यज्यते। हरिणीवृत्तम्। तल्लक्षणं च—'रसयुगहयैर्म्नौ स्रौ स्रौ गो यदा हरिणी तदा' इति ॥ २० ॥

तीरे तरुण्या वदनं सहासं
नीरे सरोजं च मिलद्विकासम्।
आलोक्य धावत्युभयत्र मुग्धा
मरन्दलुब्धालिकिशोरमाला ॥ २२ ॥

तीर इति। तीरे सरोवरादितटे। तरुण्याः युवत्याः। सहासं वदनं आननं। तथा च। नीरे जले। मिलद्विकासं मिलन् युक्तः विकासः प्रस्फुटनं यस्मिन् तत्—विकसितमित्यर्थः। सरोजं कमलं। आलोक्य दृष्ट्वा। मरन्दलुब्धा मधुलुब्धा। अलिकिशोरमाला अलिकिशोराणां भ्रमरशिशूनां माला पङ्क्तिः। अत्र किशोरशब्देन तेषां भ्रमरोऽस्ता व्यज्यते। मुग्धा भ्रान्ता सती। उभयत्र वदने सरोजे च—वदनं सरोजमथवा सरोजं सरोजमिति भ्रान्ता। धावति—वदनात्कमलं कमलाच्च वदनं पुनः पुनर्गच्छति। अत्र पुरोवर्तिनो-र्वदनकमलयोः कमलमिदमिदं वेति भ्रमरगतः संशयो व्यज्यते। स च संशयो वदनकमलयोः सौरभ्यकान्त्यादिसादृश्यं पुष्णन् नायिकायाः पद्मिनीत्वं व्यञ्ज-

यति । उपजातिवृत्तम् । पद्यमिदं रसगङ्गाधरे सशयालङ्कारे (पृ० २६०) उदाहृतम् ॥ २२ ॥

वीक्ष्य वक्षसि विपक्षकामिनीहारलक्ष्म दयितस्य भामिनी ।
अंसदेशविनिवेशितां क्षणादाचकर्ष निजबाहुवल्लरीम् ॥ २३ ॥

वीक्ष्येति । भामिनी कोपना नायिका । दयितस्य प्रियस्य । वक्षसि उरःस्थले । विपक्षकामिनीहारलक्ष्म विपक्षकामिन्याः सपत्न्याः सुरतादिसमये गाढालिङ्गनजन्यं हारस्य मुक्तावलेः लक्ष्म चिह्नं । वीक्ष्य दृष्ट्वा । अंसदेशविनिवेशितां अंसदेशे स्कन्धप्रदेशे स्थापितां, आलिङ्गनार्थमिति भावः । निजबाहुवल्लरीं स्वकीयां बाहुलतां । क्षणात् झटिति । आचकर्ष अपसारितवती । स्वप्रियालिङ्गनांशता काचिन्नायिका तदुरसि सपत्नीहारचिह्नं दृष्ट्वा सहसा तत्क्षणात्स्वबाहुमपसारितवतीति भावार्थः । अनेन भुजलताकर्षणेन नायिकागतो रोषाख्यस्य भावस्योदयो गम्यते । उदाहृतं च पद्यमेतद्रसगङ्गाधरे (पृ० १०३) भावोदये । रथोद्धतावृत्तम् । तल्लक्षणं च— 'रान्नराविह रथोद्धता लगौ' इति ॥ २२ ॥

दूरानमत्कंधरबन्धमीषन्निमीलितस्निग्धविलोचनाब्जम् ।
अनल्पनिःश्वासभरालसाङ्गं स्मरामि सङ्गं चिरमङ्गनायाः ॥२३॥

दूरानमदिति । दूरानमत्कंधरबन्धं दूरं ईषत् आनमन्ती कन्धरा ग्रीवा यस्मिन् सः बन्धः पुरुषार्पिताङ्गः सुरतप्रकारः यस्मिन् तम् । ईषन्निमीलितस्निग्धविलोचनाब्जं ईषन्निमीलिते पिहिते स्निग्धे प्रेमरसनिर्भरे इव विलोचने अब्जे कमले इव यस्मिन् तम् । अनेन नायिकायाः पूर्णास्वादो व्यज्यते । सुरतावसाने च—अनल्पनिःश्वासभरालसाङ्गं अनल्पाः दीर्घाः, विपरीतरते नायिकायाः श्रमाधिक्यात् निःश्वासाः तेषां भरेण आधिक्येन आलसानि स्वस्वव्यापारेष्वसक्तानि अङ्गानि यस्मिन् तम् । ईदृशं । अङ्गनायाः प्रियायाः । सङ्गं सुरतं । चिरं स्मरामि । नायिकायाः विपरीतरतिं स्मरतो नायकस्योक्तिरियम् । उपजातिवृत्तम् । पद्यमेतद्रसगङ्गाधरे (पृ० ७८) उदाहृतम् ॥ २३ ॥

रोषावेशान्निर्गतं यामयुग्मादेत्य द्वारं काचिदाख्यां गृणन्तम् ।
मामाज्ञायेतायया कातराक्षी मन्दं मन्दं मन्दिरादिन्दिरेव ॥ २४ ॥

रोषावेशादिति ॥ रोषावेशात् रोषस्य, मयैव प्रसाद्यमानापि नेयं मानं मुञ्चतीति क्रोधस्य आवेशात् आवेगात्। केलिगृहात्। निर्गतं बहिर्यातम्। किन्तु कोपनिर्वाहे अक्षमत्वात् पुनः। यामयुग्मात् प्रहरद्वयानन्तरम्। केलिगृहस्य द्वारं एत्य आगत्य। केलिभवनप्रवेशार्थं द्वारस्थितां नायिकासखीं प्रति कांचित् अलीकाम्। आख्यां नामधेयं। गृह्णन्तं कथयन्तं द्वारि स्थितोऽमुकस्त्वा दिदृक्षति—इत्यलीकं किंचित् स्वनामधेयं नायिकासख्यै निवेदयन्तं। मां आज्ञाय एव अयं प्रिय एवागत इति निश्चित्य ज्ञात्वैव। कातराक्षी मा कदाचित्पुनरपि कुपितो भूदिति भीतचकितलोचना। मन्दिरात् केलिगृहात्। इन्दिरा सौन्दर्यातिशयमहिम्ना लक्ष्मीः। इव। मन्दं मन्दं शनैः शनैः। मां मिलितुं। आययौ आगता। कश्चिन्नायको महता प्रयासेनापि मानिन्या स्वनायिकाया मानापनोदनासमर्थः सन् क्रोधेन परित्यक्तकेलिभवनो बहिर्ययौ, किन्तु चिरं स्वक्रोधधारणेऽसमर्थः प्रहरद्वयानन्तरमेव केलिभवनद्वारमागत्यालीकं स्वनामधेयं प्रियासख्यै निवेदयामास, प्रिया तु दयित एवायं मे समागत इति तं सम्बुद्ध्या, पुनस्तत्क्रोधभीता तं मिलितुं केलिमन्दिराद्बहिराययाविति भावार्थः। शालिनीवृत्तम्। तल्लक्षणं च—"शालिन्युक्तास्तौ तगौ गोऽब्धिलोकैः" इति ॥ २४ ॥

हृदये कृतशैवलानुषङ्गा मुहुरङ्गानि यतस्ततः क्षिपन्ती।
प्रियनामपरे मुखे सखीनामतिदीनामियमादधाति दृष्टिम् ॥२५॥

हृदय इति। विरहिण्यवस्थावर्णनम्। इयं विरहिणी। तापशान्तये हृदये वक्षसि। कृतशैवलानुषङ्गा कृतः शैवलानां जलनीलीनां अनुषङ्गः संपर्कः स्थापनमिति भावः, यया सा। तथा च। अङ्गानि हस्तपादं। मुहुः यतः ततः क्षिपन्ती। प्रियनामपरे दयितनामोच्चारणयुक्ते। सखीनां मुखे। अतिदीनां अतिकातरां। अह जनन्यकरणासक्तिवशेन दीयते। दृष्टिं आदधाति निवेशयति। विरहसन्तापेऽतिमूर्छिते विरहिणी स्ववक्षसि स्थापितशैवला, इतरतो हस्तपादं क्षिपन्ती यदा स्वसखीमुखेभ्यः प्रियनामाकर्णयति तदा तन्मुखेषु अतिकरुणां दृष्टिं निदधातीति भावार्थः। पद्यमिदं रसगङ्गाधरे व्याख्यायामभिचारिभावोदाहरणे (पृ० ८६) पठ्यते। शालभारिणीवृत्तम् ॥ २५ ॥

इत एव निजालयं गताया वनितायाः[1] गुरुभिः समावृतायाः ।
परिवर्तितकंधरं नतभ्रु स्मयमानं वदनाम्बुजं स्मरामि ॥ २६ ॥

१. नि०—विनतायाः ।

इत एवेति ॥ इतः अस्मात् प्रदेशात् । एव । निजालयं स्वगृहं । गताया वनितायाः प्रियायाः । गुरुभिः श्वश्र्वादिभिः समावृतायाः परिवृतायाः । परिवर्तितकंधरं परिवर्तिता वलिता कंधरा ग्रीवा यत्र । नतभ्रु नते भ्रुवौ यत्र । अत एव स्मयमानं सस्मितं । वदनाम्बुजं वदनं अम्बुजमिव । मुखकमलमित्यर्थः । स्मरामि । स्वगृहं प्रति प्रस्थिता प्रियास्मिन्नेव प्रदेशे यद्ग्रीवां परावृत्य भ्रुवौ च नम्रीकृत्य सस्मितं मामवालोकयत्तन्मे स्मृतिपथं मुहुरारोहतीति भावार्थः । अत्र नायकगता प्रियाविषयिणी चिन्ता, नायिकागते च ह्रीप्रीत्यौ द्योत्यन्ते । लुप्तोपमालङ्कारः । पद्यमिदं रसगङ्गाधरे (पृ० २१७) पठ्यते । मालभारिणीवृत्तम् ॥ २६ ॥

कथय कथमिवाशा जायतां जीविते मे
मलयभुजगवान्ता वान्ति वाताः कृतान्ताः ।
अयमपि खलु[1] गुञ्जन्मञ्जु माकन्दमौलौ
चुलुकयति मदीयां चेतनां चञ्चरीकः ॥ २७ ॥

१. र०—कत गुञ्जत्यालि माकन्दमौलौ मनसिजमहिमानं मन्यमानो मिलिन्द ।

कथयेति । कस्याश्चिद्विरहिण्या उक्तिरियम् । हे सखि—मे जीविते प्राणेषु । कथं इव आशा जायतां—इति कथय । किमर्थमेव ब्रवीषीति चेदुच्यते—मलयभुजगवान्ताः मलयपर्वते चन्दनवृक्षेषु ये भुजगाः तैः वान्ताः उद्गीर्णाः । अत एव—कृतान्ताः यमसदृशाः प्राणहारकाः । वाताः वायवः । वान्ति । चन्दनवृक्षसंपर्केण शीता अपि भुजगैरुद्गीर्णत्वात् विषाक्ता वायवः, अत एव च यमवत्प्राणापहारिण इति भावः । तथा च—अयं अपि माकन्दमौलौ माकन्दस्य प्रफुल्लाम्रवृक्षस्य मौलौ शिखरे । आम्रमञ्जरीदर्शनं विरहपीडाप्रकर्षाधायकम् । मञ्जु मधुरं । गुञ्जन् । खलु निश्चयेन । मदीयां चेतनां संज्ञां । चुलुकयति आचामति । न केवलं मलयपवनो मम विरहवेदनामुत्पादयति, किन्तु आम्रमञ्जरीषु भ्रमरगुञ्जितं तदाधिक्यमेव पुष्णाति, अतः सखि, न मे प्राणधारणाशा विद्यत इति कस्याश्चिद्विरहिण्या उक्तिः । समु-

अथालङ्कारः। तल्लक्षणं च रसगङ्गाधरे—"युगपत्पदार्थानामन्वयः समुच्चयः"। पद्यमिदमुदाहृतं रसगङ्गाधरे (पृ० ४९३)। मालिनीवृत्तम् ॥ २७ ॥

निरुद्ध्य यान्तीं तरसा कपोतीं कूजत्कपोतस्य पुरो दधाने।
मयि स्मितार्द्रं वदनारविन्दं सा मन्दमन्दं नमयांबभूव[1] ॥ २८॥

१. वा०—दमयांबभूव।

निरुद्धेति। तरसा वेगेन—कोऽपि दृष्टवेति भावः। यान्तीं गच्छन्तीं। कपोतीं। निरुद्ध्य हस्ताभ्यां धृत्वा। कूजत्कपोतस्य कूजतः सुरतार्थं शब्दं कुर्वतः कपोतस्य। पुरः अग्रे। दधाने स्थापयति सति मयि। सा मयिया। स्मिताद्रं स्मितेन आर्द्रं स्निग्धं। वदनारविन्दं मुखकमलं। मन्दमन्दं अतिमन्थरं यथा स्यात्तथा। नमयांबभूव नम्रीचकार। कश्चिद्वायकः स्वसखायं ब्रूते—यदाहं कुपितामिव गच्छन्तीं कपोतीं सुरतोत्कण्ठितस्य कपोतस्याग्रे स्थापितवांस्तदा सा मे प्रिया मदभिप्रायविज्ञानेन हर्षेण सस्मिता तथा व्रीडया चाभिभूताभूत्—तदा स्वानन सा नमयाञ्चकारेति भावार्थः। अत्र हर्षो लेशतया सत्यपि व्रीडाया अनुगुण एव। व्रीडाख्यव्यभिचारिभावोदाहरणे पठ्यते पद्यमेतद्रसगङ्गाधरे (पृ० ७९) उपेन्द्रवज्रावृत्तम् ॥ २८ ॥

तिमिरं हरन्ति हरितां पुरःस्थितं
तिरयन्ति तापमथ तापशालिनाम्।
वदनत्विषस्तव चकोरलोचने
परिमुद्रयन्ति सरसीरुहश्रियः[1] ॥ २९ ॥

१. नि०—°श्रिय°।

तिमिरमिति ॥ नायिकां प्रति नायकस्य चाटूक्तिः। हे चकोरलोचने चकोरलोचनसदृशलोचने। तव वदनत्विषः मुखकान्तयः। हरितां दिशां। पुरःस्थितं अग्रभागवर्ति। तिमिरं अन्धकारं। हरन्ति नाशयन्ति। अथ तापशालिनां कामज्वरादितापयुक्तानां पुरुषाणां। तापं पीडां। तिरयन्ति अपसारयन्ति। तथा च सरसीरुहश्रियः सरसीरुहाणां कमलानां श्रियः विकासादिशोभाः—चन्द्रोदये कमलानां संकोचात्। परिमुद्रयन्ति आच्छादयन्ति। अत्र दिशामन्धकारनाशः, सन्तप्तानां तापनाशः, कमलानां सङ्कोचन—इति चन्द्रोदयकार्याणि तव मुखकान्तिभिरेव संपाद्यन्त इति त्वन्मुखं

चन्द्र इति रूपकं गम्यते । एतच्चातिशयोक्त्या प्राणितं, मुखेन वस्तुतोऽन्धकारादिहरणासंभवात् । उदाहृतं च पद्यमेतद्रूपकध्वन्युदाहरणे रसगङ्गाधरे (पृ० २४६) । मञ्जुभाषिणीवृत्तम् । तल्लक्षणं च—'सजसा जगौ भवति मञ्जुभाषिणी' इति ॥ २९ ॥

कुचकलशयुगान्तर्मामकीनं नखाङ्कं
सपुलकतनु मन्दं मन्दमालोकमाना[1] ।
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनताङ्गी सद्म सद्यो विवेश ॥ ३० ॥

१. नि०—°लोकयन्ती ।

कुचकलशेति ॥ बाला मुग्धा । अत एव—कुचकलशयुगान्तः कुचौ स्तनौ कलशौ इव, तयोर्युगं द्वन्द्वं, तस्यान्तर्मध्ये । मामकीनं मदीयं । नखाङ्कं नखक्षतं । सपुलकतनु हर्षात् पुलकितगात्रा । मन्दं मन्दं शनैः शनैः । आलोकमाना पश्यन्ती । मां गवाक्षे वातायने विनिहितवदनं किमिव करोतीति द्रष्टुं कुतूहलात् स्थापितमुखं मां वीक्ष्य दृष्ट्वा । चकितनतनताङ्गी चकितं आकस्मिकदर्शनात् विस्मितं नतनतं नम्रादपि नम्रं अतिविलीनं अङ्गं यस्याः सा । सद्म वासगृहं । सद्यः तत्क्षणमेव । विवेश प्रविष्टवती । कश्चिद्वायकः स्वसखाय ब्रूते—प्रथमरात्रिसुरतावसरे मद्वक्षःकुचयोर्नखक्षतमन्योपुरतेक्ष्य यदा मुग्धा मम प्रिया विस्मयहर्षावनुभवन्ती स्थितासीत्तदा कुतूहलात्तं दिक्षु वातायनस्थकरांहं मां सावलोकितवती—मद्दर्शनेन च सजातलज्जा झटिति गृहं प्रविष्टवतीति भावार्थः । व्रीडाख्यस्य व्यभिचारिभावस्योदाहरणे रसगङ्गाधरे (पृ० ७८) पद्यमेतत्पठ्यते । मालिनीवृत्तम् ॥ ३० ॥

विधाय सा मद्वदनानुकूलं[1] कपोलमूलं हृदये शयाना ।
तन्वी तदानीमतुलां बलारेः साम्राज्यलक्ष्मीमधरीचकार[2] ॥ ३१ ॥

१. बा०—मद्वचनानुकूलं । २. र०—चित्रार्पितेव तन्वी न स्पन्दितुं मन्दमपि क्षमासीत् ।

विधायेति ॥ सा तन्वी कृशाङ्गी । तदानीं विपरीतरतावसाने । कपोलमूलं चिबुकं । मद्वदनानुकूलं मम मुखस्य समीपे, चुम्बनार्थमिति भावः । विधाय कृत्वा । हृदये वक्षसि । शयाना निद्राणा—अनभिज्ञत्वात्प्रसन्निद्रा ।

बलारेः बलस्य तदाख्यस्य दैत्यस्य अरेः शत्रो इन्द्रस्येति यावत्। अतुलां अनुपमेयां साम्राज्यलक्ष्मीं साम्राज्यस्य त्रिभुवनाधिपत्यस्य लक्ष्मीं श्रियं। अधरीचकार तुच्छतां निनाय। कस्यचिन्नायकस्योक्तिः —विपरीतरतावसाने मद्वक्षसि मुखसंभोगे स्वचिबुकं निधाय यदा सा मत्प्रिया निद्रामगमत्तदाहमिन्द्रस्य त्रैलोक्यराज्यसुखमपि तुच्छमेवाभवमिति भावार्थः। पद्यमिदं तृतीयचतुर्थपादयोः पाठभेदेन श्रमाख्यस्य व्यभिचारिभावस्योदाहरणं पठ्यते रसगङ्गाधरे (पृ० ८४)। उपजातिवृत्तम् ॥ ३१ ॥

मुहुरर्थितयाद्य निद्रया मे
वत यामे चरमे निवेदितायाः।
चिबुकं सुदृशो मृशामि यावत्—
त्वयि तावन्मुदिरोऽपि[1] निर्दयोऽभूत् ॥ ३२ ॥

१. नि०—मुदितो। वै० दो०—निहिरो।

मुहुरिति। मुहुः वारं वारं। अर्थितया प्रार्थितया—मत्प्रेयसीं स्वप्नेऽपि दर्शयेति प्रार्थितया। निद्रया। चरमे निशाया अन्तिमे। यामे प्रहरे। मे मम। निवेदितायाः स्वप्नावस्थाया दर्शितायाः। सुदृशः चारुलोचनायाः। चिबुकं कपोलमूलं। यावत् मृशामि हस्तेन स्पृशामि। वत इति खेदे। तावत् मुदिरः मेघः। अपि त्वयि निर्दयः विगतानुकम्पः। अभूत्। प्रवासगतस्य स्वप्नेऽपि प्रियासङ्गमं वाञ्छतः उक्तिरियम्—प्रहरत्रयं प्रार्थितवतो मे प्रसन्ना निद्रा सा प्रेयसीं दर्शितवती किन्तु यावदेवाहं स्वहस्तस्पर्शेन तच्चिबुकोन्नयनं करोमि तावद्गर्जता घनेन निर्वासितनिद्रस्य मे पुनर्विरहः सम्पादितः। अत्र प्रियाप्रसादात्यागेन निद्राभङ्गजनितो निर्वेदो ध्वन्यते। विषादनामालंकारः। तल्लक्षणं च कुवलयानन्दे—"इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम्। दीपमुद्योजयेयावन्निर्वाणस्तावदेव सः ॥ १३२ ॥" इति। मालभारिणीवृत्तम् ॥ ३१ ॥

श्रुतिशतमपि भूयः शीलितं भारतं वा
विरचयति तथा नो इन्त सन्तापशान्तिम्।

अपि सपदि यथायं केलिविश्रान्त[1] कान्ता—
वदनकमलवल्गत्[2]कान्तिसान्द्रो नकारः ॥ ३३ ॥

१. वा०—"विश्रान्ति" । २ वा०—"कमलनिर्यत्"

श्रुतिशतेति । श्रुतिशतं श्रुतीनां वेदादीनां शतम् । अपि भूय बहुवार, नैकवारमित्यर्थः । शीलितं अभ्यस्तं । वा अथवा । भारतं अनेकधा परिशीलितमिति शेष । हन्त इति खेदे । सन्तापशान्तिं दुःखशमनं । तथा नो नैव । विरचयति करोति । यथा अयं । केलिविश्रान्तकान्तावदनकमलवल्गत्कान्तिसान्द्रः केलिविश्रान्तायाः सुरतखिन्नायाः कान्तायाः वदनकमलात् मुखपद्मात् वल्गन्ती बहिः प्रसरन्ती या कान्तिः शोभा तया सान्द्रः पूरितः, अतिमधुर इति यावत् । नकारः निषेधसूचिका वाक् । अपि । सपदि झटिति । सन्तापशान्तिं विदधातीति शेषः । वेदमहाभारतादीनां पुनः पुनरनुशीलनेन नहि तादृशी मनःशान्तिरुपलभ्यते यादृशी रतिखिन्नकान्तामुखाब्जि सरतो निषेधवाक्यस्यापि श्रवणेनोत्पद्यते, किं पुनर्वक्त्रस्थादि स्वीकृतिसूचको हकारः श्रूयेत, इति भावार्थः । विशेषालंकारः । मालिनीवृत्तम् ॥ ३३ ॥

लवलीं तव लीलया कपोले
कवलीकुर्वति कोमलत्विषा ।
परिपाण्डुरपुण्डरीकखण्डे[1]
परिपेतुः परितो महाभयः ॥ ३४ ॥

१. वा०—"कण्डे ।

लवलीमिति । कस्याश्चित्सख्या नायिकां प्रति चाटूक्तिः । हे सखि—तव कपोले । लीलया अनायासेन । कोमलत्विषा करणभूतया कोमलकान्त्या लवलीं श्वेतवर्णां तदाख्यां लतां । कवलीकुर्वति ग्रसति सति—स्वशुक्लतया पराजितवति सति । परिपाण्डुरपुण्डरीकखण्डे परिपाण्डुरः अत्युज्ज्वलः पुण्डरीकाणां शुक्लकमलानां खण्डं समूहः, तस्मिन् । परितः सर्वतः । महाभयः बहुविधा मानसीर्व्यथाः । परिपेतुः निपतिताः । यदा तव कपोलः स्वशुभ्रतया अत्यन्तशुभ्रां लवलीलतामधरीचकार, तदा लवल्यपेक्षया न्यूनतरशुभ्रतानां श्वेतकमलानां महती चिन्ता समजनि—अस्माकं पराजयः

सुकर प्रत्यासन्नमेति बहुदुःखितमभूत् पुष्करिकजातम्—इति भावार्थः। अत्रपूर्वोत्तरार्धयोर्लोकारपकारयोरनुप्रासः सुतरां चमत्कृतिकृत्। अतिशयोक्तिश्चालंकारः। मालभारिणीवृत्तम् ॥ ३४ ॥

यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः।
संकुचन्ति विकसन्ति[1] राघवे जानकीनयननीरजश्रियः ॥३५॥

१. वा०—विकुचन्ति।

यौवनेति। जानकीनयननीरजश्रियः जानक्याः सीतायाः नयननीरजयोः नेत्रकमलयोः श्रियः कान्तयः। यौवनोद्गमनितान्तशङ्किताः रामचन्द्रगतस्य यौवनस्य उद्गमेन तारुण्यप्राप्त्या नितान्तं अत्यन्तं शङ्किताः सजातव्रीडाः। राघवे रामचन्द्रविषये। संकुचन्ति सङ्कोचं प्राप्नुवन्ति। तथा—शीलशौर्यबलकान्तिलोभिताः शीलं सदाचारः, शौर्यं वीरता, बलं शक्तिः, कान्तिः सौन्दर्यं, तैः लोभिताः आकृष्टाः। विकसन्ति विकासं प्राप्नुवन्ति। पद्येऽस्मिन् भावसन्धिर्वर्णितः—उक्तं च जगन्नाथेन (र. गं., पृ० १०३)—"अत्र भावद्वयाश्रयिणस्य लोकोत्तरयौवनोद्गमस्य, तादृशस्यैव शीलशौर्यादेश्च दर्शनं विभावः। नयनगतसंकोचविकासावनुभावः। व्रीडौत्सुक्ययोः संभिन्नत्वम्।" लक्षणं चोक्तम्—'भावसन्धिरन्योन्यानभिभूतयोरन्योन्याभिभावनयोग्ययोः सामानाधिकरण्यम्' इति। तथा चात्र यथासंख्यालंकारः। तथा चोक्तं रसगङ्गाधरे (पृ० ४०६–७)—"'अपदेशक्रमेणार्थानां सम्बन्धो यथासंख्यम्।'. अत्र यौवनोद्गमनितान्तशङ्किताः संकुचन्ति, शौर्यबलकान्तिलोभिता विकसन्तीति प्रथमद्वितीयक्रियाणां क्रमेण प्रथमद्वितीयविशेषणावच्छिन्नेन कर्त्रान्वयः। स च शाब्दः। समासाभावेन शब्दानामप्यन्वयात्॥" रथोद्धतावृत्तम्। 'राजरातिह रथोद्धता लगौ' इति लक्षणम् ॥ ३५ ॥

अधिरोप्य हरस्य हन्त[1] चापं
परितापं प्रशमय्य बान्धवानाम्।
परिणेष्यति वा न वा युवायं[2]
निरपायं मिथिलाधिनाथपुत्रीम् ॥ ३६ ॥

१. वा०—हृत्त०। २. लिङ्गानां।

अधिरोप्येति । विदेहाधिपतेर्धनुर्यज्ञे पिनाकारोपणोक्तं रामनुद्दिश्य मिथिलास्थजनोक्तिः । हन्त इति खेदे । हरस्य शङ्करस्य । चापं धनुः पिनाकमिति यावत् । अधिरोप्य अधिज्यं कृत्वा । बान्धवानां विश्वामित्रादीनां । परितापं चापारोपणे समर्थो भविष्यति न वेति शङ्कां । प्रशमय्य निरस्य । अयं पुरो दृश्यमानः । युवा रामचन्द्रः । मिथिलाधिनाथपुत्री जनकतनया सीता । निरपायं निर्विघ्नं । परिणेष्यति दारान् न वा । इति सन्देहः । शैवं धनुरारोप्य तथा स्वबान्धवानां मनश्चिन्तामपहृत्य निर्विघ्नं सीता पाणिग्रहणं करिष्यत्यथवा रामो न वेति मिथिलास्थजनानां संशयोक्तिः । संशयास्पदस्य व्यभिचारिभावस्य ध्वनिरत्र । न चात्र संसन्देहालंकारः, सादृश्याभावात् । एवमिदं रसगङ्गाधरे (पृ० २५६) संसन्देहालंकारस्य प्रत्युदाहरणे पठ्यते । मालभारिणीवृत्तम् ॥ ३६ ॥

भुजपञ्जरे गृहीता नवपरिणीता वरेण रहसि[1] वधूः ।
तत्कालजालपतिता बालकुरङ्गीव वेपते नितराम्[2] ॥ ३७ ॥

१. बा०-चिरेण दहति । २. बा० बाला ।

भुजेति ॥ नवपरिणीता नवोढा—अत एव सुरतरसानभिज्ञा । वधूः भार्या । रहसि एकान्ते । वरेण पत्या । भुजपञ्जरे बाहुद्वयमध्ये । गृहीता गाढमाश्लिष्टा । तत्कालजालपतिता तत्काल अकस्मादित्यर्थः, जाले बन्धने पतिता बद्धा । बालकुरङ्गी बालमृगी । इव । नितरां अत्यर्थं । वेपते कम्पते । अनाज्ञातरतिस्वादा मुग्धा नायिका वरेण गाढमाश्लिष्टा कम्पते—इति भावार्थः । एवमिदं शृङ्गाराभासोदाहरणत्वेन रसगङ्गाधरे (पृ० १००) पठ्यते । उक्तं च तत्र—'अत्र रतेर्नवधूत्वा मनागप्यस्पर्शादनुभयनिष्ठत्वेनाभासत्वम्' इति । अत्र पूर्वार्धे भुजपञ्जर इति रूपकं, द्वितीयार्धे तूपमा । गीतिवृत्तम् ॥ ३७ ॥

उपनिषद् परिपीता गीतापि च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानसमदनाद् बहिर्याति ॥ ३८ ॥

उपनिषद् इति । उपनिषदः कर्तृकेनाधः । परिपीताः जलवत् स्वोदरस्थाः कृताः, सम्यगधीता इत्यर्थः । गीता भगवद्गीता । अपि च । हन्त इति खेदे । मतिपथं बुद्धिमार्गं । नीता सम्यक् परिशीलितेत्यर्थः । एवं

सत्यपि वेदान्तज्ञानोपकरणस्य सम्यगनुशीलने। तदपि तथापि। विधुवदना चन्द्रमुखी नायिका। मानससदनात् मनोगृहात्, अन्तःकरणात्। बहिर्न याति। हा इति खेदे। यद्यपि उपनिषदादिवेदान्तग्रन्थमनन मया सम्यगनुष्ठितं, तथापि विषयवैमुख्य न मे समुज्जृम्भते, प्रत्युत मनोऽन्तःकरण तामेव चन्द्रवदनामहर्निशं स्मरति इति भावार्थः। अत्र सत्यप्युपनिषदाद्यध्ययनरूपे विषयवैमुख्यकारणे समुपस्थिते, कान्ताविस्मृतिरूपकार्यानुदयात् विशेषोक्तिरलङ्कारः। पद्यमिदं रसगङ्गाधरे (पृ. ३३०) विशेषोक्त्युदाहरणे पठ्यते। तल्लक्षणं च तत्रैव—"प्रसिद्धकारणकलापसामानाधिकरण्येन वर्ण्यमाना कार्यानुत्पत्तिर्विशेषोक्तिः" इति। आर्यावृत्तम् ॥ ३८ ॥

अकरुणहृदय प्रियतम मुञ्चामि त्वामितः[1] परं नाहम्।
इत्यालपति कराम्बुजमादायालीजनस्य विकला सा ॥ ३९ ॥

१. बा०—त्वागतः।

अकरुणेति। अत्र काचित् दूती विरहजनिता नायिकाया उन्मादावस्थां नायकसमीपे वर्णयति। हे अकरुणहृदय नास्ति करुणा दया हृदये यस्य तत्सम्बुद्धौ। ईदृशावस्थामपि मां विहाय गतोऽसीति यावत्। प्रियतम कान्त। इतः परं अहं त्वां न मुञ्चामि त्यजामि। इति सा तव प्रिया नायिका। विकला विरहोन्मत्ता सती। आलीजनस्य सखीजनस्य। कराम्बुजं हस्तकमलं। आदाय गृहीत्वा। आलपति प्रलापं करोति। विरहोद्वेगात सखीजन कान्तं मन्यत इत्यर्थः। पद्यमिदं रसगङ्गाधरे (पृ. ९०) उन्मादाख्यस्य व्यभिचारिभावस्योदाहरणे पठ्यते। तल्लक्षणं च—'विप्रलम्भमहापत्तिपरमानन्दादिजन्मान्यत्तिजन्यावस्थाविशेष उन्मादः।' विशदीकृतं च जगन्नाथेन—'एषा प्रकरणगत स्वनायिकावृत्तान्त वृन्दन्त नायकं प्रति कस्याश्चित्सखेदं हारिण्या उक्तिः। प्रियविरहोऽत्र विभावः। असकृदुक्तिरनुभावः' इति। न चात्र भ्रान्तिमानलङ्कारः, तस्य सादृश्यप्रयोज्यत्वादिति च रसगङ्गाधरे (पृ. २६६) व्यक्तीकृतम्। गीतिवृत्तम् ॥ ३९ ॥

लोभाद्घराटिकाना विक्रेतुं तक्रमानिशमटन्त्या[1]।
लब्धो गोपकिशोर्या मध्येरथ्यं महेन्द्रनीलमणिः ॥ ४० ॥

१. नि०—तक्रमक्रममटन्त्या।

लोभादिति । वराटिकानां कपर्दिकानां । लोभात् कपर्दिका' लप्स्यन्ते इत्याशया । तक्रं विक्रेतुं । आनिशं रात्रिपर्यन्तं । अटन्त्या भ्रमन्त्या । गोपकिशोर्या गोपालकन्यया । मध्येरथ्यं रथ्यायाः वीथ्याः मध्ये । महेन्द्रनीलमणिः महार्घो रत्नविशेषः श्रीकृष्ण इत्यर्थः । लब्धः प्राप्तः । तक्रविक्रयाय भ्रमन्त्या गोपकुमार्या मार्गे श्रीकृष्णः प्राप्त इति भावार्थः । अत्रेन्द्रनीलमणिना कृष्णवर्णस्य भगवतो वासुदेवस्य निगरणात् निगीर्याध्यवसानरूपातिशयोक्तिः । वराटिका अन्विष्यन्त्या मणिर्लब्ध इति वाञ्छितार्थादधिकलाभलाभः प्रहर्षणालङ्कारः । उदाहृतं पद्यमेतत्प्रहर्षणालङ्कारे रसगङ्गाधरे (पृ० ५०४) । तल्लक्षणं च तत्रैव—" साक्षात्प्रयुद्देश्यकयत्नमन्तरेणाप्यभीष्टार्थलाभः प्रहर्षणम् " इति । गीतिवृत्तम् ॥ ४० ॥

रूपारुचिं निरसितुं रसयन्त्या हरिमुखस्य लावण्यम् ।
सुदृशः शिव शिव[1] सकले जाता सकलेवरे जगत्यरुचिः ॥४१॥

This verse is omitted in मा० । १. नि०—शिव शिव सुदृशः ।

रूपेति ॥ रूपारुचिं रूपे सौन्दर्ये अरुचिः अप्रीतिः, द्वेष इति यावत्, तां । निरसितुं दूरीकर्तुं । हरिमुखस्य श्रीकृष्णमुखस्य । लावण्यं सौन्दर्यम् । रसयन्त्याः आस्वादयन्त्याः, कस्याश्चित् । सुदृशः शोभनलोचनायाः नायिकायाः । शिव शिव इति खेदे । सकले समग्रे । सकलेवरे स्वशरीरसहिते । जगति इहलोके । अरुचिः अप्रीतिः । जाता उत्पन्ना । यथा कश्चित्कस्मिंश्चिदपि खाद्ये वस्तुनि जातद्वेषः, तत्र रुचिमुत्पादयितुं लवणमास्वादयति, तथा सौन्दर्ये जातद्वेषा काचिन्नायिका भगवन्मुखलावण्यास्वादने प्रवृत्ता, किन्तु तत्फलं विपरीतमेव जातम् , न केवलं सौन्दर्ये रुचिर्नोत्पन्ना, अपि तु स्वशरीरेऽप्यरुचिरुदपद्यत —अर्थाद्भगवद्दर्शनेन ब्रह्मप्राप्तिरूपसकलैहिकवस्तुजाते चौदासीन्यमिति । उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ० ४४५) विषमालङ्कारे । ' अननुरूपसंसर्गो विषमम् ' इति लक्षणं कृत्वा तत्रैवाह जगन्नाथः— ' स्वस्य दुःखसाधनवस्त्वनिवृत्तिदुःखान्तरसाधनावाप्तिरूपद्वयम् । अत्र यद्यपि ब्रह्मदर्शनोत्तरं जातायामपि जगति वैराग्यलक्षणायामरुचौ भगवद्वदनलावण्यदर्शनाद्रूपारुचिर्विलक्षणा या काचित्सा निवृत्तेवेति वक्तुं शक्यते, तथापि जगदरुचित्वेन सकलारुचीनामभेदाध्यवसायाद्रूपारुचिनिवृत्तेरप्रत्यय एव ।

अन्यथा सुखहेतोर्वैराग्यलक्षणाया अरतेर्दुःखान्तरसाधनत्वं दुरपपादं स्यादिति भवत्युभयोदाहरणम्।' गीतिवृत्तम् ॥ ४१ ॥

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णमिति ।
तद्यदि पतति हुताशे तदा हताशे तुलां तवारोहेत् ॥ ४२ ॥

किमिति । नायिकां प्रति नायकस्य चाटूक्तिरियम् । हन्त इति हर्षे । मम अङ्गं । सुवर्णवर्णं सुवर्णतुल्यवर्णं । इति मुग्धतया सारल्येन । किं वदसि । हे हताशे नष्टा, सुवर्णस्य तुल्यस्य मम शरीर इति आशा यस्या सा, तत्सम्बुद्धौ । तत् सुवर्णं । यदि हुताशे अग्नौ । पतति । तदा तव तुलां साम्यं । आरोहेत् प्राप्नुयात् । मम शरीरं सुवर्णरूपमिति कथनं तवातिलाघवकारि, अग्निविशुद्धं तत् त्वदवयवानां साम्यं प्राप्तुं शक्नोति नान्यथेति भावार्थः । अत्रोपमानभूतं सुवर्णं द्वितीयार्थे यथास्थितमेवोपमेयीक्रियते, उपमेयभूतं च नायिकाङ्गमुपमानीक्रियते । अतोऽत्र प्रतीपालङ्कारः । तल्लक्षणं च रसगङ्गाधरे—'प्रसिद्धौचित्यवैपरीत्येन वर्ण्यमानमौपम्यमेव प्रतीपम्' इति । एतदुदाहरणव्याख्याने चाह जगन्नाथः (पृ. ४९६)—'अत्र पूर्वार्धोपमानभूतं सुवर्णाक्षिप्तं तिरस्कृत्य द्वितीयार्धे प्रतीपं बालाङ्गवर्णस्याधिक्यं गमयति । हुताशपातं विना प्रतीपमपि दुर्लभम् । उपमातुं स्वप्नेऽपि न संभवतीति मुग्धत्वहताशत्वाभ्यां गम्यते' गीतिवृत्तम् ॥ ४२ ॥

औत्सुक्यात्परिमिलतां जगया संकोचमञ्चतां च मुहुः ।
नवसंगमयोर्यूनोर्नयनानामुत्सवो जयति ॥ ४३ ॥

औत्सुक्यादिति । औत्सुक्यात् दर्शनोत्कण्ठया । परिमिलतां संगच्छतां । जगया लज्जया । च । मुहुः वारं वारं । संकोचं अपसरणभावं । अञ्चतां प्राप्नुवतां । नवसंगमयोः नवः संगमः मिलनं ययोः तयोः । यूनोः युवा च युवतिश्च तयोः । नयनानां नेत्राणां । उत्सवः आनन्दः । जयति विशेषेण वर्तते । इदयोः प्रथममिलनप्रसङ्गे दर्शनोत्कण्ठया नयनानि संगतानि भवन्ति, पुनश्च स्वभावसुलभलज्जया संकोचं प्राप्नुवन्ति—एतादृशो नयनानन्दोऽत्यर्थं रमणीय इति भावार्थः । स्वभावोक्तिरलङ्कारः । आर्यावृत्तम् ॥ ४३ ॥

गरिमाणमर्पयित्वा लघिमानं कुचतटात्कुरङ्गदृशाम्[1] ।
स्वीकुर्वते नमस्ते धूर्तां धैर्याय निर्विवेकाय ॥ ४४ ॥

१. प., वै., शै०—°सरोजदृशाम् ।

गरिमाणमिति । गरिमाणं गुरुत्वं, आत्मन इति शेषः । अर्पयित्वा दत्त्वा—कुचतटादिति शेषः । कुरङ्गदृशाम् मृगनयनानां । कुचतटात् स्तनप्रदेशात् । लघिमानं लघुत्वं । स्वीकुर्वते गृह्णते । निर्विवेकाय विचारशून्याय । धूर्तां । धैर्याय साहसाय । ते तुभ्यं । नमः । हे धूर्तजनसाहस, नितरामविमृश्यकार्यसि त्वं यन्मृगाक्षीणां स्तननिष्ठं लघुत्वमादाय स्वनिष्ठं गुरुत्वं स्तनयोरर्पयसि । यथा यथा नायिकायाः कुचद्वन्द्वं लघुभावं त्यजद्गुरुभावमापद्यते तथा तथा धूर्तो मनो गाम्भीर्यरूपं गुरुभावं त्यजद्विकाररूपं लघुभावं प्राप्नोतीति भावः । धैर्यस्य लघुगुरुविनिमयेन निर्विवेकत्वम् । परिवृत्त्यलङ्कारः । 'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः' इति काव्यप्रकाशे । उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ. ४८२) । गीतिवृत्तम् ॥ ४४ ॥

न्यञ्चति[1] वयसि प्रथमे समुदञ्चति[2] तरुणिमनि सुदृशः ।
दधतिस्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च[3] भृशम्[4] ॥ ४५ ॥

वा० Reads this verse after the next one. १ वा०—भवति । २. र०—Adds after it किं च । ३. नि०—चाक्षतां च । ४ र० Reads the second hna वहसति कापि शोभा वचसा च दृशां च विभ्रमाणां च, but gives our reading also in the comment

न्यञ्चतीति । सुदृशः चारुलोचनायाः । प्रथमे वयसि बाल्ये । न्यञ्चति ह्रासं गच्छति सति । तथा तरुणिमनि यौवने । समुदञ्चति आविर्भवति सति । वाचः गिरः । गतयः गमनानि । विभ्रमाः विलासाः । च । भृशं अत्यर्थं । मधुरिमाणं मधुरत्वं । दधति स्म धारयति स्म । वयःसंधिवर्णनम् । उत्तरार्धे प्रकृतानां वाग्गतिविभ्रमाणामेकयैव 'मधुरिमाणं दधति' इति गुणविशिष्टया क्रियया योगात् तुल्ययोगितालङ्कारः । उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ. ३१८) । तत्रैव तुल्ययोगितालक्षणं च—'प्रकृतानामेवाप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वयस्तुल्ययोगिता' इति । गीतिवृत्तम् ॥ ४५ ॥

निःसीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम्।
अन्योन्यालोकनानन्दविरहादिव चञ्चलम् ॥ ४६ ॥

निःसीमेति। नताङ्ग्या यौवनभरनतायवयवाया. नायिकाया। नयनद्वयं लोचनयुगं। निःसीमशोभासौभाग्यं निःसीम अमर्यादं शोभायाः सौन्दर्यस्य सौभाग्यं सवद् यस्य तद्—अनन्तसौन्दर्यसुतमित्यर्थः। अन्योन्यालोकनानन्दविरहात् अन्योन्यालोकने परस्परदर्शने य आनन्दः तस्य विरहात् अभावात्। इव। चञ्चलम् इत्युत्प्रेक्षा। स्वभावतश्चञ्चलं कामिनीनयनयुग, परस्परदर्शनाभावहेतुना तादृशमिति कविनोत्प्रेक्ष्यते। एष चैतद्रसगङ्गाधरे (पृ० २९४) [आनन्दरूप-] गुणाभावस्य हेतूत्प्रेक्षामुदाहृतवते। अनुष्टुब्वृत्तम् ॥ ४६ ॥

गुरुमध्ये हरिणाक्षी मार्तिकशकलैर्निहन्तुकामं[1] माम्।
रदयत्रितरसनाग्रं[2] तरलितनयनं निवारयांचक्रे ॥ ४७ ॥

१. र०—कमकाक्षी कमकाक्षेण प्रहर्तुकाम। नि०—विहन्तुकामं। २. वा०—रदयत्रिव रसनाग्रं।

गुरुरिति। गुरुमध्ये गुरुणा गुरुवादीना मध्ये स्थितेति शेष। हरिणाक्षी मृगनयना। मार्तिकशकलैः मृत्तिकाया इमानि तानि च तानि शकलानि चेति तथा तैः। मृद्घोटखण्डैरित्यर्थः। निहन्तुकामं प्रहर्तुकाम। मा वीक्ष्येति शेषः। रदयत्रितरसनाग्रं रदै दन्तै यन्त्रित धृत रसनाग्र जिह्वाग्रं यस्मिन् कर्मणि यथा तथा। तरलितनयनं तरलिते चालिते नयने यस्मिन्कर्मणि तथा तथा। निवारयांचक्रे प्रतिषिद्धवती। सुगमो भावार्थः। स्वभावोक्तिरलङ्कारः। उदाहृत चैतत्पञ्चमपंक्त्यक्तिगुणोदाहरणे रसगङ्गाधरे (पृ० ६०)। तल्लक्षणं च—'वस्तुनो वर्णनीयस्यासाधारणक्रियारूपयोर्वर्णनमर्थव्यक्तिः।' उक्त च ग्रन्थकृता तत्र 'अयमेवेदानीतनै स्वभावोक्त्यलङ्कार इति व्यपदिश्यते'। गीतिवृत्तम् ॥ ४७ ॥

नयनाञ्चलावमर्शं वा न कदाचित्पुरा सेहे।
आलिङ्गितापि जोषं तस्यौ[1] सा भन्तुकेन दयितेन ॥ ४८ ॥

१. नि०—तस्थौ साग्रं, it omits जोषं।

नयनेति । या नायिका । पुरा संयुक्तावस्थायां । कदाचित् अपि । नयनाञ्चलावमर्शं लोचनपक्ष्मस्पर्शं । न सेहे न सोढवती । सा एव । अधुना मन्युकेन प्रवासोद्युक्तेन । दयितेन प्रियेण । आलिङ्गिता अपि । जोषं तूष्णीं । तस्थौ स्थिता । या खलु नायिका पुरा संयोगावस्थायां स्वाभाविकचाञ्चल्यवशात् अक्षिपक्ष्मस्पर्शं न सोढवती, सैवेयं प्रवासार्थं गच्छता प्रियेणालिङ्गितापि न किंचिद्वदतीति भावः । प्रवासविप्रलम्भशृङ्गारोदाहरणमिदं रसगङ्गाधरे (पृ० ३५) पठ्यते । अत्र च सहजचाञ्चल्यनिवृत्तिर्जडता च नायिकागते स्पष्टे । गीतिवृत्तम् ॥ ४८ ॥

मानपराग्वदनापि प्रिया शयानेव दयितकरकमले[1] ।
उद्वेल्लद्भुजमलसग्रीवाबन्धं कपोलमाधत्ते ॥ ४९ ॥

१. नि०—दयित करकमले ।

मानेति । मानपराग्वदना मानेन प्रणयकोपेन पराग्वदना पराङ्मुखी । अपि । प्रिया कान्ता । शयाना इव निद्राव्याजेनेति यावत् । उद्वेल्लद्भुजं उद्वेल्लन् चञ्चल भुजो यस्मिन्कर्मणि यथा तथा । अलसग्रीवाबन्धं अलसः शिथिलः ग्रीवाया बन्धो यस्मिन्कर्मणि यथा तथा । दयितकरकमले प्रियतमहस्ते । स्वकीयं कपोलं । आधत्ते स्थापयति । काचिन्नायिका प्रणयकुपितापि दयिताश्लेषसुखमिच्छन्ती निद्राव्याजेन प्रियतमकरकमले स्वकपोलं निधत्ते । एतेनैतादृश प्रियतमसौभाग्य सूचित भवति येन मानिनी क्षणमपि मानधारणे असमर्था । उद्वेल्लद्भुजमलसग्रीवाबन्धमिति क्रियाविशेषणे निद्रामिव पोषयत । गीतिवृत्तम् ॥ ४९ ॥

लोचनफुल्लाम्भोजद्वयलोभान्दोलितैकमनाः ।
कस्तूरीतिलकमिषादयमलिकेऽलिस्तयोल्लसति ॥ ५० ॥

लोचनेति । नायिकां प्रति नायकस्य चाटूक्तिः । लोचनफुल्लाम्भोजद्वयलोभान्दोलितैकमनाः लोचने एव फुल्लाम्भोजद्वयं विकसितपद्मयुगलं तयोः लोभः, तेन आन्दोलित तरलित—अस्मिन् पद्मे निवसामि, इतरस्मिन्नेति संशयारूढ, एकमेव मन यस्य सः । अलिः भ्रमरः । तव । अलिके ललाटे—मध्यभागे इत्यर्थः । कस्तूरीतिलकमिषात् कस्तूरीतिलकव्याजात् । उल्लसति शोभते । विकसितपद्मसदृश तव लोचनद्वयं दृष्ट्वा कस्तूरीतिलकस्थिति-

नीत्यनिश्चितमना अगरोऽयं मध्यस्थित इव दृश्यते—इति कस्तूरीतिलकापह्नव कृतः कविना। अपह्नुतिरलङ्कारः। तल्लक्षणं च काव्यप्रकाशे—'अपह्नुतिरपह्नुत्य किंचिदन्यप्रदर्शनम्' इति। आर्यावृत्तम् ॥ ५० ॥

अधिरजनि प्रियसविधे कथमपि संवेशिता गुरुभिः।
किं भविताऽसि सशङ्कं पङ्कजनयना परामृशति ॥ ५१ ॥

अधिरजनीति। अधिरजनि रात्रौ। गुरुभिः मातापितृभिः पूज्यैः जनैः। प्रियसविधे कान्तसमीपे। कथमपि महता कष्टेन। संवेशिता स्थापिता। पङ्कजनयना कमलाक्षी। किं भविता किमाचरिष्यति। इति सशङ्कं सभयं। परामृशति विचारयति। अनभिज्ञातपतिसंगमारम्भाया. परमुः सविधे प्रथमवारं निवेशिताया नवोढाया मुग्धावस्था व्यज्यतेऽत्र। आर्यावृत्तम् ॥ ५१ ॥

चिन्तामीलितमानसो मनसिजः सख्यो विहीनप्रभाः
प्राणेशः प्रणयाकुलः पुनरसावास्तां समस्ता कथा।
एतत्त्वां प्रतिबोधयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति ॥ ५२ ॥

चिन्तेति। मानिनीं प्रति कस्याश्चिदुक्तिः। मनसिजः कामः। चिन्तामीलितमानसः चिन्तया, कथमहमिमां जेतुं समर्थः स्यामितीदृश्या, मीलितं मुग्धं, विरतव्यापारं, मानसं यस्य सः। सख्यः। विहीनप्रभाः स्वकथनस्य वैफल्यात् निस्तेजस्काः। प्राणेशः प्रियः। प्रणयाकुलः प्रेमव्याकुलः, प्रणतिपर इत्यर्थः। भवतु—इयं समस्ता सभा। कथा आस्तां तिष्ठतु। चेत् यदि। त्वं मम उक्तिं वचनं। हितां हितमदां। मन्यसे अवधारयसि। तर्हि त्वां एतत् प्रतिबोधयामि निवेदयामि—हे मुग्धे मूढे। मानं मा कुरु। नोचेत्। इदं तव आननं मुखं। राकापतिः चन्द्रः। जेष्यति—सति माने मुखस्य मलीमसत्वाच्चन्द्रः साम्यं प्राप्स्यति। तव मानापनोदार्थं चिन्ताव्याकुलो मदनः, स्वप्रयत्नवैफल्यान्निस्तेजस्कास्त्वत्सख्यः, प्रियोऽपि प्रणतिपरः—सर्वमेतत्तिष्ठतु, किन्तु मानात्पूर्वं त्वदाननेन सकलकुमुदबन्धो जित आसीत्, अधुना यदि मानमाचरसे तर्हि त्वन्मलिनमुखसादृश्यं भजमानश्चन्द्रस्त्वां जेष्यतीति हितं मे वचनमवधार्यं मन्यतां मान इति भावार्थः।

पद्यमेतद्रसगङ्गाधरे (पृ. ६५) माधुर्यौजःप्रसादाख्यगुणत्रयाभिव्यञ्जन उदाहृतम् । तथा चोक्तं ग्रन्थकृता—"अत्र सर्वावच्छेदेन प्रसादाभिव्यञ्जकत्वं । अंशभेदेन तु माधुर्यौजोभिव्यञ्जकत्वमपि । मनसिजान्तरप्र मा कुर्वदिश माधुर्याभिव्यक्तिहेतुत्वात् । सख्य इत्यादेरोजोगमकत्वात् । नन्वत्र शृङ्गाराश्रयस्य माधुर्यस्याभिव्यक्तये तदनुकूलास्तु नाम रचना, ओजसस्तु क प्रसङ्गो यदर्थं तदनुकूलवर्णविन्यास इति चेत् । नायिकामानोपशान्तये कृतानेकयत्नास्तदीय हितमुपदिशन्त्याः सख्या तत्रोपस्वरस्य व्यञ्जनीयतया तथाविन्यासस्य साफल्यात्" इति । शार्दूलविक्रीडितं छन्दः ॥ ५२ ॥

अलंकर्तुं कर्णौ भृशमनुभवन्त्या नवरुजं[1]
ससीत्कारं तिर्यग्वलितवदनाया मृगदृशः ।
कराब्जव्यापारानतिसुकृतसारान्रसयतो
जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः ॥ ५३ ॥

१. ख. "रुजां । नि०-"रुच ।

अलंकर्तुमिति ॥ इयं कस्यचित्कामिनीकर्णभूषणं प्रत्युक्तिः । हे ललितोत्तंस रमणीय कर्णभूषण । कर्णौ अलंकर्तुं तव धारणेन भूषयितुं । भृशं अत्यन्तं । नवरुजं नूतनां पीडां । अनुभवन्त्याः अलंकाराणां प्रथमधारणे क्लेशः प्रसिद्ध एव । ससीत्कारं सीत्कारपूर्वकं यथा स्यात्तथा । तिर्यग्वलितवदनायाः तिर्यक् वक्रं यथा स्यात्तथा वलितं परिवर्तितं वदनं मुखं यया तस्याः । मृगदृशः हरिणाक्ष्या नायिकाया । अतिसुकृतसारान् महत पुण्यस्य सारान् फलभूतान् । कराब्जव्यापारान् हस्तकमलयोः चेष्टा । रसयतः आस्वादयत । भवतः । जनुः जन्म । सर्वश्लाघ्यं सर्वजनैः स्तुत्यं । जयति सर्वोत्कर्षेण वर्तत इत्यर्थः । अत्र नवोढया कामिन्या प्रथममेव क्लेशेन कर्णे धार्यमाणस्योत्तंसस्य वृत्तांतः प्रत्यग्रखण्डिताधरकामुकवृत्तान्ताभेदेन स्थितः । सा हि अधरखण्डनकाले नवरुजमनुभवति ससीत्कारं वदनं परावर्तयति नायके करकमलं व्यापारयति । अत्र प्रस्तुते उत्तंसवृत्तांते अप्रस्तुतकामुकवृत्तांतस्यारोपेण समासोक्तिरलङ्कारः । कामिनीविषयं कामुकगतोऽभिलाषश्च व्यज्यते । उदाहृतं पद्यमेतद्रसगङ्गाधरे (पृ० ३७७) समासोक्तौ । शिखरिणीवृत्तम् ॥५३॥

आयातैव निशा निशापतिकरैः कीर्णं[1] दिशामन्तरं[2]
भामिन्यो भवनेषु भूषणगणैरङ्गान्यलंकुर्वते[3] ।
मुग्धे[4] मानमपाकरोषि न मनागद्यापि रोषेण ते
हा हा बालमृणालतोऽप्यतितरां[5] तन्वी तनुस्ताम्यति[6] ॥५४॥

१. नि०—पूर्णं । २. बा०—°मन्दिरं । ३. र०—भूषणगणैरङ्गान्यलंकुर्वन्ति प्रियम् । ४. र०—बाले । ५. र०—°तमां । ६. नि०—तनुः ताम्यति ।

आयातैवेति । मानिनीं प्रति सखीजनस्योक्तिः । हे मुग्धे मूढे । निशा रात्रिः । आयाता एव तव मानापनोदकरणे इयान् कालो व्यतीत—इत्यर्थः । तथा च—दिशां अन्तरं अन्तराल । निशापतिकरैः चन्द्रकिरणैः । कीर्णं व्याप्तम् । एतत्फलत्वेन च—भामिन्यः कोपस्वभावा अपि कामिन्यः । भवनेषु स्वस्वगृहेषु । प्रियसङ्गमार्थं भूषणगणैः अङ्गानि अलंकुर्वते स्वप्रसाधने रता इत्यर्थः । त्वं पुनः अद्यापि । मानं स्वयौवनादिगर्वं प्रणयकोपं वा । मनाक् ईषत् । न अपाकरोषि न त्यजसि । हा हा इति खेदे । रोषेण क्रोधेन । बालमृणालतः अभिनवमृणालात् । अपि । तन्वी कोमला । ते तनुः शरीरं । ताम्यति ग्लानतां भजते । तव प्रसादने रतायामस्याः रात्रिर्जाता, ज्योत्स्ना चाम्बरं जातं, अन्याश्च स्त्रियः परित्यक्तकोपाः प्रियमिलनार्थमात्मप्रसाधने लग्नाः परिदृश्यन्ते, त्वं पुनस्तथैव कुपिता तिष्ठसि, हे मुग्धे एवं च कोमलं ते शरीरं ग्लानिमापद्यते, अतो मानं त्यजेति भावार्थः । पद्यमेतद्वैदर्भीवृत्तेरुदाहरणत्वेन पठ्यते रसगङ्गाधरे (पृ० ७३) । लक्षणं च तस्यास्तत्रैव—" एभिर्विशेषणैः सामान्यैरपि न दूषणं रहिता । माधुर्यभारभङ्गुरसुन्दरपदवर्णविन्यासा ॥ व्युत्पत्तिमुद्रिन्ती निर्मातुर्या प्रसादकृता । तां विदुषा वैदर्भीं वदन्ति वृत्तिं गृहीतपरिपाकाम् ॥ " इति । शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

वाचो माङ्गलिकीः[1]-प्रयाणसमये जल्पत्यनल्पं जने
केलीमन्दिरमारुताधनमुखे विन्यस्तवक्त्राम्बुजा[2] ।
निःश्वासस्खलिताधरं परिपतद्बाष्पार्द्रवक्षोरुहा
बाला लोलविलोचना शिव शिव प्राणेशमालोकते ॥५५॥

१. बा०—वाचं माङ्गलिकीं । २. नि०—°म्बुज । ३. र०—निःश्वासस्खलिताधरोपरिपत° ।

वाच इति । प्रवरस्यस्तिकाया वर्णनमिदम् । प्रयाणसमये गमनकाले । प्रियस्येति शेषः । जने बन्धुजने । माङ्गलिकीः स्वस्त्यादिशब्दयुता मङ्गलकलकाः । वाचः गिरः । अनल्पं बहु । जल्पति सति । केलीमन्दिरमारुतायनमुखे केलीमन्दिरस्य क्रीडागृहस्य मारुतायनमुखे वातायनद्वारि । विन्यस्तवक्त्राम्बुजा विन्यस्तं स्थापितं वक्त्राम्बुजं मुखकमलं यया सा । परिपतद्बाष्पार्द्रवक्षोरुहा परिपतद्भिः बाष्पैः अश्रुभिः आर्द्रौ सिक्तौ वक्षोरुहौ स्तनौ यस्याः सा । लोलविलोचना लोले चञ्चले, कातरे इति यावत्, विलोचने नयने यस्याः सा । बाला मुग्धा प्रिया । निःश्वासगलपिताधरं निःश्वासैः गलपितः ग्लानिं प्रापितः, स्वकरक्तवर्ण इत्यर्थः, अधरः ओष्ठः यस्मिन् कर्मणि यथा स्यात्तथा । प्राणेशं कान्तं । आलोकते पश्यति । शिव शिव इति खेदे । अत्र नायिका मुग्धा, अत एव प्रयाणकाले पत्युर्बन्धुजनस्य च सान्निध्यं परिहृत्य क्रीडागृहगवाक्षेण तदवलोकनपरा मूर्च्छामेव विरहवेदनामनुभवति । पद्यमेतद्रसगङ्गाधरे (पृ० ३४) विप्रलम्भशृङ्गार उदाहृतम् । व्याख्यातं च तत्रैव ग्रन्थकृता—' अत्राप्यालम्बनस्य नायकस्य, निःश्वासाश्रुपातादेरनुभावस्य, विषादचिन्तावेगादेश्च व्यभिचारिणः, संयोगाद्रतिरभिव्यज्यमाना वियोगकालावच्छिन्नत्वाद्विप्रलम्भरसव्यपदेशहेतुः । ' इति । शार्दूलविक्रीडितं वृत्तम् ॥ ५५ ॥

दारिद्र्यं भजते कलानिधिरयं राकाधुना म्लायति
स्वैरं कैरवकाननेषु परितो मालिन्यमुन्मीलति ।
द्योतन्ते हरिदन्तराणि सुहृदां वृन्दं समानन्दति
त्वं चेदञ्चसि काञ्चनाङ्गि वदनाम्भोजे विकासश्रियम् ॥५६॥

दारिद्र्यमिति । मानिनीं प्रति सखया उक्तिः । हे काञ्चनाङ्गि काञ्चनवर्णं सुवर्णवर्णं अङ्गं शरीरं यस्याः तत्संबुद्धौ । त्वं वदनाम्भोजे मुखकमले । विकासश्रियं विकासस्य, स्मितस्येति यावत्, श्रियं शोभां । चेत् यदि । अञ्चसि धारयसि । तदा अयं कलानिधिः चन्द्रः । दारिद्र्यं श्रीशून्यत्वं, निष्कलत्वं वा । भजते धारयति । अधुना अस्मिन्नेव क्षणे । राका पूर्णिमा । म्लायति म्लाना, हीनज्योत्स्ना भवति । परितः समन्तात् । कैरवकाननेषु कुमुदवनेषु । स्वैरं विना परप्रयत्नं । मालिन्यं विकासराहित्यं । उन्मीलति

उदितं भवति। हरिदन्तराणि दिशां मध्यवर्तिनो भागाः। द्योतन्ते प्रकाशयुक्ता भवन्ति। तथा च—सुहृदां अस्माकां बन्धूनां। वृन्दं समूहः। समानन्दति हृष्यति। हे सुवर्णसदृशगौरशरीरे, यदि मानमपहाय प्रसादसूचकं मन्दस्मितं त्वमुखकमले धारयसि तर्हि न केवलं सखीजनस्याह्लादो दिक्षु प्रसादश्च विलोकितो भविष्यति, अपि तु चन्द्रस्य पूर्णिमाया कुमुदानां च निःशोकत्वमुत्पादयत इति भावार्थः। सूर्यप्रमोदये हि दिक्षु प्रकाशः, कमलवृन्दे विकासः, चन्द्रादिशोभाहास उपजायते। एतेन मुखे सूर्यसादृश्यं व्यङ्ग्यम्। मुखे मन्दस्मितानयनसमकालमेव चन्द्रो दारिद्र्यं भजिष्यते—वर्तमानसामीप्ये वर्तमानवद्वेति लट्। एवमुत्तरत्रापि। हेतुकार्ययोर्योगपद्याभावेऽप्यत्र तथा वर्णनादतिशयोक्तिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम्॥५६॥

पाटीरद्रुभुजङ्गपुङ्खमुखायाता[2] इवातापिनो[3]
वाता वान्ति दहन्ति लोचनमभी ताम्रा रसालद्रुमाः।
एते[4] हन्त किरन्ति कूजितमयं[5] हालाहलं कोकिला
बाला बालमृणालकोमलतनुः प्राणान्कथं रक्षतु ॥ ५७ ॥

१. बा०—पाटीरासु। २. र०—°मुखोद्भूता। ३. र०—वपुस्तापिनो। ४. र०—श्रोत्रे। ५. र०—कूजितमिमे।

पाटीरेति। वसन्ते विरहिणीवर्णनम्। पाटीरद्रुभुजङ्गपुङ्खमुखायाता पाटीरद्रु चन्दनतरुः, तस्मिन् भुजङ्गपुङ्खा सर्पश्रेष्ठाः, तेषां मुखेभ्य आयाता निःसृताः। पुङ्खशब्देन तेषां महाविषत्वं बोध्यते। इव। आतापिनः समन्तात् विरहिणीसंतापजनकाः। वाताः वायवः। वान्ति चलन्ति। अभी परितो दृश्यमानाः। ताम्राः रक्तवर्णाः। रसालद्रुमाः आम्रवृक्षाः। वसन्ते ताम्रपल्लवैराम्राणामाच्छादितत्वात्। लोचनं दहन्ति नेत्रयोरुद्वेगजनका इत्यर्थः। हन्त इति खेदे। एते कोकिलाः। कूजितमयं कूजितरूपं। हालाहलं कालकूटं। किरन्ति वर्षन्ति। सर्वेषामादेशेऽनर्थसंपाते—बालमृणालकोमलतनुः नवमृणालसदृशकोमलशरीरा। बाला युवतिः। कथं प्राणान् रक्षतु जीवतु। विरहावस्थायामेकैकमप्यनर्थाय, किन्त्वत्र भयंकराणीविषफूत्कारवद्दुःसहा दक्षिणानिलाः, अग्निवर्षवदराचिता आम्राः, कालकूटवद्भृशमुद्वेजका कोकिलरवाः, त्रयोऽपि मिलित्वा बालाप्राणनाशायोद्युक्ता

इति भावः। समुच्चयालङ्कारोदाहरणे पठ्यते पद्यमिदं रसगङ्गाधरे (पृ. ४९१)। 'युगपत्पदार्थानामन्वय समुच्चय' इति लक्षणं च तत्रैव। अत्र त्रयोऽपि पदार्था जीवनाशार्थमापतन्तोऽरमणीया.। शार्दूलविक्रीडित छन्द ॥ ५७ ॥

आयातैव निशा मनो मृगदृशामुन्निद्रमातन्वती
मानो मे कथमेष संप्रति निरातङ्कं हृदि स्थास्यति ।
ऊहापोहमिमं सरोजनयना यावद्विधत्तेतरां
तावत्कामनृपातपत्रसुषमं बिम्बं बभासे विधोः ॥ ५८ ॥

आयातैवेति । कस्याश्चिद् विगलन्मानाया उक्तिरियम् । मृगदृशां हरिणाक्षीणां । मनः । उन्निद्रं दीप्ताभिलाष । आतन्वती कुर्वती । निशा रात्रि । आयातैव आगता एव । एष मे मान । संप्रति अधुना । निरातङ्कं निःशङ्क । कथं हृदि स्थास्यति । सरोजनयना कमलनयना नायिका । इमं । ऊहापोहं तर्कवितर्कं । यावत् विधत्तेतरां कुरुते । तावत् । कामनृपातपत्रसुषमं कामनृपस्य मदनभूपते आतपत्रस्य छत्रस्य सुषमा शोभा इव सुषमा यस्य तत् । विधोः चन्द्रस्य । बिम्बं मण्डलं । बभासे प्रकाशितमभूत् । 'अत्र रात्रिसन्निधानादपि सिद्धवती मानविनाशस्य चन्द्रोदयादनायासेन सिद्धिः ।' (रसगङ्गाधर, पृ० ४९२) समाधिरलङ्कारः । तल्लक्षण च—'एककारणजन्यस्य कार्यस्याकस्मिककारणान्तरसमवधानाहितसौकर्यं समाधिः ।' शार्दूलविक्रीडित छन्द ॥ ५८ ॥

प्रभातसमयप्रभां प्रणयिनि[1] द्रवाना रसा-
दमुष्य निजपाणिना दृशमसीलयल्लीलया[2] ।
अयं तु[3] खलु पद्मिनीपरिमलालि[4]पाटच्चरै
रवेरुदयमध्यगादधिकचारु तैर्मारुतैः[5] ॥ ५९ ॥

१. नि०—प्रणयिनी । २. र०—नवनाम्बुजं सपदि पाणिनासीलयत् । ३. र०—अनेन । बा०—अयं तु । ४. बा०—"लाद्विपाट" । ५. र०—समीरशिशुकैश्चिरादजुनितो दिनेशोदयः ।

प्रभातेति । प्रणयिनि प्रियतमे । रसात् रागात्, प्रेम्णः, हेतोः । प्रभातसमयप्रभां प्रातःकालीनसूर्यकान्तिं । द्रवाना गोपयन्ती । कश्चिद्-

धिका निजपाणिना स्वहस्तेन । लीलया कुतूहलेन । अमुष्य स्वप्रियस्य । दृशौ दृष्टिं । अमीलयत् आच्छादयामास । अयं प्रकृतनायकः । तु । खलु निश्चयेन । पद्मिनीपरिमलालिपाटवरैः पद्मिनीनां कमलिनीनां परिमलस्य गन्धस्य आलीनां वर्गानां पाटवरैः तत्करैः । तैः पूतानुभूते । मारुतैः वायुभिः । रवेः सूर्यस्य । उदयं । अधिकचारु अतिसम्यक् यथा स्यात्तथा । अध्यगात् अज्ञासीत् । काचिद्वाचिका उषसि स्वप्रियतमस्य प्रभातदर्शनं वारयितुमिच्छन्ती तस्य नयने स्वहस्तेनाच्छादितवती, किन्तु कमलगन्धवाहिभिः पवनैस्तस्य सूर्योदयज्ञानमभूत्, सूर्योदये कमलानां विकासादिति भावः । इष्टाप्राप्तिजन्योऽत्र विषमालङ्कारः । 'अननुरूपसंसर्गो विषमम्' इति रसगङ्गाधरे कश्चिल्लक्षणमलङ्कारं यच्च चैतदुदाहृतं (पृ० ७४६) प्रत्यकृदाह— 'अत्र प्रियतमकर्तृकप्रातःविषयकज्ञानाभावः कामिन्याः सुखसाधनतयेष्टः । स च तया साध्यमानोऽपि न सिद्ध इतीष्टाप्राप्तिरेव । यद्वा तादृशज्ञानं तस्या दुःखसाधनम्, तन्निवृत्तिरूपं चेष्टं साध्यमानमपि न [त] गेति सैव । एवं च द्विप्रकारापीष्टाप्राप्तिरेवात्र संगच्छते ।' पृथ्वीवृत्तम् ॥ ५९ ॥

विदूरादाश्चर्यस्तिमितमथ किंचित्परिचया—
दुदञ्चच्चाञ्चल्यं तदनु परितः स्फारितरुचि ।
गुरूणां संघातैः सपदि मयि याते सखजनि
त्वपाघूर्णत्तारं नयनमिह सारङ्गजदृशः[2] ॥ ६० ॥

१. नि० र०—प्रयाते । २. र०—नयनयुगमिन्दीवरदृशः ।

विदूरादिति । अत्र कश्चित्सखीं प्रति कश्चिदनपावृते स्थलविशेषे गुरूच्छ्रूयमाणाभिरोषितसंभावितागमन प्रियतमकस्मादवलोकितवत्याः प्रियाया नयनव्यापारं वर्णयति । सारङ्गजदृशः सारङ्गो हरिणस्तस्माज्जायत इति सारङ्गजो मृगपोतस्तद्वद् दृग् दृष्टिर्यस्याः तस्याः, मत्प्रियायाः । नयनं नेत्रं । विदूरात् दूरतो महतोऽपि । आश्चर्यस्तिमितं कथमयमकस्मादद्य सम्प्राप्त इत्याश्चर्येण निश्चलं । अथ ततः । किंचित्परिचयात् मयीषत्निकटवर्तिनि याते सन्दर्शनात् । उदञ्चच्चाञ्चल्यं प्राप्तचाञ्चल्यं औत्सुक्येन तरलतां प्राप्तं । तदनु तदनन्तरं । परितः सर्वतः । स्फारितरुचि स्फारिता वृद्धिं प्रापिता रुचिः कान्तिर्यस्य, हर्षोद्रेकात् विकसितमित्यर्थः । इह अत्र । मयि

गुरूणां पूज्यानां । संघातं समूह । याते सति । सपदि झटिति । अपाघूर्णतारं अपया लज्जया घूर्णन्ती भ्रमन्ती तारा कनीनिका यस्य तादृशं । समजनि सञ्जातम् । अत्र क्रमेण नायिकागतनयनविकारवर्णनम्—दूरतो विलोकिते, अतर्कितागमनात् साश्चर्यं, ईषत्सन्निधाने समुत्सुकतया चञ्चलं, तदनन्तरं हर्षाद्विकसितं, गुरुसंनिध्यनागते च सलज्जमभूदिति भावार्थः । अत्र क्रमेणानेकविकाराणां स्तिमितत्वादीनां नयनरूप एकस्मिन्नधिकरणे वर्णनात्पर्यायालङ्कारः । उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ. ४७९) पर्यायालङ्कारे । तल्लक्षणं च तत्रैव—'क्रमेणानेकाधिकरणकमेकमाधेयमेकः पर्यायः । क्रमेणानेकाधेयकमेकमधिकरणमपरः ।' शिखरिणी छन्दः ॥ ६० ॥

कपोलावुन्मीलत्पुलकनिकुरम्बौ[1] मयि मनाक्
मृशत्यन्तः[2] स्मेरस्तबकितमुखाम्भोरुहरुचः ।
कथंकारं शक्याः परिगदितुमिन्दीवरदृशो
दलद्द्राक्षानिर्यद्रसभरसपक्षा[4] भणितयः ॥ ६१ ॥

१. शे. वै०—°लत्पुलकपाली । २. नि०—स्पृशत्यन्तः । ३. बा०—लसत् । ४. बा०—°समच्छा ।

कपोलाविति ॥ नायकोक्तिरियम् । उन्मीलत्पुलकनिकुरम्बौ उन्मीलन् उद्गच्छन्, मत्सानिध्येन चेष्टया वा प्रादुर्भवन्, पुलकस्य रोमाञ्चस्य, निकुरम्बः निचयः ययोः तौ नायिकायाः कपोलौ । मयि । मनाक् ईषत् । मृशति स्पृशति सति । अन्तःस्मेरस्तबकितमुखाम्भोरुहरुचः अन्तः स्मेरस्य ईषद्धास्ययुक्तस्य, अत एव स्तबकितस्य ईषद्विकसितस्येव मुखाम्भोरुहस्य मुखकमलस्य रुक् कान्तिः यस्याः तस्याः नायिकायाः । अत्र नायिकायाः नातिस्फुटस्मितयुक्तं वदनं, ईषद्विकसितेन कमलेनोपमीयते । अर्धविकसितं च कुसुमं, सम्यग्विकसितकुसुमानां गुच्छेन तुल्यं भवतीत्यत्र स्तबकितशब्दप्रयोगः । इन्दीवरदृशः नीलोत्पलतुल्यनयनायाः, तस्याः नायिकायाः । दलद्द्राक्षानिर्यद्रसभरसपक्षाः दलन्ती अत्यन्तपरिपाकेन स्वयमेव प्रस्फुटन्ती या द्राक्षा, तस्याः निर्यन् बहिर्गच्छन् यो रसभरः रससमूहः, तस्य सपक्षाः सदृशाः । अत्यन्तमधुरा इति यावत् । भणितयः वचनानि । परिगदितुं वर्णयितुं । कथंकारं केन प्रकारेण । शक्याः । मत्सन्निधानेन सञ्जातरोमाञ्चौ

प्रियाकपोलौ यद्वाह स्पृष्टवान्, तदेवद्वारस्थमुकेन वदनेन यानि यानि मधुराणि वचांसि प्रिया जगाद, तानि वर्णयितुमसमर्थानीति भावार्थः। अत्र स्पर्शात्पूर्वमपि रोमाञ्चोद्गमो नायिकाया नायके प्रेमातिशयं द्योतयति। स्पर्शानन्तरं च सहजमधुरोदारोऽन्यानुरागातिशयपोषकः। शिखरिणी वृत्तम् ॥ ६१ ॥

राजानं जनयांबभूव सहसा जैवातृक त्वां तु यः
सोऽयं कुण्ठितसर्वशक्तिनिकरो[1] जातो जरातो विधिः।
संप्रत्युन्मदखञ्जरीटनयनावक्त्राय नित्यश्रिये[2]
दाता राज्यमखण्डमस्य जगतो धाता नवो मन्मथः ॥ ६२ ॥

१. बा०—°शक्तिविनदो। २. बा०—°नयनावक्त्रारविन्दश्रिये।

राजानमिति ॥ कस्यचिच्चन्द्रं प्रत्युक्तिः। हे जैवातृक चन्द्र। यः विधिः ब्रह्मा। त्वां राजानं नृपं, सौन्दर्यातिशयात्सर्वश्रेष्ठम्। द्विजराजपदाच्चन्द्रस्य राजत्वमपि प्रसिद्धम्। सहसा अविचारेणैव। जनयांबभूव उत्पादयामास। सोऽयं एतादृशाविमृश्यकारी। जरातः वार्धक्येन। कुण्ठितसर्वशक्तिनिकरः कुण्ठितः प्रतिहतः सर्वासां शक्तीनां निकरः समूहो यस्य। वृद्धत्वाद्युपसकलसामर्थ्यः। जातः। अतो नास्मादन्यत्किंचिदूतनं निर्माणमाशास्यते। संप्रति अधुना। मन्मथः मदनः। नवो धाता नूतनः विधिः। अस्य जगतः। अखण्डं समग्रं। राज्यं सौन्दर्यश्रेष्ठत्वं। नित्यश्रिये। सततशोभायै। उन्मदखञ्जरीटनयनावक्त्राय उन्मदः उन्मत्तः खञ्जरीटः पक्षिविशेषः तस्य भयने इव नयने यस्या नायिकायाः, तस्याः वक्त्राय मुखाय। दाता दास्यति। 'अयं चन्द्रः सर्वमंडलसौन्दर्यः' इति मत्वा, विमर्शं विनैव यो ब्रह्मा, हे चन्द्र, त्वां राजानमकार्षीत्, सोऽस्मद्वाम्यवक्त्रादृद्धावस्था प्राप्तः सन् प्रतिहतसकलसामर्थ्यो जातः। अन्यथा पुनरप्यसमीक्ष्यैवान्यत्किंचिद्विरचयेत्। अधुना नवो धाता मदनः सततशोभायुक्तायास्मै नायिकावदनायाखिलभुवनचक्रवर्तित्वं दास्यति। चन्द्रो वृद्धिक्षयवान्रात्रावेव च रमणीयः, कान्तावदनं तु सर्वदैव रमणीयमिति व्यतिरेकालङ्कारो ध्वन्यते। शार्दूलविक्रीडितं वृत्तम् ॥ ६२ ॥

आविर्भूता यदवधि मधुस्यन्दिनी नन्दसूनोः
कान्तिः काचिन्त्रिजगतीनयनाकर्षणे कार्मणज्ञा[1]।

श्वासो दीर्घस्तदवधि मुखे पाण्डिमा गण्डमूले
शून्या वृत्तिः कुलमृगदृशां चेतसि प्रादुरासीत् ॥ ६३ ॥

१. बा०—°नयनाकर्षणी कर्मणि शा ।

आविर्भूतेति । यदवधि यद्दिनादारभ्य । नंदसूनोः भगवतः श्रीकृष्णस्य । मधुस्यंदिनी माधुर्यस्राविणी, अत्यन्तमनोहारिणीति यावत् । निखिलनयनाकर्षणे निखिलानां, अखिलानां जगतामिति भावः । नयनाकर्षणे दृष्टिविलोभने । कार्मणशक्ता कार्मणं मन्त्रतन्त्रादि, तच्छक्ता । वशीकरणादिमन्त्रशक्तेति यावत् । काचित् अनिर्वचनीया । कान्तिः शोभा । आविर्भूता प्रकटीभूता । तदवधि तद्दिनादारभ्य । कुलमृगदृशां कुलस्त्रीणां, तासां चित्ताकर्षणस्य दुष्करत्वात् मुखे दीर्घः श्वासः, दुःखस्यासह्यत्वात् । गण्डमूले कपोले च । पाण्डिमा पाण्डुत्वं, विवर्णत्वमिति यावत् । चेतसि हृदये । शून्या यथोक्तप्रयोजनरहिता । वृत्तिः व्यापारः । प्रादुरासीत् बभूव । भगवतोऽनिर्वचनीया शोभा वशीकरणादिमन्त्रशक्त्या तान्त्रिकेण तुल्या निखिलजगतां दृष्टिविलोभने तदाकर्षणे च समर्था । यदारभ्य सा कुलस्त्रीणां दृष्टिपथमायाता तदारभ्यैव ता दीर्घं निश्वसन्ति विवर्णमुखश्च तत्तदुचितव्यापारशून्यास्तिष्ठन्तीति भावार्थः । विप्रलम्भशृङ्गारोऽत्र व्यङ्ग्यः । उदाहृतं च पद्यमेतद्रसगङ्गाधरे (पृ० ३४) । मन्दाक्रान्ता वृत्तम् ॥ ६३ ॥

प्रसङ्गे गोपानां गुरुषु[1] महिमानं[2] यदुपतेः—
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ।
विषज्वालाजालं झटिति[3] दमतः पन्नगपतेः
फणायां साश्चर्यं कथयति तरां ताण्डवविधिम् ॥ ६४ ॥

१. नि०—यदुषु । २. नि०—बहुमानं । ३. र०—झगिति ।

प्रसङ्ग इति । प्रसङ्गे कालियाख्यसर्पदमनस्य कथावसरे । गोपानां गुरुषु वृद्धगोपानां सभायां । यदुपतेः श्रीकृष्णस्य । महिमानं शौर्यमहत्त्वं । उपाकर्ण्य श्रुत्वा । स्विद्यत्पुलकितकपोला स्विद्यन्तौ स्वेदयुक्तौ पुलकितौ च कपोलौ यस्याः सा । कुलवधूः अभिजातकुलाङ्गना गोपवधूः । झटिति सपदि । विषज्वालाजालं विषस्य ज्वालाः अर्चींषि तासां जालं समूहः । दमतः दहतः । पन्नगपतेः सर्पराजस्य कालियस्य । फणायां । ताण्डव-

विधिं नृत्यप्रकारं, यदुपतेरिति भावः। साश्चर्यं विस्मयेन सह। कथयति-तराम्। काचिद्गोपवधूः वृन्दस्थिते स्थिता श्रीकृष्णस्य कालियमर्दनावसरे वर्ण्यमान माहात्म्यमुपश्रुत्य सलालाभिलाषामृत, प्रियतमगुणाकर्णनेन स्नेह-पुलकस्वेदो सात्त्विकभावयोरुदयश्च तस्या शरीरेऽभूत्, आ नाम च तदवस्था-दर्शनेन तस्याः श्रीकृष्णे गूढप्रेमाविर्भावः स्यादिति तद्गोपनाय सा 'आश्चर्यं, आश्चर्यं, कथं नाम ताक्षतीक्ष्णविषमुद्गिरतः कालियसर्पस्य फणायां सहेलं नृत्यमिवाकरोत् कृष्णः' इत्याश्चर्यं प्रकटयतीति भावः। एषामिदमवहित्था-ख्यस्य व्यभिचारिभावस्य लक्षणं उदाहृतं रसगङ्गाधरे (पृ. ८९)। तल्लक्षणं च तत्रैव—'व्रीडादिभिर्निमित्तैर्यदनुभावानां गोपनाय जनितो भावविशेषोऽ-वहित्थम्' इति। शिखरिणीवृत्तम् ॥ ६४ ॥

कैशोरे वयसि क्रमेण तनुतामायाति तन्व्यास्तना—
वागामिन्यखिलेश्वरे रतिपतौ तत्कालमस्याश्रया।
आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहा
किं चासीदमृतस्य भेदविगमः साचिस्मिते तात्त्विकः[1] ॥६५॥

१. नि०—सर्वदा।

कैशोर इति। तन्व्याः कृशाङ्ग्याः। कैशोरे वयसि बाल्यावस्थायां। "'कैशोरमापञ्चदशं' इत्यभियुक्तोक्तेर्द्वादशवर्षोत्तरपञ्चदशवर्षपरिमाणिवर्यन्त-मित्यर्थः" इत्यच्युतरायः। क्रमेण। तनुतां कृशतां, ह्रासमिति यावत्। आयाति आगच्छति सति। तथा। अखिलेश्वरे सर्वस्वामिनि, जगज्जयनी-याश इत्यर्थः। रतिपतौ कामदेवे। तनौ शरीरे। आगामिनि आगमिष्यति सति। अस्य मदनस्य। आश्रया। तत्काले तत्क्षणं। अस्याः तन्व्याः आस्ये मुखे। पूर्णशशाङ्कता पूर्णचन्द्रत्वं। नयनयोः अम्भोरुहां कमलानां। तादात्म्यं अभेदः। किं च अपि च। साचिस्मिते ईषद्हसिते। अमृतस्य तात्त्विकः यथार्थः। भेदविगमः भेदराहित्यं, तादात्म्यमित्यर्थः। आसीत् प्रादुरभवत्। यथैव बाल्यावस्थातिक्रमोऽभूत् तथैव तस्याः कृशाङ्ग्या वदनं पूर्णचन्द्रसदृशं, नेत्रे कमलतुल्ये, हसितं चामृतसमगभूदिति भावः। अत्र मुखनेत्रहसितानामुपमेयानां चन्द्रकमलामृतोपमानैरभेदसदर्शनाद्रूपकमल-

ङ्कारः। उदाहृतं चैतत्पद्यं रसगङ्गाधरे (पृ. २४२) रूपकालङ्कारप्रसङ्गे। शार्दूलविक्रीडितं छन्दः ॥ ६५ ॥

शयिता शैवलशयने सुषमाशेषा नवेन्दुलेखेव ।
प्रियमागतमपि सविधे सत्कुरुते मधुरवीक्षणैरेव[1] ॥ ६६ ॥

१. नि०–°वीक्षणेनैव।

शयितेति ॥ विरहिण्यवस्थावर्णनम्। शैवलशयने शैवलं जलनीली। तस्य शयने शय्यायाम्। विरहाग्निशान्त्यर्थं शीतलैव शय्या युक्ता। शयिता सविष्टा। अत एव–नवेन्दुलेखा इव नवश्वासानिन्दुः प्रतिपच्चन्द्रः। तस्य लेखा कला। प्रतिपदि चन्द्रस्यैकैव कला भवति। यथा स क्षीणो दृश्यते, तथा नायिकापि प्रियविरहात् कृशा दृश्यते। अत एव–सुषमाशेषा सुषमा परमाशोभा। सा एव शेषो यस्याः सा। लावण्यमात्रशेषा। एतेन नितरां कृशेति गम्यते। सविधे निकटे। आगतं उपस्थितम्। अपि प्रियं नायकम्। मधुरवीक्षणैः प्रीतियुक्तैरवलोकनैः। एव। न तु प्रत्युत्थानादिभिः। सत्कुरुते अभिनन्दयति। काचिन्नायिका प्रियविरहाद्धेतोरत्यन्तं कृशा सती शैवलशय्यामधिशेते। सा च क्षीणबला नितरां शैथिल्यमापन्ना च तथा तु स्वविशेषमनुभवति यथा विरहान्तकरं नायकं समीपागतमपि मधुरावलोकनैरेवाभिनन्दयति, न प्रत्युत्थानालिङ्गनादिभिरिति भावः। पद्यमिदं रसगङ्गाधरे (पृ० ८०) ग्लान्याख्यस्य व्यभिचारिभावस्योदाहरणे पठ्यते। ग्लानिलक्षणं च तत्रैव—"अभिलाषाधिक्यबलहानिप्रभवा वैवर्ण्यशिथिलाङ्गत्वदृग्भ्रमणादिहेतुर्दुःखविशेषो ग्लानिः" इति। उपमालङ्कारः। गीतिर्छन्दः ॥ ६६ ॥

विरहेण विकलहृदया विलपन्ती दयित दयितेति ।
आगतमपि तं[1] सविधे परिचयहीनेव वीक्षते बाला ॥ ६७ ॥

१. नि०–सा।

विरहेणेति ॥ विरहिण्यवस्थावर्णनम्। विरहेण प्रियस्येति शेषः। विकलहृदया विकलं विह्वलं हृदयं चित्तं यस्याः सा। हे दयित प्रिय। हे दयित प्रिय। इति विलपन्ती आक्रोशन्ती। बाला ऊनषोडशवर्षा मुग्धेत्यर्थः। तं दयितम्। सविधे निकटे। आगतमपि प्राप्तमपि। परिचयहीना इव तमजानन्तीव। वीक्षते पश्यति। मुग्धावस्था काचिन्नायिका वियोगे

प्रियतमोद्धारणं कुर्वाणैतादृश दृष्टान्तर प्राप्ता चक्रिकटसमागतमपि प्रियं न प्रत्यभिजानातीति भाव । एतमिदं रसगङ्गाधरे (पृ० ७९) मोहास्यस्य व्यभिचारिभावस्योदाहरणे पठ्यते । तल्लक्षण च तत्रैव—" भवविनोदादि-प्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः " इति । आर्यावृत्तम् ॥ ६७ ॥

अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी ।
तनुरप्रतिमा च[1] सुभ्रुवो न विधेरस्य कृतिं विवक्षति ॥ ६८ ॥

१. वा०—तनुरप्रतिमात्र ।

अधरेति ॥ सुभ्रुवः शोभने भ्रुवौ यस्या सा सुभ्रूः । तस्याः । अधर-द्युतिः अधरस्य द्युतिः कान्तिः । अस्तपल्लवा अस्ताः निरस्ताः दूरीकृताः पल्लवाः किसलयानि यया सा । अधरः पल्लवाना रक्तामतिशेते इत्यर्थः । मुखशोभा आस्यकान्तिः । शशिकान्तिलङ्घिनी शशिनः चन्द्रस्य कान्तिं लङ्घते अतिक्रामतीत्यर्थः । चन्द्रादप्यधिकमनोहारिणीति भावः । तनुः शरीरं चारुणा । अप्रतिमा नास्ति प्रतिमा सादृश्यं यस्याः सा । एवंभूता नायिकेयम् । अस्य प्रसिद्धस्य । विधेः ब्रह्मणः । कृतिं सृष्टिं । न विव-क्षति वक्तुमिच्छति । अस्या नायिकाया अधरः किसलयेभ्योऽपि रक्ततरः, मुखं चन्द्रादपि सुन्दरतरम्, शरीरं चानुपमसौन्दर्यम् । एवं नेयं जगत्स्रष्टुः ब्रह्मणः सृष्टिरपि त्वन्यस्य कस्यचिदिति भावः । रसगङ्गाधरे (पृ० ८२) तृतीयार्धं ' अकृतप्रतिमा तनुः कृता विधिना कस्य कृते मृगीदृशः ' इति पठित्वा एतमिदं चिन्ताख्यस्य व्यभिचारिभावस्योदाहरणे दीयते । अति-शयोक्तिरलङ्कारः । आर्यावृत्तम् ॥ ६८ ॥

व्यत्यस्तं लपति क्षणं क्षणमहो मौनं समालम्बते
सर्वस्मिन्विदधाति किं च विषये दृष्टिं निरालम्बनाम् ।
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीविरहव्यथाविकलितो हा हन्त लङ्केश्वरः ॥ ६९ ॥

व्यत्यस्तमिति ॥ हा हन्त इति खेदातिशयसूचकं पदद्वयम् । वैदेही-विरहव्यथाविकलितः सीताविरहाकुलः । लङ्केश्वरः रावणः । क्षणं व्यत्यस्तं विपरीतं, असबद्धं वा । लपति भाषते । अहो इत्याश्चर्ये । क्षणं मौनं समालम्बते मूको भवति । किं च । सर्वस्मिन् विषये पदार्थजाते ।

निरालम्बनां चन्द्रां दृष्टिं विदधाति करोति। दीर्घं श्वासं उरीकरोति अङ्गीकरोति मुञ्चतीत्यर्थः। अङ्गेषु हस्तपादादिषु गात्रेषु। धृतिं धैर्यं, अनवसादमिति यावत्। मनाक् ईषदपि। न धत्ते न धारयति। स्पष्टो भावः। एषामिदं रसगङ्गाधरे (पृ. १०१) विप्रलम्भाभासोदाहरणे पठ्यते। उक्तं च तत्र "अत्र सीतालम्बनेयं लङ्केशगता विप्रलम्भरतिरनुभवनिष्ठतया आकुलपत्नीविषयकतया चाभासतां गता, व्यत्यस्त लपतीत्यादिभिरुक्तिभिर्व्यज्यमानैरुन्मादश्रममोहचिन्ताव्याधिभिस्तथैवाभासतां गतैः प्राधान्येन परिपोष्यमाणा ध्वनिव्यपदेशहेतुः" इति। अत्र लङ्केश्वरस्यैकस्य कर्तुर्लपतीत्याद्याभिरनेकाभिः क्रियाभिरभिसम्बद्धत्वाद्दीपकाख्योऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥६९॥

उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवर्गेण।
मुदितं च सकलललनाचूडामणिशासनेन मदनेन ॥ ७० ॥

उदितमिति ॥ चन्द्रोदयसमयवर्णनम्। इन्दो चन्द्रस्य। मण्डलं बिम्बम्। उदितम्। सद्यः चन्द्रोदयसमकालमेव। वियोगिवर्गेण वियोगिनां विरहिणां वर्गेण समूहेन। रुदितं रोदनं कृतम्। चन्द्रोदये विरहस्यासह्यत्वात्। सकलललनाचूडामणिशासनेन सकलानां सर्वासां ललनानां चूडामणिः शिरोभूषणं तथाभूतं शासनं आज्ञा यस्य तेन। मदनेन कामेन। मुदितं प्रहृष्टम्। रुदितं मुदितमित्युभयत्रापि भावे क्तः। चन्द्रोदये आगतमात्र एव विरहिणो रुदिताः, नारीप्रतिहतशासनः कामदेवश्च प्रहृष्ट इति भावः। अत्र 'उदितं' 'रुदितं' 'मुदितं' इति तिसृणां युगपदेवेन्दुवियोगिमदनैर्भिन्नैर्भिन्नक्रियात् समुच्चयाख्योऽलङ्कारः। उदाहृतं चैतत्पद्यमुत्तरार्धे सकलललनास्थाने सकलभुवनेति पाठभेदेन समुच्चयालङ्कारप्रसङ्गे (रसगङ्गाधरे, पृ. ४९०)। तल्लक्षणं च तत्रैव—'युगपत्पदार्थानामन्वयः समुच्चय' इति। अनेन च समुच्चयेन 'कार्यकारणपौर्वापर्यविपर्ययाणामतिशयोक्तिः' (रसगङ्गाधरे, पृ. १३६) व्यज्यते। अत्र चन्द्रोदयः कारणं वियोगिरोदनमदनमोदने च कार्ये। किन्तूत्तरकालभाविनोरप्येतयोश्चन्द्रोदयसमकालभावित्ववर्णनम्। अत एव कार्यकारणपौर्वापर्यविपर्ययः। गीतिवृत्तम् ॥ ७० ॥

इदमप्रतिमं पश्य सरः सरसिजैर्वृतम्।
सखे मा जल्प नारीणां नयनानि दहन्ति माम् ॥ ७१ ॥

इदमिति ॥ सरस्तटगतयोर्मित्रयोरालापोऽयम्। हे सखे। इदं पुरोवर्ति। सरसिजैः कमलैः। कृतं चित्रम्। अप्रतिमं नास्ति प्रतिमा उपमानं यस्य तत्। सरः पश्य। द्वितीयः सखा ब्रूते–हे सखे, इदमप्रतिममित्यादि मा जल्प मा भण। यतः नारीणां स्त्रीणाम्। नयनानि मां वहन्ति। एकेन मित्रेण प्रफुल्लकमलं सरो दर्शितो द्वितीयः सुहृद् कमलैस्तत्सदृशनारीनेत्रस्मृतियुक्तो भूत्वा प्रथमं वारयतीति भावः। यथमिदमुदाहृतं रसगङ्गाधरे स्मरणालङ्कारः यथा (पृ० २२२)। अनुष्टुप्वृत्तम् ॥ ७१ ॥

मुञ्चसि नाद्यापि रुषं भामिनि मुदिरालिरुदियाय।
इति सुदृशः प्रियवचनैरपायि नयनाब्जकोणशोणरुचिः ॥७२॥

मुञ्चसीति ॥ रुष्टां नायिकां प्रति नायकस्योक्तिः। हे भामिनि मानशीले। इयं मुदिरालिः मुदिराणां मेघानां आलिः पङ्क्तिः। उदियाय उदयं प्राप्ता। त्वं अद्यापि अधुनापि। रुषं क्रोधं। न मुञ्चसि। मेघोदयस्य कामोद्दीपकत्वात् अधुना कांपस्त्वया कार्य इति भावः। इति इत्थम्। प्रियवचनैः कान्तालापैः। सुदृशः शोभननेत्रायाः नायिकायाः। नयनाब्जकोणशोणरुचिः नयने अब्जे कमले इव तयोः कोणयोः प्रान्तभागयोः शोणा रक्ता रुचिः कान्तिः। अपायि पीता। सत्यपि मेघोदये त्वं कुपितासीति प्रियवचनमाकर्णयन्त्या नायिकाया रोषो निःशेषतां गत इति भावः। यथमिदं भावशान्त्युदाहरणं रसगङ्गाधरे (पृ० १०२) पठ्यते। 'भावस्य प्रागुक्तरूपस्य शान्तिर्नाम' इति लक्षणानन्तरं ग्रन्थकृतैवोक्तं "इह तावत्प्रियवचनश्रवणं विभावः। नयनकोणगतशोणरुचेर्नाशः, तदभिव्यक्तः प्रसादो वानुभावः। उत्पत्तिकालावस्थितो रोषनाशो व्यङ्ग्यः" इति ॥ उद्गीतिवृत्तम् ॥ ७२ ॥

आलोक्य सुन्दरि मुखं तव मन्दहासं
नन्दत्यमन्दमरविन्दधिया मिलिन्दाः।
किं चा'सिताक्षि मृगलाञ्छनसम्भ्रमेण
चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ ७३ ॥

१. वा०–किं नासिताक्षि। र०–किं चालि पूर्णमृग०।

आलोक्येति ॥ हे सुन्दरि। मिलिन्दाः भ्रमराः। तव मन्दहासं मृदुहास्ययुक्तम्। मुखं आलोक्य। अरविन्दधिया कमलबुद्ध्या। अमन्दं

अस्यन्तम् । नन्दन्ति हृष्यन्ति । किं च । हे असिताक्षि असिते कृष्णे अक्षिणी यस्या सा, तत्सम्बुद्धौ । मृगलाञ्छनसम्भ्रमेण चन्द्रभ्रान्त्या । चकोराः । चञ्चूपुटं चिरं बहुकालपर्यन्तम् । चटुलयन्ति चपलयन्ति । हे भामिनि मृदुहास्ययुक्त तवानन यद्वा भ्रमराणां कमलभ्रमो जायते चकोराणां च चन्द्रभ्रम इति भावः । अत्रैकस्यैव मुखस्य मिलिन्दै कमलमिति चकोरैश्च मृगलाञ्छनोऽयमिति ग्रहणाद्वुल्लेखालङ्कारः । स च भ्रान्तिमता मिश्रितः । उदाहृतं चैतत्पत्र रसगङ्गाधरे (पृ० २७२) उल्लेखालङ्कारप्रसङ्गे । तल्लक्षणं च तत्रैव—" एकस्य वस्तुनो निमित्तवशाद्बहुभिर्ग्रहीतृभिरनेकप्रकारकं ग्रहणं तदुल्लेखः " इति ॥ वसन्ततिलकावृत्तम् ॥ ७३ ॥

स्मितं नैतत्किन्तु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा[1] कुसुम[2]मिदमुच्चत्परिमलम् ।
स्तनद्वन्द्वं मिथ्या कनकनिभमेतत्फलयुगं
लता रम्या सेयं भ्रमरकुलनम्या[3] न रमणी ॥ ७४ ॥

१. र०—मूढः । २. र० कुमुद° । ३. बा० °कुलरम्या ।

स्मितमिति ॥ एतत् स्मितं मृदुहसितम् । न । किन्तु । प्रकृतिरमणीयं प्रकृत्या स्वभावेन रमणीयं सुन्दरम् । विकसितं विकासः । कः वा इदं मुखं इति ब्रूते कथयति । इदं उच्चत्परिमलं उच्चन् उद्गच्छन् परिमलः आमोदः यस्मात् । तादृक् कुसुमं पुष्पम् । इदं स्तनद्वन्द्वं विद्यत इति यदि कश्चिद्ब्रवीति तत् मिथ्या अलीकम् । एतत् कनकनिभं सुवर्णसदृशम् । फलयुगं फलद्वन्द्वम् । सा इयं रमणी नारी न किन्तु भ्रमरकुलनम्या भ्रमरकुलैः भ्रमयितुं शक्या । लता । स्पष्टो भावः । अत्र सर्वेषामुपमेयभूतानां रमण्यवयवानां निषेधात्, तदुपमानानां च स्थापनाद्रूपकालङ्कारः । पद्यमिदं रसगङ्गाधरे (पृ० २७८) अपह्नुत्युदाहरणे पठ्यते । सावयवा चेयमपह्नुतिः । तल्लक्षणं च तत्रैव—" उपमेयतावच्छेदकनिषेधसामानाधिकरण्येनारोप्यमाणमुपमानतादात्म्यमपह्नुतिः " इति शिखरिणीवृत्तम् ॥ ७४ ॥

संग्रामाङ्गणसंमुखाहतकियद्विश्वंभराधीश्वर—
व्यादीर्णोक्ततमध्यभागविवरोन्मीलच्छोणीलिमा ।

अङ्गारप्रसरैः करैः कवलयन्नेतन्महीमण्डलं
मार्तण्डोऽयमुदेति केन पशुना लोके शशाङ्कीकृतः ॥ ७५ ॥

संग्रामेति ॥ उदयन्तं चन्द्रं दृष्ट्वा कस्यचिद्विरहिणः उक्तिरियम् । संग्रामाङ्गणसंमुखाहतक्षितिभृन्नराधीश्वरव्यादीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा संग्रामाङ्गणे रणक्षेत्रे संमुखं आहताः, अपलायनतया पृष्ठमदर्शयन्तो नाशिताः, ये केचन कतिपये, न तु बहवः, क्षितिभृन्नराधीश्वरा क्षितिभृतां पृथिव्याः अधीश्वराः स्वामिनः राजानः, तैः व्यादीर्णीकृतः विदारितः यः मध्यभागः, तस्य विवरेण छिद्रेण, उन्मीलन् प्रकाशमानः, यः नभसः आकाशस्य, नीलिमा कृष्णो वर्णः, सोऽस्यास्तीति । रणे अभिमुखं हताः क्षत्रियाः सूर्यमण्डलं भित्त्वा दिवं गच्छन्ति । उक्तं च महाभारते—"द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखं हतः" इति । तस्मात्सूर्यमध्यगतछिद्रान्तरिदृश्यमानं कार्ष्ण्यमेतत्, न तु चन्द्रगतः कलङ्क इति भावः । यतः—अङ्गारप्रसरैः अङ्गारवल्लीभिः । करैः किरणैः । एतत् महीमण्डलं पृथिवीमण्डलम् । कवलयन् भक्षयन् । अयं मार्तण्डः सूर्यः । उदेति । लोके अस्मिन् जगति । केन पशुना पशुवन्मूर्खेण । शशाङ्कीकृतः शशाङ्कत्वं चन्द्र इति कल्पितः । अङ्गारवल्लीभिः किरणैर्जगत्सन्तापयन् सूर्योऽयं न चन्द्र इति भ्रान्तो विरही चन्द्रं सूर्यं मन्यते । परमेतद्भ्रान्तिमदलङ्कारोदाहरणे पठ्यते रसगङ्गाधरे (पृ० २७९–८०) । उक्तं च तत्र—"अत्र विरहिजनवाक्ये नायं शशाङ्कः, अपि तु सच्छिद्रो मार्तण्ड इति तु छायामात्रमपह्नुते । नात्रापह्नुत्यलङ्कारः । तज्ज्ञानस्य दोषविशेषजन्यत्वेनानाहार्यत्वात् । किं तु भ्रान्त्यलङ्कार एव" इति । शार्दूलविक्रीडितं वृत्तम् ॥ ७५ ॥

श्यामं सितं च सुदृशो न दृशोः स्वरूपं
किं तु स्फुटं गरलमेतदथामृतं च[1] ।
नो चेत्कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ॥ ७६ ॥

१. बा०—स्फुटं च गरलमेतदथामृतं वा ।

श्यामामिति ॥ सुदृशः शोभननेत्रायाः अस्याः नायिकायाः । दृशोः नयनयोः । स्वरूपं स्वाभाविकः गुणः । श्यामं कृष्णम् । सितं श्वेतं च । न न

भवति । किं तु । एतत् स्वरूपम् । स्फुटं निश्चितम् । गरलं विषम् । अथ च अमृतम् । नो चेत् अन्यथा अनयोः नेत्रयोः । निपतनात् गात्रेषु पतनात् । तदैव तस्मिन्नेव क्षणे, निपतनसमकालमेव । युवानः नितरां अतिशयेन । मोहं मूर्च्छां । मुदं हर्षम् । च । कथं दधते धारयन्ति, प्राप्नुवन्तीत्यर्थः । अस्या मृगलोचनाया नेत्रयोः श्यामत्वं श्वेतत्वं वा न स्वरूपम्, किं तु विषममृतं चेति मन्तव्यम् । यतो गमननिपातसमकालमेव युवां मोहो हर्षश्च जायेते इति भावः । अपह्नुतिरलङ्कारः । एतमेतद्रसगङ्गाधरे (पृ० २७८) अपह्नुत्यलङ्कारोदाहरणे पठ्यते । वसन्ततिलकावृत्तम् ॥ ७६ ॥

अलिर्मृगो वा नेत्रं वा यत्र किंचिद्विभासते ।
अरविन्दं मृगाङ्को वा मुखं वेद[1] मृगीदृशः ॥ ७७ ॥

१. वा०—वेद ।

अलिरिति ॥ यत्र यस्मिन् मुखे । अलिः भ्रमरः वा । मृगः हरिणः वा । नेत्रं वा । किंचित् किमप्यनिर्वचनीयं वस्तु । विभासते शोभते । तत् इदं पुरोदृश्यमानम् । कमात्—अरविन्दं कमलं वा । मृगाङ्कः चन्द्रः वा । मृगीदृशः हरिणाक्ष्याः । मुखं वा । किमिदं हरिणीदृशो मुखं यत्र नेत्रं विभासते, उत कमलमेतद्यत्र भ्रमरो विलसति, अथवा चन्द्रोऽयं यत्र मृगः शोभत इति भावः । यत्र मुखरूपे वस्तुनि कमलचन्द्रयोराहार्यं संशयः, कवेर्वस्तुस्वरूपज्ञत्वात् । एतमिदं रसगङ्गाधरे (पृ० २६५) ससन्देहालङ्कारोदाहरणे पठ्यते । तल्लक्षणं च तत्रैव—"साहश्यमूला भासमानविरोधका समबला नानाकोट्यवगाहिनी धी रमणीया ससन्देहालङ्कृतिः" इति ॥ अनुष्टुप् छन्दः ॥ ७७ ॥

दयिते रदनत्विषां मिषा
दयि तेऽमी विलसन्ति केसराः ।
अपि चालकवेषधारिणो
मकरन्दस्पृहयालवोऽलयः[1] ॥ ७८ ॥

१. वा०—अपि चालकवेषधारिणी मकरन्दस्पृहयालिचोलयः ।

दयिते इति ॥ नायिकां प्रति नायकोक्तिरियम् । अयि दयिते हे प्रिये । ते तव । रदनत्विषां दन्तकान्तीनाम् । मिषात् व्याजात् । अमी पुरोदृश्य-

माना: । केसराः । किञ्जल्काः । विलसन्ति विकसन्ति । अपि च । अलकवेषधारिणः अलकाः चूर्णकुन्तलाः तेषां वेषं धारयन्ति, तच्छीलाः । मकरन्दस्पृहयालवः मकरन्दः पुष्परसः, मधु इति यावत्, तस्य स्पृहयालवः अभिलाषुकाः । अलयः भ्रमराः । विलसन्तीति शेषः । नेमा दन्तकान्तयोऽपितु पद्मकेसरा, न चेमे कुन्तलाः किंतु मधुलुब्धा भ्रमरा इति भावार्थः । अत्रापह्नुत्यलङ्कारः । पठ्यते चैतत्स्वं रसगङ्गाधरे (पृ० १३८,२८२) तदलङ्कारप्रसङ्गे । उक्तं च तत्र—" अत्र 'नैता रदनविषयः, किं तु किञ्जल्कपरम्परा । न चैतेऽलकाः, अपि त्वलयः' इति पूर्वोत्तरार्धाभ्यां द्वे अपह्नुती तावत्प्राकट्येनैव निषिद्धे । ताभ्यां च 'न स्त्री नारी, किं तु कमलिनी' इति तृतीयापह्नुतिर्व्यञ्जनाव्यापारेण प्राधान्येन निषेधते " इति । वैतालीयं वृत्तम् । तल्लक्षणं च—" षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्निरन्तराः । न समात्र पराभिता कला वैतालीयेऽन्ते रलौ गुरू " इति ॥ ७८ ॥

अनिशं नयनाभिरामया
रमया संमदिनो मुखस्य ते ।
निशि निःसरदिन्दिरं कथं
तुलयामः कलयापि पङ्कजम् ॥ ७९ ॥

अनिशमिति ॥ नायकस्य नायिकां प्रत्युक्तिः । अनिशं सर्वदा । नयनाभिरामया नयनयोः अभिरामया कमनीयया । ते तव । समदिन हर्षयुक्तस्य । मुखस्य । रमया शोभया । निशि रात्रौ । निःसरदिन्दिरं निःसरन्ती अपगच्छन्ती इन्दिरा शोभा यस्य तत् । पङ्कजं कमलम् । कलया अंशेन । अपि । कथं तुलयामः उपमिमीमहे । तव मुखस्य शोभा सर्वदास्थायिनी, कमलस्य तु दिवस एव, रात्रौ मुकुलितत्वात् । अतस्ते मुखं रात्रौ निःशोभेन कमलेन कथं तुलयाम इति भावः । अत्रोपमानात्कमलादुपमेयस्य मुखस्य शोभाविशेषोत्थापित उत्कर्षो व्यतिरेकसूचकः । व्यतिरेकालङ्कारः । पठ्यते चैतत्स्वमेतदलङ्कारोदाहरणे रसगङ्गाधरे (पृ० ३४७) । वैतालीयं वृत्तम् ॥ ७९ ॥

अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ।
विकलयति[1] कुसुमबाणो बाणालीभिर्मम प्राणान् ॥ ८० ॥

१. र०–प्रहरति ।

अङ्गैरिति ॥ नायकोक्तिरियम् । सा नायिका । सुकुमारतरैः अत्यन्तकोमलैः । अङ्गैः । कुसुमानाम् । श्रियं शोभाम् । हरति चोरयति । कुसुमबाणः मदनः । बाणालीभिः शरपङ्क्तिभिः, कुसुमरूपाभिरित्यर्थः । मम प्राणान् विकलयति विह्वलयति । नायिकया स्वकोमलैरङ्गैः कुसुमश्रीश्चोरिता । कुसुमबाणस्तु क्रुद्धः । यथा च चौर्यं कृतं तस्यामेव दण्डो युक्तः । किं तु तथा न कृत्वा मम प्राणान् व्याकुलीकुर्वन् मां दण्डयतीति भावः । अत्र यत्रापराधहेतुस्तत्र दण्डकार्यं युक्तम् । किं तु तयोर्वैयधिकरण्यं जातम् । अतोऽसङ्गत्याख्योऽलङ्कारः । उदाहृतं चैतदलङ्कारप्रसङ्गे पद्यमिदं रसगङ्गाधरे (पृ. ४४०) । तल्लक्षणं च तत्रैव–" विरुद्धत्वेनापाततो भासमानं हेतुकार्ययोर्वैयधिकरण्यमसङ्गतिः " इति । उपगीतिवृत्तम् ॥ ८० ॥

खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ।
खिद्यामि हन्त परितस्तद्रूपविलोकनेन विकलोऽहम्[1] ॥ ८१ ॥

१. र०–खिद्यन्ति हन्त परितस्तद्रूपविलोकिनस्तरुणाः ।

खिद्यतीति ॥ नायकोक्तिरियम् । कोमलचरणा सा नायिका । पथि मार्गे । यान्ती गच्छन्ती । नितम्बभारेण खिद्यति श्रममनुभवति । अहं पुनः । हन्त इति खेदे । परितः सर्वतः । तद्रूपविलोकनेन तदाकृतिदर्शनेन । विकलः विह्वलचित्तः सन् । खिद्यामि खेदमनुभवामि । गमनं नितम्बभारश्च नायिकायाः खेदहेतुर्मम पुनः परितस्तद्रूपविलोकनमिति भावः । असङ्गतिरलङ्कारः । पठितं चैतत्पद्यं रसगङ्गाधरे (पृ. ४४१) । गीतिवृत्तम् ॥ ८१ ॥

मधुरागमनोन्मुखे मुरारा—
वसुभारातिभृता व्रजाङ्गनानाम् ।
प्रलयज्वलनायते स्म राका
भवनाकाशमजायताम्बुराशिः ॥ ८२ ॥

मथुरेति ॥ मुरारौ श्रीकृष्णे । मथुरागमनोन्मुखे मथुरां गन्तुं उद्यते सति । असुभारार्तिभृतां असव: प्राणा: एव भार: तस्य आर्तिं पीडां बिभ्रति धारयन्ति इति तासाम् । प्राणभारपीडामावहन्तीनाम् । व्रजाङ्गनानां गोपस्त्रीणाम् । राका पूर्णिमा । प्रलयज्वलनायते स्म प्रलयस्य ज्वलन अग्नि: इव आचरति स्म । तया । भवनाकाशे भवनस्य गृहस्य आकाश प्रदेश: । अम्बुराशि: समुद्र: । अजायत । अश्रुजलपूर्णत्वात् । यदा श्रीकृष्णो मथुरां गन्तुमुद्यतोऽभवत्तदा गोपीना पूर्णिमापि प्रलयाग्निवद्दाहकर्मभूत, गृहप्रदेशश्च तदश्रुजलै: समुद्रोपमो बभूवेति भाव: । उपमालङ्कार: । मालभारिणी-वृत्तम् ॥ ८२ ॥

केलीमन्दिरमागतस्य शनकैरालीरपास्येङ्गितै-
सुप्ताया: सरुष: सरोरुहदृशा: संवीजनं कुर्वत:
आनन्त्याप्यनभिज्ञयेव कपटव्यामीलिताक्ष्या सखि
श्रान्तासीत्यभिधाय वक्षसि तया पाणिर्ममासञ्जित:[1] ॥८३॥

१. र०—'नैमार्धीयत ।

केलीति ॥ नायकस्य मित्रे प्रत्युक्ति: । केलीमन्दिरं क्रीडाभवनम् । आगतस्य प्राप्तस्य । इङ्गितै: अङ्गुल्यादीनां चेष्टाभि: । शनकै: शनै: । शब्दादिकरणं विना । आली: प्रियासखी: । अपास्य दूरीकृत्य । सुप्ताया: व्याजनिद्रिताया: । सरुष: प्रणयकुपिताया: । सरोरुहदृशा: कमलनयनाया: । संवीजनं कुर्वत: व्यजनादिना वायुसञ्चारणं कुर्वत: । आनन्त्या प्रियोऽयं मां वीजयति न तु सख्य: इति आनन्त्या । अपि । अनभिज्ञया अज्ञया इव । कपटव्यामीलिताक्ष्या कपटेन छद्मना व्यामीलिते अक्षिणी यया तया । सखि । व्यजनकरणेन श्रान्ता खिन्ना । असि । इति अभिधाय उक्त्वा । तया स्वे वक्षसि उरःस्थले । मम पाणि: हस्त: । आसञ्जित: स्थापित: । काचित्कुपिता नायिका रतिमन्दिरे व्याजसुप्तासीत् । तत्र गतो नायको निःशब्दं सखीजनं ततो दूरीकृत्य नायिकां स्वहस्तेन वीजयितुमारेभे । सा च 'प्रियो मां वीजयति, न काचित्सखी' इति जानन्त्यपि कपटनिमीलित-नयनामभिज्ञेव च 'हे सखि श्रान्तासि' इत्युक्त्वा प्रियहस्तं स्ववक्षःस्थले निहितवतीति भाव: । एषमेतद्प्रहर्षणालङ्कारप्रसङ्गे रसगङ्गाधरे (पृ० ५०४)

पद्यते । तत्रैव—"साक्षात्सदुद्देश्यकयत्नमन्तरेणाभीष्टार्थलाभः प्रहर्षणम्" इति लक्षयित्वालङ्कारं पण्डितराज आह—"अत्र भामिन्या रोषनिवारणाय यत्ने क्रियमाणे रोषनिवारणाद्यधिकतरसुखप्रदः कामुकस्य भामिनीकर्तृकः स्वकरकर्षकस्तत्कुचाधिकरणक आस्वादः" इति । शार्दूलविक्रीडितं वृत्तम् ॥८३॥

मान्थर्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाधरबिम्बमासीत् ।
किं चाभवन्मृगकिशोरदृशो नितम्बः
सर्वाधिको गुरुरयं सह मन्मथेन ॥ ८४ ॥

मान्थर्यमिति ॥ मृगकिशोरदृशः मृगकिशोरस्य मृगशावस्य दृशौ इव दृशौ यस्याः तस्याः । गमनं गतिः । शैशवेन बाल्येन । सह । मान्थर्यं मन्दत्वम् । आप प्राप्तम् । शैशवमपगतं गतिश्च मन्दा जातेत्यर्थः । अधरबिम्बं अधरो बिम्ब इव इति । मनसा सह । रक्तं ताम्रवर्णम् । मनःपक्षे अनुरागयुक्तम् । आसीत् । किं च । अयं नितम्बः । मन्मथेन कामेन । सह । सर्वाधिकः । गुरुः विस्तृतः । कामपक्षे महान् । अभवत् । एष्टो भावः । सहोक्तिरलङ्कारः । पद्यते चैतदुदाहरणमस्मिन् पद्यमिदं रसगङ्गाधरे (पृ० ३६३) । तल्लक्षणं च तत्रैव—"गुणप्रधानभावाद्यन्विलक्षणार्थसम्बन्धः सहोक्तिः" इति । वसन्ततिलका वृत्तम् ॥ ८४ ॥

श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ।
तस्याः सुभग[1] कथेयं तिष्ठतु तावत्कथान्तरं कथय ॥८५॥

१. बा०—सुरतकथेव ।

श्वास इति ॥ नायकं प्रति विरहपीडितायाः नायिकायाः अवस्थां निवेदयति कश्चित् । हे सुभग सुन्दर । तस्याः नायिकायाः । श्वासः श्वसितम् । अनुमानवेद्यः अनुमानेन—एतन्नासिकाग्रसंस्थापितं वस्त्रं कम्पते, अतो ध्रुवमद्यापि श्वसितीयमेतादृशेनानुमानेन, न तु प्रत्यक्षेण—वेद्यः ज्ञेयः । अङ्गानि गात्राणि । शीतानि । दृष्टिः नेत्रयुगलम् । निश्चला इतस्ततो भ्रमणरहिते नेत्रे सञ्जाते इत्यर्थः । इयं एतादृशी । तस्याः कथा वार्ता । तिष्ठतु तावत् अत्रैव विश्राम्यतु । त्वं पुनः । कथान्तरं अन्यत् किंचित् । कथय ब्रूहि । तस्या नायिकायाः श्वासोऽतिसूक्ष्मो जातः, अङ्गानि शीतत्वं प्राप्तानि, दृष्टिः

स्थिरः भूता–एव स्वद्विरदे सा जाता–अथवा तिष्ठत्वेकस्तर्वम्। त्व पुनरन्य-किंचिद्गृहीति नायक प्रत्युक्तिः कस्यचिदिति भाव। अत्र नायिकानिर्वाणया कथाया अंशमात्र कथयित्वा शिष्टकथाभागे निषेधस्तदुःखहेतव द्योतयति। आक्षेपालङ्कारः। पद्यते च पद्यमिदं तदुदाहरणप्रसङ्गे रसगङ्गाधरे (पृ० ४२२) गीतिवृत्तम् ॥ ८५ ॥

पाणौ कृतः पाणिरिलासुतायाः
सस्वेदकम्पो रघुनन्दनेन।
हिमाम्बुमन्दानिल [1]विह्वलस्य
प्रभातपद्मस्य बभार शोभाम् ॥ ८६ ॥

१. नि०, बा०–"गङ्गानिल"। प०, वै० वे०–"शीतानिल"।

पाणाविति ॥ रामविवाहवर्णनमिदम्। रघुनन्दनेन रामेण। इलासुतायाः इला पृथिवी तस्याः सुतायाः सीताया इति यावत्। पाणिः हस्तः। स्वकीये पाणौ हस्ते। कृतः गृहीतः। सस्वेदकम्पः स्वेदश्च कम्पश्च ताभ्यां सहितः सन्। सात्त्विकभावोद्रेकात्। हिमाम्बुमन्दानिलविह्वलस्य हिमाम्बुना हिमकणैः विह्वलस्य आकीर्णस्य, मन्दानिलेन मन्दवायुना च विह्वलस्य कम्पितस्य। प्रभातपद्मस्य प्रातःकाले ईषद्विकसितस्य कमलस्य। शोभा बभार धारितवान्। विवाहसमये रामेण स्वहस्ते गृहीतः सीताहस्तः सात्त्विकभावोदयात्स्वेदकम्पाभ्यां युक्तो बभूव। अतः प्रभात ईषद्विकसितस्य हिमकणैर्व्याप्तस्य तथा मन्दवायुना कम्पितस्य च कमलस्य शोभां दधावभाविति भावः। निदर्शनालङ्कारः। पद्यमेतद्रसगङ्गाधर उदाहृतः (पृ ३४१) पण्डितराजेनोच्यते– 'अत्र हिमाम्बुजनितविह्वलता हिमकणकीर्णतारूपा वा। तज्जनितविह्वलता च विधुतिरूपा। एताभ्यां च सस्वेदतासोत्कम्पितत्वयोः प्रतिबिम्बनमिति पूर्वस्मादुदाहरणाद्भेदः। प्रभातपदसंनिधानाच्च पद्मस्यैवाधिकारसमुद्रणयो प्रत्ययास्पदत्वमपि नरसिंहः। अस्या चोपमालोपमेयगतधर्मयोरार्थाभेदप्रतिपत्तिः। अतः पदार्थनिदर्शनोच्यते" इति। निदर्शनालक्षणं च तत्रैव "उपात्तयोर्धर्मयोरार्थाभेद औपम्यपर्यवसायी निदर्शना" इति उपजातिवृत्तम् ॥ ८६ ॥

अरुणमपि विद्रुमर्द्धं मृदुलतरं चापि किसलयं बाले ।
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥ ८७ ॥

अरुणमिति ॥ नायकस्य नायिकां प्रति चाटूक्तिः । हे बाले । तव अधरः । मधुरिमातिशयात् मधुरिमणः माधुर्यस्य अतिशयात् आधिक्यात् । अरुणं रक्तवर्णं अपि । विद्रुमर्द्धं प्रवालवृक्षम् । मृदुलतरं अतिकोमलम् । किसलयं पल्लवम् । च अपि । नितरां अत्यन्तम् अधरीकरोति तुच्छीकरोति । तवाधरो रक्तवर्णप्रवालवृक्षाद्रक्ततरः, किसलयाच्च कोमलतर इति भावः । व्यतिरेकालङ्कारः । उदाहृतं चैतत्पद्यमेतदलङ्कारप्रसङ्गे रसगङ्गाधरे (पृ० ३५७) । तल्लक्षणं च तत्रैव—"उपमानादुपमेयस्य गुणविशेषवत्त्वे तोत्कर्षो व्यतिरेकः" इति । आर्यावृत्तम् ॥ ८७ ॥

नयनं[1] वहतां नु खञ्जनानामिह नानाविधमङ्ग[2]भङ्गभाग्यम् ।
मुखमेतु तुला कथं[3] सुशोभं सुदृशो भङ्गुरसम्पदाम्बुजेन ॥ ८८ ॥

१. र०, वै०, शे०—नयनानि । २. वै०, शे०—नानाविधमङ्गग भङ्गभाग्यम् । ३. वा०—°भङ्गि । ४. र०, वै०, शे०—सदृशं कथमाननं ।

नयने इति ॥ सुदृशः । मृगाक्ष्याः । नयने । इह जगति । खञ्जनानां खञ्जरीटानां पक्षिणाम् । नानाविधं अनेकप्रकारम् । अङ्गभङ्गभाग्यं अङ्गानां अवयवानां भङ्गाः तरङ्गाः तेषां भाग्यं सौन्दर्यम् । वहतां धारयताम् । परन्तु सुशोभं मुखं । भङ्गुरसम्पदा भङ्गुरा क्षणस्थायिनी सम्पत् शोभा यस्य तेन । अम्बुजेन कमलेन । कथं । तुलां उपमाम् । एतु गच्छतु । नायिकाया नयने यथाकथञ्चित् खञ्जरीटानामवयवस्तङ्गसादृश्यं धारयतां, किन्तु समीचीनशोभमस्या मुखमनियतशोभेन कमलेन कथं सदृशं स्यात्—कमलादधिकसुन्दरं मुखमिति भावः । व्यतिरेकालङ्कारः । पद्यमिदं रसगङ्गाधरे (पृ० ३४८) व्यतिरेकोदाहरणे पठ्यते । मालभारिणीवृत्तम् ॥ ८८ ॥

सुदृशो जितरत्नजालया सुरतान्तश्रमबिन्दुमालया ।
अलिकेन[2] च हेमकान्तिना विदधे कापि[3] रुचिः परस्परम् ॥ ८९ ॥

१. वा०—सुदृशोज्जितरत्नमालया । २. वा०—अलकेन । ३. वा०—कांति ।

सुदृशः इति ॥ सुरतश्रान्तायाः नायिकायाः वर्णनम् । सुदृशः चारुनेत्रायाः । जितरत्नजालया जितं रत्नजालं रत्नसमूहः यया तया ।

सुरतान्तश्रमबिन्दुमालया सुरतान्ते संभोगावसाने ये श्रमबिन्दवः स्वेदबिन्दवः तेषां मालया पङ्क्त्या। हेमकान्तिना हेम्नः सुवर्णस्य कान्तिः शोभा इव कान्तिः यस्य तेन। आलिकेन ललाटेन। परस्परं अन्योन्यम्। का अपि अनिर्वचनीया। रुचिः शोभा। विदधे कृता। स्वेदबिन्दुभिर्ललाटेन च परस्परं सौन्दर्यवर्द्धनं कृतमिति भावः। अन्योन्यालङ्कारः। यथमिदं रसगङ्गाधरे (पृ० ४५५) एतदलङ्कारसङ्ग्रहे पठ्यते। तल्लक्षणं च तत्रैव—"द्वयोरन्योन्येनान्योन्यस्य विशेषाधानमन्योन्यम्" इति। मालभारिणीवृत्तम् ॥ ८९ ॥

परपुरुषदृष्टिपातवज्राहतिभीता हृदयं प्रियस्य सीता।
आविशत्परकामिनीभुजङ्गीभयतः सत्वरमेव सोऽपि तस्याः ॥९०॥

परेति ॥ परपुरुषदृष्टिपातवज्राहतिभीता परपुरुषाणां स्वपतिभिन्नानां दृष्टिपातः एव वज्राहतिः वज्रताडनं, तस्याः भीता। सीता। प्रियस्य रामस्य। हृदयं आविशत्। सः रामः। अपि। परकामिनीभुजङ्गीभयतः परकामिन्याः परस्त्रियः एव भुजङ्ग्यः सर्पिण्यः तासां भयं तस्मात्। तस्याः सीतायाः। हृदयं सत्वरं शीघ्रं एव। अविशत्। स्पष्टो भावः। अन्योन्यालङ्कारः। यथमिदं रसगङ्गाधरे (पृ० ४५५) एतदलङ्कारोदाहरणं पठ्यते। गीतिवृत्तम् ॥ ९० ॥

जम्बीरश्रियमतिलङ्घ्य लीलयैव
ध्यानश्रीकृतकमनीयहेमकुम्भौ।
नीलाम्भोरुहनयनेऽधुना कुचौ ते
स्पर्धेते किल कनकाचलेन सार्धम् ॥ ९१ ॥

जम्बीरेति ॥ नायकस्य नायिकां प्रति चाटूक्तिः। हे नीलाम्भोरुहनयने नीलोत्पलसदृशनेत्रे। ते कुचौ। जम्बीरश्रियं जम्बीराख्यस्य प्रसिद्धस्य फलस्य श्रियं शोभाम्। लीलया अनायासेन। एव। अतिलङ्घ्य अतिक्रम्य ध्यानश्रीकृतकमनीयहेमकुम्भौ ध्यानश्रीकृतौ जितौ कमनीयौ सुन्दरौ हेम्नः सुवर्णस्य कुम्भौ घटौ तौ। अधुना। कनकाचलेन सुवर्णपर्वतेन। सार्धं। स्पर्धेते सुवर्णपर्वतं जेतुं इच्छा कुरुतः। किल निश्चयेन। तव कुचौ जम्बीरपरिमाणाकुम्भपरिमाणौ भूत्वाधुना पर्वताकारौ जातावुच्चरोत्तर-

मुत्कर्षमनुभवत इति भावः । सारालङ्कारः । सारालङ्कारोदाहरणे रसगङ्गाधरे (पृ० ४६५) पठ्यते पद्यमिदम् । तल्लक्षणं च तत्रैव—" सैव संसर्गस्योत्कृष्टापकृष्टभावरूपत्वे सारः " इति । प्रहर्षिणीवृत्तम् । " म्नौ ज्रौ गश्चि दशयति. प्रहर्षिणीयम् " इतिलक्षणम् ॥ ९१ ॥

अङ्गानि दत्त्वा हेमाङ्गि प्राणान् क्रीणासि चेन्नृणाम् ।
युक्तमेतन्नतु पुन ' कोणं नयनपद्मयोः ॥ ९२ ॥

१. र—पुनर्लोचनाम्बुरुहद्वयम् ।

अङ्गानीति ॥ हे हेमाङ्गि सुवर्णवर्णावयवे । अङ्गानि आलिङ्गनेन सर्वाणि गात्राणि । दत्त्वा । नृणां प्राणान् क्रीणासि चेत् यदि । तर्हि । एतत् युक्तं समीचीनम् । पुन किंतु । नयनपद्मयोः नेत्रकमलयोः । कोणं एकदेशं अपाङ्गमित्यर्थः । दत्त्वा यत् त्वं नृणां प्राणान् क्रीणासि तत् न युक्तम् । सर्वेषामङ्गानां दानेन मनुष्याणां प्राणान् यत्त्वं क्रीणासि तद्विनिमयस्य समत्वादुचितम् । किं तु यदा नेत्रकटाक्षमात्रेण नराणां प्राणान् गृह्णासि तत्र युक्तमिति भावः । परिवृत्तिरलङ्कारः । तदुदाहरणे च पठ्यते पद्यमिदं रसगङ्गाधरे (पृ० ४८१) तल्लक्षणं च तत्रैव—" परकीययत्किंचिद्वस्त्वादानविशिष्टं परस्मै स्वकीययत्किंचिद्वस्तुसमर्पणं परिवृत्तिः " इति ॥ अनुष्टुब्वृत्तम् ॥ ९२ ॥

जितमौक्तिकसम्पदां[1] रदानां
सहवासेन परां मुदं दधानम् ।
विरसादधरीकरोति[2] नासा—
मधुना साहसशालि मौक्तिकं ते ॥ ९३ ॥

१. बा०, नि०—जितरत्नकनाम् । २. नि०—अधरीकुरुते शुभाङ्गि ।

जितेति ॥ नायकस्य नायिकां प्रति चाटूक्तिरियम् । जितमौक्तिकसम्पदां जिता मौक्तिकानां मुक्ताफलानां सम्पत् शोभा यैः तेषाम् । रदानां दन्तानाम् । सहवासेन सङ्गेन । परां महतीम् । मुदं हर्षम् । दधानां धारयन्तीम् । ते नासा नासिकाम् । अधुना । साहसशालि अशक्ये कर्मणि प्रयतमानम् । मौक्तिकं नासिकास्थितमित्यर्थः । विरसात् विरसत्वात् । भावप्रधानो निर्देशः । अधरीकरोति नीचीकरोति । दन्तैर्मौक्तिकानि जितानि तेषां दन्तानां सहवासेन नासिकाया महान्हर्षोऽभूत् । सैव च नासिकाधुना-

न्येन मौक्तिकेन जीयत इति भावः। अत्र स्वजातीयानां पराभवं कुर्वतां दन्तानां कलाप्रकारं कर्तुमसमर्थं नासामौक्तिकं दन्तसम्बन्धिन्या नासिकाया पराभवं कुरुत इति वर्णनात्प्रत्यनीकालङ्कारोऽयम्। पठ्यते च पद्मिनीप्रभेतदलङ्कारोदाहरणप्रसङ्गे रसगङ्गाधरे (पृ० ४९४)। तल्लक्षणं च तत्रैव— "प्रतिपक्षसम्बन्धिनस्तिरस्कृतिः प्रत्यनीकम्" इति। मालभारिणी वृत्तम् ॥ ९३ ॥

निभाल्य भूयो निजगौरिमाणं
मा नाम मानं सहसैव यायाः।
गृहे गृहे पश्य तवाङ्गवर्णा
मुग्धे सुवर्णावलयो लुठन्ति ॥ ९४ ॥

१. र०—हृदये विधासी। प०—शे०—सहसैव यायाः।

निभाल्येति ॥ हे मुग्धे बाले। निजगौरिमाणं आत्मनः गौरत्वम्- भूयः पुनः पुनः। निभाल्य दृष्ट्वा। सहसा अविचार्य। एव। मानं अभिमानम्। नाम खलु। मा यायाः मा गच्छ। गृहे गृहे प्रतिगृहम्। तवाङ्गवर्णाः तव अङ्गानां गात्राणां वर्णः इव वर्णः यासां ताः। सुवर्णावलयः सुवर्णस्य अवलयः पङ्क्तयः। लुठन्ति अनादृताः एव पतन्ति। इति पश्य। वारं वारं स्वशरीरगौरतामवलोक्य, हे बाले, मा वृथाभिमानं कुरु, ननु त्वच्छरीरतुल्यवर्णाः काञ्चनपङ्क्तयोऽत्र प्रतिगृहं लुठन्तीति भावः। प्रतीपालङ्कारः। पठ्यते चैतत्पद्यं रसगङ्गाधरे (पृ० ४९६) अस्यैवालङ्कारस्योदाहरणत्वेन। तल्लक्षणं च तत्रैव— "उपमानोपमेययोरन्यतरस्य किंचिद्गुणमनुक्त्वाद्वितीयतोत्कर्षं परिहर्तुं द्वितीयप्रदर्शनेनोपस्थीयमानं सादृश्यमपरं द्विविधम्" इति ॥ उपेन्द्रवज्रावृत्तम् ॥ ९४ ॥

करिकुम्भतुलामुरोजयोः क्रियमाणा कविभिर्दिशृङ्खलैः।
कथमालि शृणोषि सादरं विपरीतार्थ विदो हि योषितः ॥ ९५ ॥

करोति ॥ हे आलि सखि। दिशृङ्खलैः अनर्गलैः। कविभिः। क्रियमाणां। उरोजयोः कुचयोः। करिकुम्भतुलां करिणः गजस्य कुम्भयोः गण्डयोः तुलां समानताम्। सादरं आदरपूर्वकम्। कथं शृणोषि। सादरश्रवणमयुक्तं, यतो द्वयोः साम्यमेव नास्ति। त्वं च यच्छृणोषि तस्य हेतुं कथं तमेव चतुर्थचरणेन सम्पादयति। हि यतः। योषितः स्त्रियः। विपरीतार्थ-

विद् विपरीतं यथार्थं अर्थं ज्ञानं विदन्ति जानन्ति इति। गजगण्डयोः कुचाभ्यां साम्यमिति श्रवणस्यानौचित्यम्, तच्च भ्रान्तत्वं विना न सम्भवति। अतः स्त्रियः स्वभावेन भ्रान्ता इति भावः। अत्र 'स्त्रियः स्वभावेन विपरीतार्थविद्' इति सामान्येन नायिकागतभ्रान्तत्वरूपो विशेषः समर्थ्यते। अतोऽर्थान्तरन्यासोऽलङ्कारः। 'कथं श्रृणोषि' इत्यनेन तुल्यं न सम्भवतीति गम्यते—अयं च प्रतीपालङ्कारः। स चार्थान्तरन्यासेन पुष्यते। पथमिव रसगङ्गाधरे (पृ ४०१, ४९६) प्रतीपार्थान्तरन्यासालङ्कारयोरुदाहरणत्वेन पठ्यते। सुन्दरीवृत्तम् ॥ ९५ ॥

तिरस्कृतो रोषवशात्परिष्वज[1]—
प्रियो मृगाक्ष्या शयितः पराङ्मुखः।
किं दुःखितोऽसाविति कांदिशीकया
कयाचिदाचुम्ब्य चिराय सस्वजे ॥ ९६ ॥

१. बा० पै०—परिष्वजन् रोषवशात्तिरस्कृतः। २. र०—मूर्च्छितो।

तिरस्कृत इति ॥ परिष्वजन् आलिङ्गन्। मृगाक्ष्या हरिणाक्ष्या। रोषवशात् प्रणयकोपहेतोः। तिरस्कृतः भर्त्सितः। प्रियः कान्तः। पराङ्मुखः। शयितः। 'किं असौ दुःखितः' मम व्यवहारेण खिन्न—इति कांदिशीकया भयद्रुतया। कयाचिन्नायिकया। आचुम्ब्य चिराय चिरकालम्। सस्वजे आलिङ्गितः। रुष्टा काचिन्नायिका परिष्वजन्तं प्रियं प्रत्याख्यातवती—असौ वराको मुख पराङ्मुख्य शयितः—मद्व्यवहारेण खिन्नोऽयमिति भीता नायिका स्वयमेव तं परिचुम्ब्य परिष्वजतीति भावः। अत्र विनापि यत्नं नायकस्याभीष्टप्राप्तेः प्रहर्षणाख्योऽलङ्कारः। पठितं च पथमेतत्तदलङ्कारप्रसङ्गे। रसगङ्गाधरे (पृ० ५०४) वशस्थं वृत्तम् ॥ ९६ ॥

चेलाञ्चलेनाननशीतरश्मिं
संवृण्वतीनां हरिदश्वरीणाम्।
व्रजाङ्गनानां[1] सरजातकम्पा—
दकाण्डसम्पातमियाय नीवी ॥ ९७ ॥

१. र०—गोपाङ्गनानां।

वेलेति ॥ हरिदश्वरीणां हरिं कृष्णं दृष्टवत्य इति हरिदश्वर्यः, तासाम् । अत एव—लज्जया । चेलाञ्चलेन वेलस्य वसनस्य अञ्चलेन प्रान्तेन । आननशीतरश्मिं मुखचन्द्रम् । संतृप्यतीनां आदधतीनाम् । व्रजाङ्गनानां गोपीनाम् । नीवीं वस्त्रग्रन्थिः । स्मरजातकम्पात् स्मरेण मदनेन हेतुना जातः यः कम्पः तस्मात् । सात्त्विकभावोदये कम्पो जायते । अकाण्डपातं अकाण्डे सहसा पातं पतनम् । इवाय प्राय । श्रीकृष्णं दृष्ट्वा गोपीभिर्मुखान्याच्छादितानि, किन्तु मदनजनितेन कम्पेन तासां वसनग्रन्थिः सहसैवापतदिति भावः । विषादनाम्नोऽलङ्कारः । उक्तं च रसगङ्गाधरे (पृ० ५०६)—"अत्रेष्टस्यानन्दगोपनस्य विरुद्धोऽर्थो नीवीस्खलनम् । कारणीभूतत्वापरिपन्थित्वात् । तच्च सात्त्विककम्पस्वरूपात्स्वकारणादेवोत्पन्नम्, न तु गोपनानुकूलत्वात् । नापीष्टसाधनत्वेन प्रयुक्तात्कारणादिष्टानुत्पत्तिरस्ति । चेलाञ्चलावरणेनाननगोपनरूपस्येष्टस्योत्पत्तेः । अतो विषादनमेवात्र न विघ्नम्" इति । उपजातिवृत्तम् ॥ ९७ ॥

अधरेण समागमाद्रदानामरुणिम्ना पिहितोऽपि शुक्लभावः ।
हसितेन सितेन पद्मलाक्ष्याः पुनरुल्लासमवाप जातपक्षः ॥९८॥

अधरेणेति ॥ अधरेण अधरोष्ठेन । समागमात् सम्पर्कात् । अरुणिम्ना अरुणस्य रक्तवर्णस्य भावः अरुणिमा तेन । पद्मलाक्ष्याः पद्मले नयने अक्षिणी यस्याः सा तस्याः । रदानां दन्तानाम् । शुक्लभावः श्वेतवर्णः । पिहितः आच्छादितः । अपि । सितेन श्वेतेन । हसितेन । जातपक्षः जातः पक्षः सहायः यस्य । पुनः उल्लासं अवाप प्रादुर्बभूव । रक्तवर्णाधरोष्ठसहवासाद् दन्तानां श्वेतवर्णः पिहितोऽपि नायिकायाः शुक्लवर्णहसितसाहाय्यं प्राप्य पुनः प्रादुर्बभूवेति भावः । अत्र दन्तैः शुभ्रत्वरूपः स्वगुणः परित्यक्तः, अधरस्य च रक्तो गुणो गृहीत इति कृत्वा तद्गुणाख्योऽयमलङ्कारः । पठितं चैतत्कं रसगङ्गाधरे (पृ० ५१३) अस्यालङ्कारस्योदाहरणत्वेन । अलङ्कारलक्षणं च तत्रैव—"स्वगुणत्यागपूर्वकं स्वसंनिहितवस्त्वन्तरसम्बन्धिगुणग्रहणं तद्गुणः" इति । मालभारिणीवृत्तम् ॥ ९८ ॥

सरसिरुहोदरसुरभावधरितबिम्बाधरे मृगाक्षि तव ।
वद वदने मणिरदने ताम्बूलं केन लक्षयेम वरम् ॥ ९९ ॥

सरसीति ॥ प्रियेण 'ताम्बूलं कुतो न गृह्णासि' इत्युक्ते 'एतावन्तं कालं ताम्बूलानि भुक्त्वैव समागतास्मि' इत्युक्तवतीं प्रति तस्येयमुक्तिः । हे मृगाक्षि ! सरसिरुहोदरसुरभौ सरसि रोहतीति सरसिरुहं तस्य उदरं मध्यभाग इव सुरभौ सुगन्धयुक्ते । अधरितबिम्बाधरे अधरितं तुच्छीकृतं बिम्बं बिम्बफलं येन तादृशः अधरः अधरोष्ठः यस्मिन् तस्मिन् । मणिरदने मणय इव रदनाः दन्ताः यस्मिन् तस्मिन् । तव वदने मुखे । वयं ताम्बूलं ताम्बूलभक्षणम् । केन लिङ्गेन । लक्षयेम तर्कयेम । हे मृगलोचने कमलवत्सुगन्धिनि रक्ताधरे मणिसदृशदन्ते च ते मुखे ताम्बूलभक्षणं लक्षयितुं न पारयामो वयम् । मुखस्य स्वाभाविकरक्तत्वात् स्वाभाविकसुगन्धत्वाच्च ताम्बूलगुणास्तत्र निवसन्तीति भावः । मीलितालङ्कारः । पठ्यते चैतत्पद्यमेतदलङ्कारप्रसङ्गे रसगङ्गाधरे (पृ० ५१५) । अलङ्कारलक्षणं च तत्रैव— "स्फुटमुपलभ्यमानस्य कस्यचिद्वस्तुनो लिङ्गैरतिसाम्यादभिन्नत्वेनागृह्यमाणानां वस्त्वन्तरलिङ्गानां स्वकारणाननुमापकत्वं मीलितम्" इति । गीतिवृत्तम् ॥९९॥

शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।
दयिता दयितानताम्बुजं दरमीलन्नयना निरीक्षते ॥ १०० ॥

शयितेति ॥ सविधे पार्श्वे । अपि । पत्युरिति शेषः । शयिता सुप्ता । मनोरथान् आलिङ्गनचुम्बनादीन् स्वाभिलाषान् सफलीकर्तुं पूरयितुम् । अनीश्वरा असमर्था, लज्जावशादित्यर्थः । दयिता प्रिया नायिका । दरमीलन्नयना दरं ईषत् मीलती संकुचिते नयने यस्याः सा । दयितानताम्बुजं दयितस्य प्रियस्य मुखकमलम् । निरीक्षते अवलोकयति । पार्श्वे सुप्तापि नायिका मुग्धभावेन लज्जया च स्वदयितस्यालिङ्गनादिकं कर्तुमसमर्था सती केवलमीषन्मुकुलितनेत्राभ्यां तद्वदनमवलोकयतीति भावः । अत्र दरमीलन्नयनेति पदेन लज्जा व्यज्यते, निरीक्षत इति पदेन च नायके रतिः । शृङ्गारध्वनिरयम् । पद्यमिदं रसगङ्गाधरे (पृ० १०) उत्तमकाव्योदाहरणत्वेन पठ्यते । सुन्दरीवृत्तम् ॥ १०० ॥

किमिति कृशासि कृशोदरि किं तव परकीयवृत्तान्तैः ।
कथय तथापि मुदे मम कथयिष्यति पथिक तव जाया ॥१०१॥

किमिति ॥ कस्याश्चित्प्रोषितभर्तृकायाः पान्थेन सह संवादोऽयम् । हे कृशोदरि तनुमध्ये । किमिति कस्मात् कारणात् । कृशा क्षीणा । असि ।

सोत्तरं ददाति—परकीयवृत्तान्ते तव किं प्रयोजनम्। पुनः पान्थः पृच्छति—तथा अपि मम मुदे हर्षाय। कथय। नायिकोत्तरं ददाति—तव जाया भार्या। कथयिष्यति। एतदपि रसगङ्गाधरे (पृ० ५२०) उत्तरालङ्कारोदाहरणे पठ्यते। उक्तं च तत्र ग्रन्थकृतैतदाख्यानावसरे—"अत्राद्यप्रश्नस्य हेतुं वेद्मि तदा प्रतिकरिष्यामीति व्यङ्ग्यम्। उत्तरस्य तु न मया पतिव्रतया हेतुर्वक्तुं परपुरुषं प्रति योग्यः, न च त्वया प्रतिकर्तुं शक्य इति। द्वितीयप्रश्नस्य त्वत्र पातिव्रत्येनाविदग्धजनहठमात्रविलसितेन। स्वपरसन्तोषएव संसारसार इति। द्वितीयोत्तरस्य तु या मम दशा सैव तव जायाया अपि दशास्ति। सैव प्रतिक्रियताम्। न हि स्वकीयं सदनं दह्यमानमुपेक्ष्य कश्चित्परसदनाग्निं प्रतिकरोति। अस्य यदि परोपकारः स्वकीयां क्षतिमपि सोढ्वा करणीय इत्यस्ति मनीषा तदा तवैवंविधोपकारे प्रवृत्तस्य जायायाः केनचिद्रूपेण भवादृशोपकारः करणीय इति त्वमेव तस्या जयेव परपुरुषपराङ्मुख्या चित्तो दूरी कर्तव्य इति"। अलङ्कारलक्षणं च तत्र—"प्रश्नप्रतिबन्धकज्ञानविषयीभूतोऽर्थ उत्तरम्" इति। आर्यावृत्तम् ॥ १०१ ॥

वदनारविन्दसौरभलोभादिन्दिन्दिरेषु[1] निपतत्सु।
मध्यधरार्थिनि सुदृशो दृशो जयन्त्यतिरुषा परुषाः ॥ १०२ ॥

१. नि०—दिन्दिरेषु

२ इति श्रीपण्डितराजजगन्नाथविरचिते भामिनीविलासे शृङ्गारविलासः ॥

वदनेति ॥ वदनारविन्दसौरभलोभात् वदनारविन्दस्य मुखकमलस्य सौरभस्य परिमलस्य लोभात्। इन्दिन्दिरेषु भ्रमरेषु। निपतत्सु। एतेन नायिकायाः पद्मिनीत्वं व्यज्यते। अधरार्थिनि अधरपानं प्रार्थितवति। अपि। सुदृशः शोभननेत्रायाः। अतिरुषा अतिकोपेन। परुषाः निष्ठुराः। दृशः कटाक्षाः। जयन्ति सर्वोत्कर्षेण वर्तन्ते। कश्चिन्नायकः सखायं ब्रूते—तस्या नायिकाया मुखकमलगन्धमाघ्राय समन्ततो भ्रमरा निपेतुस्तथाहं च तस्मिन्नेव काले तदधरपानं प्रार्थितवान्। एतदवस्थायां महानभूत्तस्याः रोषः, प्रक्षिप्तवान्सौ मां प्रति निष्ठुरकटाक्षान्—किन्तु सा तद्दशा तल्लोभात् नितरामवर्धयदितिभावः। आर्यावृत्तम् ॥ १०२ ॥

॥ इति चक्रटीकायां शृङ्गारविलासः ॥

॥ श्रीः ॥

श्रीपण्डितराजराजतिलकजगन्नाथप्रणीते

भामिनीविलासे

३ करुणविलासः ॥

दैवे पराग्वदनशालिनि हन्त जाते
याते च संप्रति दिवं प्रति बन्धुरत्ने ।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवार्तिम् ॥ १ ॥

दैव इति ॥ प्रमीता स्वप्रियामुद्दिश्य कस्यचिच्छोकोक्तिरस्मिन्विलासे ग्रथिता । हन्त इति खेदे । दैवे विधौ । पराग्वदनशालिनि पराग्वदन वैमुख्य तेन शालते शोभते इति तस्मिन्, पराङ्मुखे इत्यर्थः । जाते सति । संप्रति इदानीम् । बन्धुरत्ने बन्धुरत्न प्रिया सा एव रत्न तस्मिन् । च । दिवं स्वर्गं याते गते सति । हे मन कस्मै निजां अवस्थां शोचनीया दशाम् । कथयितासि वर्णयितासि । कः च जन । शीतलैः वचनैः तव आर्तिं मनोव्यथाम् । शमयिता शमयिष्यति । भाग्यस्य प्रातिकूल्यात्, प्रियाया मरणाच्च न कोऽप्यवशिष्टो यस्मै तु स्ववृत्तान्तो निवेदेत यश्च शीतवचनैर्मम शोकाग्निं निर्वापयेदिति भाव । विलासेऽस्मिन् विहायाष्टादश श्लोकं सर्वत्र वसन्ततिलकावृत्तम् ॥ १ ॥

प्रत्युद्गता सविनयं सहसा पुरेव[1]
स्मेरैः स्मरस्य सचिवैः सरसावलोकैः ।
मामद्य मञ्जुरचनैर्वचनैश्च बाले
हा लेशतोऽपि न कथं शिशिरीकरोषि[2] ॥ २ ॥

१. र०—सखीभि । २. र०—वद मुत्करोषि ।

प्रत्युद्गतेति ॥ हे बाले मुग्धे । पुरा इव पूर्वं इव । सहसा अकस्मात् । सविनयं नम्रतया सहितं यथा स्यात्तथा । प्रत्युद्गता अभिमुखं आगता ।

स्मरस्य कामस्य । सचिवैः सहायैः । कामोद्दीपनसमर्थैरिति यावत् । ईषदीषदर्थयुक्तैः । सरसावलोकैः सरसं प्रेमयुक्तं अवलोकं वीक्षणं । मञ्जुरचनैः मञ्जु मधुरा रचना पदविन्यासः येषां तैः । वचनैः आलापैः । लेशतः अपि ईषद् अपि । मां अद्य कथं न शिशिरीकरोषि शीतलयसि । हे मुग्धे यथा त्वं पूर्वं सहसैव मत्समुखमागत्य मधुरनिरीक्षणैर्मधुरालापैश्च मामरञ्जयस्तथाद्य मनागपि कथं न करोषीति भावः । अत्र नायकस्य नायिकायां या रतिः सा तस्या निधनेन प्रवृद्धस्य नायकशोकस्याङ्गमिति रसगङ्गाधरे (पृ० ४८) स्फुटीकृतम् ॥ २ ॥

सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्यापि खेदकलिता[1] विमुखीबभूव ।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव ॥ ३ ॥

१. नि०, बा०—खेदगलिता ।

सर्वेऽपीति ॥ सर्वे अपि विषयाः सक्तचन्दनवनितादयः इन्द्रियार्थाः । विस्मृतिपथं विस्मृतेः विस्मरणस्य पन्थानं मार्गं । प्रयाताः गताः । खेदकलिता खेदेन परिश्रमेण कलिता ग्रासा । विद्या अपि विमुखीबभूव पराङ्मुखा संजाता । केवलं सा । हरिणशावकलोचना हरिणशिशोः लोचने इव लोचने यस्याः सा । अधिदेवता अधिष्ठात्री देवी । इव । मे हृदयात् चित्तात् । न एव अपयाति गच्छति । सर्वेऽपि विषया विस्मृताः, कष्टेनाधिगता विद्यापि विस्मृता, केवलं सा मृगनयना न विस्मृतिपथं गच्छतीति भावः । पद्यमेतद्रसगङ्गाधरे भावध्वनौ (पृ. १०२) उदाहृतम् । उक्तं च तत्र पण्डितराजेन "गुरुकुले विद्याभ्यासकाले तदीयकन्यालावण्यगृहीतमानसस्यान्यस्य वा कस्यचिदतिप्रतिबिम्बगामिनां स्मरतो देशान्तरं गतस्येयमुक्तिः । अत्र च स्वात्मत्यागात्यागाभ्यां सक्तचन्दनादिषु विषयेषु चिरसेवितायां विद्यायां च कृतघ्नत्वम्, अस्या च लोकोत्तरत्वमभिव्यञ्जयन्ती व्यतिरेकवपुः स्मृतिमेव पुष्णातीति सैव प्रधानम् । (अस्यार्थः—विषयैः परित्यक्तो नायकः, अतस्ते कृतघ्नाः । विद्यापि परित्यक्ता, अतः सापि कृतघ्नैव । किन्तु नायिकया न परित्यक्ता, अतस्तस्यामलौकिकत्वम् । एवं नायिकाया विद्याविषयेभ्यो

व्यतिरेक । स च नायकहृदयस्था नायिकाविषया स्मृतिं पोषयति) एव स्थायाभावगत सार्वदिकत्व व्यञ्जयन्नधिदेवतोपमापि । (अर्थात्—यथाधिदेवता सर्वदा वर्तमाना तथैवेयं नायिकेत्युपमाध्वनिरपि स्मृतिपोष करोति) । एषा चानुचितविषयकत्वादनुभवनिष्ठत्वाच्च भावाभास (अर्थात्—अनुचिताया नायिकाया स्मृतिस्तथा च सा केवलं नायकहृदये निवसति न तु नायिकाया अपि) । यदि पुनरिय परिणेतुरेवोक्तिस्तदा भावध्वनिरेव " इति ॥ ३ ॥

निर्वाणमङ्गलपदं त्वरया विशन्त्या[1]
मुक्ता दयावति दयापि किल त्वयासौ ।
यन्मा न भामिनि निभालयसि प्रभात-
नीलारविन्दमदभङ्गिमदै[2] कटाक्षै· ॥ ४ ॥

१. नि०—व्रजन्त्या । २. नि०—"मदभङ्गकरै ।

निर्वाणेति ॥ हे दयावति दयाशीले । त्वरया शीघ्रम् । निर्वाणमङ्गलपदं निर्वाण मोक्ष· एव मङ्गलस्य श्रेयस· पद स्थानम् । विशन्त्या गच्छन्त्या । त्वया असौ मया अनुभूतपूर्वा । दया करुणा । अपि मुक्ता किल । यत् यस्मात् । हे भामिनि । प्रभातनीलारविन्दमदभङ्गिमदै· प्रभाते प्रात·काले यानि नीलारविन्दानि इन्दीवराणि । एतेन तेषा विकासोन्मुखत्व तात्कालिक-पवनचापल्य च सूचितमित्यच्युतराय । तेषां यो मद· सौन्दर्याभिमान· तस्य भङ्गि भञ्जक· मद· येषा तै । कटाक्षै मा न । निभालयसि पश्यसि । सखीभूतां भार्यां प्रति नायकस्योक्तिरियम्—हे प्रिये यत्त्व नीलारविन्दादप्यति-सुन्दरैः कटाक्षैर्मां न पश्यसि तस्मात् प्रतीयते यद्दृतरूप मोक्ष सम्प्राप्य मयि कृपापि त्यक्ता । न केवलमह त्यक्ता किन्तु मयि दयापि त्यक्तेति भाव· ॥ ४ ॥

भूत्वा पदस्खलनभीतिवशात्करं मे
यारूढवत्यसि शिलाशकलं विवाहे ।
सा मां विहाय कथमद्य विलासिनि या—
मारोहसीति हृदयं शतधा प्रयाति ॥ ५ ॥

भूत्वेति । ' आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । अभ्यमीहि दुरस्यून् सहस्व पृतनायतः ॥ ' इति मन्त्रेण विवाहकाले वधूर्वरहस्तमवलम्ब्य पाषाण-खण्डमारोहति । एतदेव मनसि कृत्वा कविना पद्यमिद रचितम् । हे विला-

सिनि विभ्रमवति । या त्वं विवाहे । पदस्खलनभीतिवशात् पदस्खलनात् चरणच्युतेः भीतिः भयं तद्वशात् । मे करं धृत्वा अवलम्ब्य । शिलाशकलं गौरीप्रतिष्ठाख्यं पाषाणखण्डम् । आरूढवती असि । सा त्वं अद्य मां विहाय त्यक्त्वा । कथं द्यां स्वर्गम् । आरोहसि इति मे हृदयं शतधा प्रयाति विदीर्यते । हे प्रिये विवाहकाले पाषाणखण्डारोहणसमये पतनभयात्त्वं मम हस्तावलम्बनमकरोः, कथमद्य स्वर्गारोहणसमये पुनस्त्वं मम हस्तावलम्बनं परित्यक्तवतीति हृदयं विदीर्यत इति भावः ॥ ५ ॥

निर्दूषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकविता मनोऽभिरामा
रामा कदापि हृदयान्मम नापयाति ॥ ६ ॥

निर्दूषणेति ॥ अस्मिन्पक्षे प्रिया कवितारूपमीयते । विशेषणानि च श्लिष्टानि । निर्दूषणा दुःशीलत्वादिदोषरहिता । कवितापक्षे—श्रुतिकटुत्वादिदोषशून्या । गुणवती दयादाक्षिण्यादिगुणयुक्ता । कवितापक्षे-माधुर्यादिगुणयुक्ता । रसभावपूर्णा रसेन प्रीत्या भावैर्विलासादिभिः च पूर्णा । कवितापक्षे—रसैः शृङ्गारादिभिः भावैः चिन्तानिर्वेदादिभिः व्यभिचारिभावैः पूर्णा । सालंकृतिः कटककेयूरादिभिः अलंकारैः युक्ता । कवितापक्षे—उपमादिभिः अलंकारैः युक्ता । श्रवणकोमलवर्णराजिः श्रवणयोः कर्णयोः कोमला मधुरः —श्रुतिमनोहरेत्यर्थः । वर्णराजिः शब्दपङ्क्तिः यस्याः सा । कवितापक्षे—श्रवणकोमला काव्यनिष्पादकानां वर्णानां पङ्क्तिः यस्याः सा । मनोऽभिरामा मनोहरा । सा मे । रामा प्रिया । मामकीनकविता मत्कविता । इव । मम हृदयात् कदा अपि न अपयाति निर्गच्छति । उपमालङ्कारोऽर्थश्लेषश्च । अत्र मम्मटाचार्यविरचितं काव्यलक्षणमनुसन्धेयम् । तथा—"तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति ॥ ६ ॥

चिन्ता शशाम सकलापि सरोरुहाणा—
मिन्दोश्च बिम्बमसमं सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधि त्वमितो गतासि ॥ ७ ॥

चिन्तेति ॥ हे प्राणप्रिये । यद्दवधि यत आरभ्य । त्वं इतः अस्मात् लोकात् स्वर्गलोकं गता असि । तद्दवधि । सरोरुहाणां कमलानाम् । सकला अपि । चिन्ता पराभवभीति । शशाम शान्ता । इन्दोः चन्द्रस्य । च । बिम्बं मण्डलम् । असमा अतुलाम् । सुषमां शोभाम् । अयासीत् । कोकिलानां च कलकल रव । किल । अभ्युद्गत उत्थित. । हे प्राणप्रिये यावदासीत्त्व जीविता तावत्त्वन्मुखसौन्दर्यनिर्जितानि कमलानि चिन्ताकुलान्यासन्, चन्द्रबिम्बमपि सद्वितीयमासीत्, त्वत्कण्ठमाधुर्यनिर्जिताश्च कोकिला मूका अभूवन् । इदानीं त्वयि गतायामभाव—कमलाना चिन्ताऽभाव गता, चन्द्रस्य बिम्बमनुपमसौन्दर्यं जात, कोकिलानां च मूकत्वमप्यभाव प्रापेति भाव. । काव्यलिङ्गध्वनि ॥ ७ ॥

सौदामिनीविलसितप्रतिभानकाण्डे
दत्वा कियन्त्यपि दिनानि महेन्द्रभोगान् ।
मन्त्रोज्झितस्य नृपतेरिव राज्यलक्ष्मी—
भाग्यच्युतस्य करतो मम निर्गतासि ॥ ८ ॥

सौदामिनीति ॥ हे प्रिये । सौदामिनीविलसितप्रतिभान् सौदामिनी विद्युत् तस्या विलसितानि स्फुरणानि तत्प्रतिभान् तत्सदृशान् । अति क्षणिकानित्यर्थ । महेन्द्रभोगान महेन्द्रयोग्यान् भोगान् सुखानीति यावत् । कियन्ति अपि स्वल्पानि एव । दिनानि दत्वा समर्प्य । मन्त्रोज्झितस्य मन्त्रेण सन्धिविग्रहादिकेन उज्झितस्य त्यक्तस्य । नृपते राज्ञः । करतः हस्तात् । राज्यलक्ष्मी राज्यसम्पत् । इव । भाग्यच्युतस्य भाग्यहीनस्य । मम करतः हस्तात् । अकाण्डे सहसा निर्गता असि । सन्धिविग्रहादिमन्त्ररहितस्य राज्ञो हस्ताद्यथा विद्युदिव चपला लक्ष्मीरपयाति, तथा महेन्द्रसदृशभोगानल्पकाल दत्वा भाग्यहीनस्य मम हस्तात्त्व अपासीति भाव । उपमालङ्कार ॥ ८ ॥

केनापि मे विलसितेन समुद्गतस्य
कोपस्य किं नु करभोरु वशंवदाभूः ।
यन्मा विहाय सहसैव पतिव्रतापि
यातासि मुक्तिरमणीसदनं विदूरम् ॥ ९ ॥

केनापीति । हे करभोरु 'मणिबन्धादाकनिष्ठं करस्य करभः बाहुः' इत्यमरः । करभः इस्तबहिर्भागः इव ऊरू यस्याः सा, तत्सम्बुद्धौ । केन अपि अनुचितेन । मे । विलसितेन चेष्टितेन । समुद्भूतस्य उत्पन्नस्य । कोपस्य । वशंवदा अधीना । अभूः जाता असि । किं नु । कुतो ज्ञातमित्याकांक्षायामुच्यते यत् यस्मात् । पतिव्रता अपि । अत्रापिशब्देन पतित्यागोऽसीवानुचित इति सूचितम् । मां विहाय । विदूरं अतिदूरस्थम् । मुक्तिरमणीसदनं मुक्तिः एव रमणी स्त्री तस्याः सदनं गृहम् । मोक्षपदमित्यर्थः । सहसा एव । यातासि गता । असि । सर्वदा पत्यनुगामिनी सत्यपि मां परित्यज्य यत्र मोक्षपदं प्रविष्टासि तद् ध्रुवं केनापि ममानुचितेन व्यवहारेण कुपितासीति तर्कयामीति भावः ॥ ९ ॥

काव्यात्मना मनसि पर्यणमन्पुरा[1] मे
पीयूषसारसरसास्तव ये विलासाः ।
तानन्तरेण रमणी रमणीयशीले
चेतोहरा सुकविता भविता कथं नः ॥ १० ॥

१. नि०—पर्यगमन्पुरा ।

काव्येति ॥ हे प्रिये । पीयूषसारसरसाः पीयूषः अमृतं तस्य सारः तत्त्वं तद्वत् सरसाः रसपूर्णाः । तव ये । विलासाः विभ्रमाः । मे मनसि पुरा पूर्वम् । काव्यात्मना कवितारूपेण । पर्यणमन् परिणताः अभूवन् । हे रमणीयशीले रमणीयं सुन्दरं शीलं चरितं यस्याः, तत्सम्बुद्धौ । तान् विलासान् । अन्तरेण विना । नः अस्माकम् । सुकविता शोभनकाव्यरचना । कथं केन प्रकारेण । रमणी सुन्दरा । चेतोहरा मनोहरा च । भविता । हे प्रिये त्वयि जीवन्त्यां पीयूषसारपरिपूर्णास्ते विभ्रमाः काव्यरूपतां प्रापुः, अधुना त्वयि दिवं गतायां तेषां विलासानामभावात् सुन्दरकवितारचने कथं समर्थो भविष्यामीति भावः । अत्र रमणीतिपदस्य द्विरावृत्तेर्यमकालङ्कारः ॥ १० ॥

या तावकीनमधुरस्मितकान्तिकान्ते[1]
भूमण्डले विफलतां कविषु व्यतानीत् ।

१. नि०—कान्तिकान्ता ।

सा कातराक्षि विलय त्वयि यातवत्या
राकाधुना वहति वैभवमिन्दिरायाः ॥ ११ ॥

यातिः हे कातराक्षि कातरे भीते तरले इत्यर्थः, अक्षिणी यस्या सा तत्सम्बुद्धौ । या राका पूर्णिमा । तावकीनमधुरस्मितकान्तिकान्ते तावकीनं त्वदीयं यत् मधुरं स्मितं मनोहरं हसितं तस्य कान्तिः शोभा तया कान्ते रमणीये । भूमण्डले पृथ्वीमण्डले, जाते सति इति शेषः । कवीषु शुभवस्तुवर्णनपरेषु कविषु । विफलतां निष्फलताम् । व्यतानीत् अकरोत् । सा राका । त्वयि विलयं मृत्युम् । गतायां प्राप्तायाम् । अधुना इन्दिरायाः लक्ष्म्याः । वैभवं सौन्दर्यम् । वहति धारयति । हे प्रिये त्वयि जीवन्त्या तव मधुरस्मितेन सिते च भूमण्डले, शुभवस्तुवर्णनप्रसङ्गे कवयः पूर्णिमां निष्प्रयोजनामसमर्थन्त । अधुना त्वत्प्रभावे, सा पूर्णिमा निष्फलत्वादतितरां शोभत इति भावः ॥ ११ ॥

मन्दस्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे ।
सा नित्यमङ्गलमयी गृहदेवता मे
कामेश्वरी हृदयतो दयिता न याति ॥ १२ ॥

मन्देति ॥ या मे प्रिया । मन्दस्मितेन तद्रूपया सुधया अमृतेन । मां परिषिच्य स्नपयित्वा । विकसितैः फुल्लैः । नेत्रोत्पलैः नेत्राणि कटाक्षा एव उत्पलानि कमलानि तैः । अनिशं सर्वदा । समीजे पूजितवती । सा नित्यमङ्गलमयी सततमङ्गलरूपा । गृहदेवता गृहाधिष्ठात्री देवता । कामेश्वरी कामानां ईश्वरी पूरणे समर्था । दयिता प्रिया । मे हृदयतः न याति सर्वदा स्मर्यते इत्यर्थः । यथा कश्चित्स्नपयित्वा पुष्पैरर्चयति तथा मद्प्रिया मन्दस्मितरूपेणामृतेन मां स्नपयित्वा कटाक्षरूपैरुत्पलैर्मां पूजितवती । एतादृशी नित्यकल्याणरूपिणी गृहाधिष्ठात्री कामपूरणे समर्था च मद्प्रिया मे हृदयाच्च दूरीभवति कर्हिचित्—इति भावः ॥ १२ ॥

भूमौ स्थिता रमण नाथ मनोहरेति
सम्बोधनैर्यमधिरोपितवत्यसि धाम् ।
स्वर्गं गता कथमिव क्षिपसि स्वमेव—
शावाक्षि तं धरणिधूलिषु मानिदानीम् ॥ १३ ॥

54. An illustration of वैदर्भी style which is very difficult. Cf. अस्यास्य रीतेर्निर्माणे कविना नितरामवहितेन भाव्यम्। अन्यथा तु वरिवाकगङ्गा स्यात्। (R. G.). Acyutarāya reads तनु ज्ञाम्यति and explains it as अतिक्रमत्यमेतीति योजना।

55. The variant विन्यस्तवक्त्रामुखं should be taken as an adverb.

57. The reading in बा० edn. is पाटीरास्तु भुजङ्गपुङ्गवमुखायाता इवातापिन, where the commentary runs—पाटीराश्चन्दनद्रुमा भुजङ्गपुङ्गवाना मुखेभ्य आयाता निःश्वासरूपा इव न तु चन्दना शीतला सर्पफूत्कारेभ्यो मिश्रिता सन्ते (सन्त) सन्तापवहा इति भाव। आतापिन चिह्ना पक्षिणो यथा वाता वान्ति चक्रवाता वात्याकलवत्। Here आतापिन. is explained as kites and later on as Cakravāka birds!!

59. Acyutarāya takes this verse and the next together. He reads प्रणयिनी in place of प्रणयिनि and discusses the reading as follows—'प्रणयिनि' इति सप्तम्यन्तपाठे पञ्चम्यन्तरसपदेन सम्बन्धे कान्तविषयकानुरागवशादित्यर्थसंभवेऽपि कर्त्या नायिकाया अध्याहारापत्ति। एवं 'प्रणयनिह्नुवाना' इति समस्तपाठेऽपि प्रणयेन प्रेम्णा निह्नुवानेति व्युत्पत्तिसंभवेऽपि रसादित्यत्र पौनरुक्त्यापहत्यै संभोगशृङ्गाररसाद्धेतोरित्यर्थकरणेऽपि च तदापत्तिर्दुर्वारेति बोध्यम्। एवं चोक्तपाठ एव श्रेयान्। तथा च प्रणयिनीत्यादेवोक्तनिमित्तत्वे प्रवृत्तिरिति तत्त्वम्।

60. The reading संघाते is preferable as it produces alliteration with यातं नयनयुगमिन्दीवरदृशः is better than नयनमिह स्मरकुवलयदृशः ।

61. Śeṣādri reads कपोलावुन्मीलन्नवपुलकपाली and explains उन्मीलंतो विकसंतो नवपुलका नूतनरोमांचा ययोस्तथाविधे पाली कर्णप्रदेशौ । 'पालिः कर्णलताया स्यात्प्रदेशे पंक्तिनिद्रयोः' रिभ्यनघः । ययोस्तथाविधौ कपोलौ ।

62. वा० edn has, as usual, a peculiar explanation to offer for जैवातृक—Cf.—हे जैवातृक हे वृद्ध । जैवातृकः स्यादायुष्मान् नित्यमरः ।

63. Acyutarāya reads मधुस्यन्दिनी and explains—मधुवन्मधुवत्स्यन्दयति व्यामोहनेन धैर्याद्यतिशालयतीति तथा । स्वदर्शनमात्रेणैवोन्मादयित्रीत्यर्थः ।

64. The गोपाङ्गना tries to hide her स्वेद and पुलक (indications of सात्त्विकभाव) created by श्रीकृष्णमाहात्म्यश्रवण by means of describing श्रीकृष्ण's ताण्डव on कालिय and thus representing that स्वेद and पुलक are due to wonder and not love. The reading गुरुषु is better than बहुषु, for it is proper to hide her feelings before the elders.

65. The reading सर्वदा for तात्त्विक is not happy, for the force of these changes taking place at the advent of youth is lost if सर्वदा is adopted.

66. Acyutarāya would read मधुरवीक्षणेनैव in place of °वीक्षणैरेव. His reasons are—परमासमर्थव्यञ्जकत्वादेकवचनान्तपाठ एवेह । यदि तु प्रेयोदर्शनोत्तरं प्रतीक्षणोज्जीवनाधिक्येन तद्वदनसौन्दर्यदिदृक्षाधिक्येन च वीक्षणे पानकन्यायेन विरम्य विरम्यास्वादनीयनायकलावण्यलालस्येन भूयस्त्वमपि गुणत्वेनैव संभाव्यते तदा भवतु नाम बहुवचनान्त एव पाठः 'वीक्षणैरिति' ।

71. A fine example of the figure स्मरण. Here the नायक is reminded of eyes by seeing the lotuses which are similar to eyes—'सादृश्यज्ञानोद्बुद्धसंस्कारप्रयोज्यं स्मरणं स्मरणालङ्कारः ॥' (R. G.)

72 At the rise of clouds, the मान disappears immediately. For the effect of clouds on lovers, Cf मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः। Megha I, 3. The verse is given as an example of भावशान्ति in R. G.

73. Here one and the same face is mistaken for a lotus by the bees and for the moon by the *Cakoras*, it is an illustration of उल्लेख mixed with भ्रान्तिमत्. Had the bees and *Cakoras* mistaken *two* things for a lotus and the moon, then the figure would have been a pure भ्रान्तिमत्.

75. A separated lover feels greater pangs at night during moon-light. To him the moon gives no peace or tranquility, but increases his agony. So, the bereaved lover says—which fool calls this a moon? When he is pointed out the dark spot—कलङ्क, he says that it is no कलङ्क, but the dark sky visible through a hole created in the orb of the sun by those Ksattriya warriors who have faced death on a battlefield. In support of his conjecture, the lover gives his own experience that this Sun's burning rays are devouring the earth. "A reference to this circumstance occurs also in the following stanza of P. R. VII रवे मुक्तप्राणा रजनिचरवीरा दिनमणिं विशन्तः शोभन्ते कमलमिव साग्रं मधुलिहः। अयार्मेभिर्भिन्नं गगनवकुलोदरदरीमयच्छत्रच्छायामनुभवति बिम्बं दिवकृतः॥" (Parānjape)

76. स्वरूप-True nature. Poison is black and nectar is white.

77. Here सन्देह is mixed with यथासंख्य.

78. The reading given in बा० edn अपि बालकवेषचारिणी मकरन्दस्पृहयालिचोलयः and its explanation are both absurd. The Commentary is—अपि च पुनः अलकानां वेषस्य चारिणी नायका (पिका) तस्या स्पृहया अलिचोलयः भ्रमरपङ्क्तयः विलसन्ति इत्यत्रापि योज्यम्।

80. A fine example of अपह्नुति—The beauty of Cupid's arrows (i. e. flowers) is stolen by the heroine and punishment for the theft is given to the lover.

82 भवनाकाशमजायताम्बुराशि—Constant flow of tears filled the space inside the house; so it looked like a sea. Sea-water and tears are both saltish.

83 Acyutarāya interprets the verse differently—The heroine sees the lover coming towards her apartment and herself dismisses her friends by gestures in the shape of covering herself and feigning to go to sleep. He adds एतेन चातुर्यातिशय सूचित ।

84 An example of सहोक्ति where the गुणs like मान्धर्य, रक्तत्व, etc. are the समानधर्मs. Jagannātha remarks—अत्र यद्यपि क्रियापि गुणेन सह समानधर्मतामनुभवति तथापि तस्या नान्तरीयकत्वेन (तां विना दाक्षार्गासमासेरिति भाव) असुन्दरत्वाद्गुणस्यैव पर्यवसाने समग्र-भरसहिष्णुत्वम् । शोणत्वासक्तत्वाभ्यामधिकभारत्वोपदेशकर्तृत्वाभ्यां च मित्र-योरन्युपमेयोपमानगतयोर्निरुक्तगुणयो: श्लेषेण पिण्डीकरणात्सहभावोपपत्ति: ।

85. This illustrates आक्षेप. Paranjape and Śeṣādri construe तिष्ठतु, etc. as uttered by the person (नायक) who was listening to the above account being rather afraid to hear any worse news.

86. Paranjape, Vaidya and Seṣadri read हिमाम्बु-झंझानिलविह्वलस्य. This reading is not preferable as झंझानिल is strong wind and the shaking of lotus by such wind must naturally be violent. But the shaking of Rāma's hand (which is उपमेय here) could not be so violent. The reading "मरुतानिल" adopted by Acyutarāya is also good.

88. Vaidya and Śeṣādri read नयनानि बहन्तु लज्जनाना-मिह नानाविधमंग भंगमाश्चर्यम् अंग is taken separately and explained as अंगेत्यन्यथं लक्ष्यं । What are the अवयवतरङ्गs of लज्जनs? Can they mean the flashes of glances?

89 Jagannātharemarks—अत्र गुणरूपविशेषाधानम् । रुचेर्गुण-त्वात् । न च विधानरूपक्रियात्मकविशेषाधानमिह शङ्क्यम् । भावनासामान्य-

रूपस्य विधानस्याचमत्कारित्वेनाविशेषत्वात्। The next verse illustrates क्रियारूपविशेषाधान.

91. Jagannātha remarks—अत्र पूर्वपूर्वावस्थाविशिष्टान्या कुचान्यामुत्तरोत्तरावस्थाविशिष्टयोस्तयोरेवोत्कर्ष इत्येकविषयत्वम्। यद्यपि परिमाणभेदेन द्रव्यभेदोऽपि मतविशेषे शक्यते वक्तुम्, तथापि कुचत्वेनाभेदाश्रयणेन तत्रापि एकविषयत्वं सुपपादम्। यदि च वक्ष्यमाणं एकाश्रये क्रमेणानेकावस्थितिरूप पर्यायोऽत्र प्रतीयते तदा सोऽप्यस्तु। न हि तेन पूर्वपूर्वापेक्षयोत्तरोत्तरोत्कर्षरूपः सारोऽन्यथासिद्ध. शक्य कर्तुम्।

92. In the first half we have an exchange of equal things. But in the second half, it is unequal.

93. The reading जितमौक्तिकसम्पदो is superior to जितरत्नरुचो सदा of Acyutarāya. For, the pearl of the nose can have an enmity with the teeth when they surpass pearls (and not any रत्न) in point of beauty. Unable to injure the teeth, the nose-pearl tries to humiliate the nose which is connected with the teeth. Again, अधरीकुरुते शुभाङ्गि has the disadvantage of not mentioning the cause of अधरीकरण

95. Cf. निरङ्कुशा कवय।

96. कांदिशीक—Being at a loss what to do through fear.

99. Seṣādri remarks—A तांबूल when eaten gives out fragrance and makes the lower lip red, but these qualities, the lover says, are to be naturally found in his beloved

102. Acyutarāya reads इन्दीवरेषु in place of इन्दिन्दिरेषु and explains इन्दीवरेषु as equivalent of भ्रमरेषु. He quotes the following authority from त्रिकाण्डशेष in suppart of his meaning. भ्रमरश्चञ्चरीक स्याद्दोलम्बो मधुसूदन। इन्दीवरः पुष्पकीटो भ्रमरो मधुकेशटः॥

III. KARUṆAVILĀSA

1. Paranjape and Śeṣādri are of opinion that the entire करुणविलास is the outcome of the poet's great grief for the loss of his wife, and hence this chapter is based on his personal experience. This view, however, cannot be regarded as correct. For, if we assume that every beautiful description of a situation or of a sentiment always indicates the personal experience of a poet, then we shall have to admit many impossible things. For instance, कालिदास's graphic description of दुष्यन्त's descent from heaven (शैलानामवरोहतीव शिखरादुन्मज्जतो मेदिनी, etc.) would lead us to infer that कालिदास must have flown in an aeroplane. See also the Introduction, p. V.

2. R. G. reads सहसा सखीभिः in place of सहसा पुरेव. In that case we shall have to construe सखीभिः (सह) सहसा प्रत्युद्गता. The reading यद् सत्करोषि of R. G., however, is not so good as शिशिरीकरोषि. On this verse Jagannātha remarks—इयं च पुरोनिपतितां प्रमीतां नायिकां प्रति नायकस्योक्तिः। इह नायिकालम्बना अश्रुपातादिभिरनुभावैरावेगविषा[दा]दिभिः संचारिभिश्च व्यज्यमाना नायकगता रतिस्तुल्यसामग्र्यभिधके प्रकृतत्वात्प्रधानीभूते तद्गत एव शोके प्रकर्षकत्वाद्गम्। यदि तु नायकगता रतिर्नात्र प्रतीयते, किंतु निरुक्तसामग्र्या शोक एव प्रकृतत्वादिलागृह्यते तदा नायकालम्बना प्रत्युद्गमाद्यनुभाविता हर्षादिभिः पोषिता नायिकाश्रया रतिरेव तत्राङ्गमस्तु। नायिकागतरतेर्नायकशोकप्रकर्षहेतुताया सर्वसंमतत्वात्। न च नायिकाया नायकतद्गताया रतेरसंनिधानात्कथमङ्गतेति वाच्यम्। संनिधानस्याङ्गतायामतन्त्रत्वेन स्वर्गमाणायास्तस्या अङ्गत्वोपपत्तेः।

3. The reading खेदगलिता is unjustifiable and appears to be a misprint for खेदकलिता. Vaidya and Paranjape explain खेदकलिता as खेदव्याप्ता, which is absurd. It should be taken to mean as खेदेन अधिगता—acquired after great pains.

4 त्वरया—hastily The husband says that she should not have made haste, she ought to have waited for him.

5 The verse refers to the practice of the bride ascending a piece of stone at the time of marriage See the commentary Paranjape very aptly points out that the contrast lies in the fact that at the time of marriage she could not ascend even a small piece of stone without holding his hand, while she can now ascend so high a place as the heaven without his help

6. The self-confidence of the poet in his powers is admirable

7 For a similar idea, see below verse 11 and compare R V, VIII, 59–60.

8 The भोगs are aptly called सौदामिनीविलसितप्रतिमान्-transitory like the flashes of lightning Cf प्रायेण वाधव-सुहृत्प्रियसंगमादि सौदामिनीस्फुरणचञ्चलमेव सौख्यम्। Mālatīmādhava, VIII, 14. Paranjape rightly points out the fault of दूरान्वय in construing अकाण्डे with निर्गतासि

9. See the propriety of मुक्तिरमणीसदनम्. A पतिव्रता could go to the house of a *female* friend करभ = 'मणि-बंधादाकनिष्ठं करस्य करभो बहिः"। अमरकोश।

10 Acyutarāya reads रमणीरमणीयशीले and explains the compound as रमणीनां सुन्दरीणां मध्ये रमणीयं पातिव्रत्यादिगुणैर्लोकोत्तरं शीलं चारु चरितं यस्या सा तथा। But this sort of compound is objected to by 'न निर्धारणे' Pāṇ. II 2 10 Paranjape remarks–But though it is not quite correct, and the addition of the word रमणी does not lead to the addition of any special sense, still the formation of the compound removes the want of a च, that was required to connect चेतोहरा with रमणी, when the latter word did not form a member of the above compound Acyuta-

rāya reads पर्यंगमन् and criticises 'पर्यंगमन्' इति पाठे तु परिणामप्राप्ता इत्यर्थः । परिणामो हि तात्त्विकोऽन्यथाभावः । स तु प्रकृते वास्तविको नैव संभवति । etc. This is hypercriticism. What is meant by परिणाम here is 'becoming the subject-matter' or 'transformation,' which, of course, is metaphorical.

11. Acyutarāya reads तावकीनमधुरस्मितकान्तिकान्ता and construes it with राका. The idea is that as long as your smile was there so long the full-moon night was redundant. There is no idea of उत्कर्ष of स्मित over राका as rightly pointed out by Paranjape. Here इन्दिरा = लक्ष्मी stands for beauty in general.

12. मन्दस्मितेन सुधया. Here मन्दस्मित itself is सुधा. समीचे-सम्+चक्ष्-3rd person, singular, perfect, कामेश्वरी-Able to fulfil all desires like a goddess.

13. The contrast is remarkable. When you were on earth you raised me to heaven; when you are in the heaven you are throwing me down to earth.

14. You were the शरण-protector or main-stay of the qualities like लावण्य and myself. So your departure has left these qualities and myself both destitute.

15. The lady conquered the flames of fire by means of the golden hue of her body. The fire is enraged at that defeat and hence has reduced that body to ashes.

17. Here परमात्मन् is the supreme Soul or ब्रह्मन् who is निर्गुण. Paranjape is right in observing that there is a sort of अनौचित्य involved in the poet's attributing to his beloved (a पतिव्रता) a going to परमात्मन् even by way of श्लेष.

19. The poet indirectly praises his own poetry in this verse. The different readings given in the text do not materially change the sense.

॥ श्रीः ॥

श्रीपण्डितराजराजतिलकजगन्नाथप्रणीते

भामिनीविलासे शान्तविलासः ॥

४ शान्तविलासः ॥

विशालविषयाटवीवलय[1]लग्नदावानल-
प्रसृत्वरशिखावलीविकलितं[2] मदीयं मनः ।
अमन्दमिलदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम् ॥ १ ॥

[1]. नि॰ "मल्य" । [2]. प॰ D. "विगलित

विशालेति ॥ विशालविषयाटवीवलयलग्नदावानलप्रसृत्वरशिखावलीविकलितं विशाला दीर्घा या विषयाणां कामक्रोधादीनां अटवी अरण्यं तद्वलयं मण्डलं तस्मिन् लग्नः यः दावानलः वनवह्निस्तस्य प्रसृत्वराः प्रसर्पणशीलाः याः शिखाः ज्वालाः तासां अवलीभिः पंक्तिभिः विकलितं आकुलितं । मदीयं मनः । अमन्दमिलदिन्दिरे अमन्दं अत्यर्थं मिलन्ती संचरन्ती इन्दिरा शोभा यस्मिन् तस्मिन् । निखिलमाधुरीमन्दिरे निखिला समग्रा या माधुरी माधुर्यं तन्मन्दिरे निवासस्थाने । मुकुन्दमुखचन्दिरे मुकुन्दस्य श्रीकृष्णस्य मुखं एव चन्दिरः चन्द्रः तस्मिन् । चकोरायतां चकोर इव आचरतु । तस्मादुःखैरत्यर्थं संतापितं मम मनः अत्यन्तशोभने मधुरे च श्रीकृष्णचन्द्रमुखे तथा अनुरक्तं भवतु यथा चकोरश्चन्द्रे अनुरक्तो भवति—इति भावार्थः । अत्र विषयेष्वटवीत्वारोपणात् मुखे च चन्द्रस्य रूपकमलङ्कारः । तस्य चोपमया संसृष्टिः । पद्यमिदं करुणालहर्यां (५९) पठ्यते । पृथ्वी वृत्तम् । तल्लक्षणं च-' जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति ॥ १ ॥

अये जलधिनन्दिनीनयननीरजालम्बन
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरम् ।

प्रभातजलजोत्तमद्युतिमगर्वसर्वंकषै[1]–
जगत्त्रितयरोचनै[2] शिशिरयाशु मां लोचनैः ॥ २ ॥

[1] B प्रभातजलदोत्तम ... सर्वंकषे । [2] नि०–लोचनैः ।

अये इति ॥ अये इति कोमलामन्त्रणे। जलधिनन्दिनीनयननीरजालम्बन जलधेः क्षीरसमुद्रः नन्दिनी सुता तस्याः नयने एव नीरजे कमले तयोः आलम्बन आश्रयभूत भगवन् विष्णो। ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरं ज्वलन् दीप्यमान यो ज्वलनः अग्निः तस्य जित्वरः जेता यः ज्वरभरः विषयसंतापातिशयः तस्य त्वरया वेगेन भङ्गुरं भज्यमान। मां आशु शीघ्रम्। प्रभातजलजोत्तमद्युतिमगर्वसर्वंकषै प्रभाते यानि जलजानि कमलानि तेषां उत्तमन् उद्गच्छन् य द्युतिमा गौरव तस्य गर्वः अभिमानः अहमेव सर्वसुन्दर इति गर्वः तस्य सर्वंकषैः नाशकैः। जगत्त्रितयरोचनैः जगत्त्रयस्य भुवनत्रयस्य रोचनैः प्रीतिजनकैः। लोचनैः कटाक्षैः। शिशिरय शीतल कुरु। हे लक्ष्मी नयनालम्बन विष्णो प्राभातिककमलादप्यधिकसुन्दरैः भुवनत्रयप्रीतिजनकैः कटाक्षैः संसारानलसंतापित मां शीतलीकुर्विति भावार्थः। पृथ्वीवृत्तम् ॥ २ ॥

स्मृतापि तरुणातपं करुणया हरन्ती नृणा–
मभङ्गुरतनुत्विषां बलयिता शतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥ ३ ॥

[1] नि० नगनन्दिनी ।

स्मृतापीति ॥ का अपि अनिर्वचनीया। कादम्बिनी मेघमाला। अर्थात् भगवतः कृष्णस्य मूर्तिः, या मेघमालावत् श्यामा, किन्तु ततोऽप्यधिकगुणवती–अत्र श्रीकृष्णमूर्तिः कादम्बिनीत्वेनाध्यवसिता, निश्चिता, कविना। तस्याः मेघमालात आधिक्य व्यतिरेको वा विशेषणवाचकैः पदैर्वर्ण्यते। या स्मृता अपि। करुणया दयया। नृणाम्। तरुणातपं प्रचंडतापम्। हरन्ती निवारयन्ती। अस्तीति शेषः। मेघमाला हि स्पर्शेन वर्षणेन वा लोकानां ताप हरति, इयं भगवन्मूर्तिस्तु स्मरणमात्रेणेति व्यतिरेकः। पुनश्च–अभङ्गुरतनुत्विषां विद्युतां शतैः बलयिता—अभङ्गुराः अक्षणिकाः, चिरस्थायिन्य इत्यर्थः, याः तनुत्विषः शरीरकान्तयः तासां शतैः बलयिता

वेष्टिता । मेघमाला हि शक्तिकैः विद्युद्लासै वेष्टिता, भगवन्मूर्तिस्तु चिरस्थायिनीनां शरीरकान्तीनां विद्युद्भिः, तत्रैवाध्यवसिताभिर्गोपाङ्गनाभिर्युक्तेति व्यतिरेकः । कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी कलिन्दाख्यस्य गिरेः पर्वतस्य नन्दिनी कन्या, यमुनेत्यर्थः, तस्याः तटे ये सुरद्रुमाः कल्पवृक्षाः, कल्पवृक्षत्वेनाध्यवसिताः नीपवृक्षाः, यमुनातटे कल्पवृक्षाणामभावात्, तेषां आलम्बिनी तदाश्रितेत्यर्थः । मेघमाला हि आकाशाश्रिता, भगवन्मूर्तिस्तु नीपद्रुमाश्रितेति व्यतिरेकः । मदीयमतिचुम्बिनी मम हृदये विराजमाना । भवतु । अत्र श्रीकृष्णमूर्तेर्मेघमालात्वेनाध्यवसानादतिशयोक्तिरलङ्कारः, तस्याश्च मेघमालात आश्रिस्वदर्शनात् व्यतिरेकालङ्कारोऽपि । तयोरङ्गाङ्गिभावेन संकरः । व्यतिरेकलक्षणं च काव्यप्रकाशे—'उपमानादन्यस्य व्यतिरेकः स एव सः' इति । पृथ्वीवृत्तम् । पद्यमिदं रसगङ्गाधरे मंगलाचरणे पठ्यते ॥ ३ ॥

कालिन्दगिरि[1]नन्दिनीतटवनान्तरं भासयन्
सदा[2] पथि गतागतभ्रमभरं[3] हरन्प्राणिनाम् ।
लतावलिशतावृतो मधुरया रुचा संभृतो
ममाशु हरतु श्रमानतितमां[4] तमालद्रुमः ॥ ४ ॥

१. नि०— कालिन्दनग° २. प० H सुदा ३. प० D. गतागतौ. । हरन् °क्रमभरम् । ४. वे० °तराम्

कालिन्देति ॥ कालिन्दगिरिनन्दिनीतटवनान्तरं कालिन्दगिरिनन्दिनी कालिन्दी यमुनेत्यर्थः तस्याः तटे यत् वनं वृन्दावनादि, तस्य यत् अन्तरं मध्यं । भासयन् दीपयन् । सदा सर्वस्मिन् काले । पथि मार्गे, नानायोनिसंचरणरूपे संसारमार्गे । प्राणिनां जीवानां गतागतभ्रमभरं गतागतं एकशरीरत्यागपूर्वकमन्यशरीरप्रवेशः, तस्य भ्रमभरं क्लेशातिशयं । हरन् नाशयन् । लतावलिशतावृतः लतानां आवलिः पंक्तिः, पक्षे लतासदृशीनां गोपीनां पंक्तिः, तस्याः शतैः आवृतः परिवेष्टितः । तथा मधुरया मनोहारिण्या । रुचा कान्त्या । संभृतः युक्तः । तमालद्रुमः तमालवृक्षः, पक्षे तमालवृक्षवर्णः श्रीकृष्णः । मम श्रमान् खेदान् । आशु शीघ्रं । अतितमां अत्यर्थं, यथा न पुनस्तेषां खेदानामुद्भवः कदापि स्यात्तथा । हरतु अपनयतु । यमुनातटे वृन्दावने शोभमाना, प्राणिनां जन्ममरणकृतखेदहारिणी, गोपाङ्ग-

नाभि परिवेष्टिता, तमालवल्लीव भगवतः कृष्णस्य मूर्तिः मम खेदान् हरत्विति भावार्थः । अत्र भगवान् श्रीकृष्ण उपमेयः, तमालद्रुम उपमानम् । तमालद्रुमेण भगवतो निगरणाद् अतिशयोक्तिरलङ्कारः । अस्याश्च चतुर्थचरण-गताया अतिशयोक्तेः समर्थकानि चरणत्रयगतानि विशेषणानि । अतः सार-वयेयमतिशयोक्तिरुदाहृता रसगङ्गाधरे (पृ. ३०८)। पृथ्वी वृत्तम् ॥ ४ ॥

वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-
स्तां स्वप्नेऽपि न संस्मराम्यहमहंभावावृतो निस्त्रपः[२]।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत--
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तोऽपरः ॥ ५ ॥

१. र०—संस्पृशाम्य° वा०—संस्पृहाम्य° । २. प०—B—निस्पृह । ३. प० B. दयापर

वाचेति ॥ हे नाथ भगवन् । निर्मलया निर्दोषया । तथा सुधामधुरया सुधावत् अमृतवत् मधुरया । वाचा वेदरूपिण्या वाण्या । यां शिक्षां उपनिषत्सु प्रोक्तां । अदाः त्वं दत्तवानसि । तां शिक्षां । अहंभावावृतः अहंभावेन अहङ्कारेण आवृतः युक्तः । निस्त्रपः निर्लज्जः । अहम् । स्वप्ने निद्रायाम् । अपि न संस्मरामि । इति एवं गते सति । हे यदुपते श्रीकृष्ण । आगःशतशालिनं आगसां अपराधानां शतेन शालते शोभत इति—अपरा-धशतयुक्तम् । माम् । पुनरपि । स्वीयेषु स्वकीयेषु भक्तेष्वित्यर्थः । बिभ्रत् धार-यतः त्वत्तः । दयानिधिः कृपालुः । नास्ति—त्वदधिको नान्यः कश्चिद्दया-लुरित्यर्थः । मत्तः मदपेक्षया च । अपरः अन्यः । मत्तः उन्मत्तः । नास्तीति शेषः । हे भगवन् त्वया दत्ता आत्मकल्याणकारिणी शिक्षा अहङ्कारावृतेन मया न मनागपि स्मर्यते, किन्तु त्वं तथापि स्वभक्तेषु मम गणनां करोषि, अतः त्वदपेक्षया नान्यः कश्चिदधिको दयालुः मदपेक्षया च नान्यः कश्चिदधिक उन्मत्त इति भावार्थः । अत्र शिक्षादानेऽपि विस्मरणं मत्तत्वे हेतुः, तथा सापराधस्यापि भक्तेषु गणनं तस्य दयानिधित्वे हेतुः—अतः काव्यलिङ्ग-मलङ्कारः । पद्यमिदं रसगङ्गाधरे प्रसादगुणोदाहरणे (पृ० ६६) पठ्यते । तल्लक्षणं च तत्रैव (पृ० ५९) 'यावदर्थकपदत्वरूपमर्थवैमल्यं प्रसादः ।' शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

पाताले व्रज याहि वा सुरपुरीं[1] मारोह मेरोः शिर-
पारावारपरम्परां[2] तर तथाप्याशा न शान्ता[3] तव ।
आधिव्याधिजरापराहत यदि क्षेमं निजं वाञ्छसि
श्रीकृष्णेति रसायनं रसय रे शून्यैः किमन्यैः श्रमैः[4] ॥ ६ ॥

१. वा०—वासवपुरीं । २. नि०—परम्परा. ३. नि०—शान्ताः । ४. वा०—आधिव्याधिजरापराहतिगतिक्षेमं निजं वाञ्छति, श्रीकृष्णेति रसायन रसयेरे शून्यैः किमन्यैर्श्रमैः ॥

पातालमिति॥आशाग्रस्तं प्रत्युक्तिरियम्। पातालम्। व्रज गच्छ। सुरपुरीं देवनगरीं अमरावतीम्। वा याहि गच्छ। मेरोः सुवर्णपर्वतस्य। शिरः शिखरं। आरोह। पारावारपरम्परां पारावाराणां समुद्राणां परम्परां श्रेणीं। तर उल्लङ्घय। तथापि कृतेऽपि सर्वप्रकारोद्यमे। तव। आशा। न शान्ता समाप्तिं न गता। रे आधिव्याधिपराहत आधिभिः चिन्ताभिः व्याधिभिः रोगैः जरया वृद्धावस्थया पराहत अभिभूत जन्तो। यदि। निजं स्वकीयम्। क्षेमं कल्याणम्। वाञ्छसि इच्छसि। तर्हि। श्रीकृष्ण इति। रसायनं औषधम्। रसय आस्वादय। अन्यैः। शून्यैः निष्फलैः। श्रमैः खेदैः। किम्। भगवन्नामस्मरणेन नरस्य कल्याणाय कल्पते इति भावार्थः। अत्र श्रीकृष्णेति नाम्नो रसायनत्वेन रूपणात् रूपकमलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

मृद्वीका रसिता सिता समशिता[1] स्फीतं निपीतं पय-
स्स्वर्यातेन[2] सुधाऽप्यधायि[3] कतिधा[4] रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भाव्यतां
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिद्वाशितः ॥ ७ ॥

१. प०—B समस्त सरितः । २. वा०—टीका—स्वर्गतो न । ३. वा०—कदा । ४. प० B कदा सुधाधिकरसः ।

मृद्वीकेति ॥ हे मदीय जीव जीवात्मन्। त्वया। इहलोके इति शेषः। मृद्वीका द्राक्षा। रसिता आस्वादिता। सिता खण्डशर्करा, 'मिश्री' इति लोके प्रसिद्धा। समाशिता भक्षिता। स्फीतं निर्मलं। पयः जलं। निपीतम् तथा च। स्वः स्वर्गम्। यातेन गतेन। सुधा अमृतम्। अपि। अधायि

पीता। एवं च। कतिधा कतिवार अनेकवारमित्यर्थः। रम्याधरः रम्यायाः स्वर्वेश्यायाः अधरः अधरोष्ठः। खंडितः चुम्बनावसरे दन्तेन क्षतः। तथापि सत्यं ब्रूहि—एवं भूयः पुनः पुनः। भवे संसारे, कदाचिदिह लोके कदाचित्र स्वर्गे। भ्राम्यता भ्रमणं कुर्वता। भवता। 'कृष्ण' इति अक्षरयोः। अयं मधुरिमोद्गारः मधुरिम्णः माधुर्यस्य उद्गारः भरः। क्वचित् कुत्रचित्। लक्षितः दृष्टः। इहलोके परलोके वा यावन्ति मधुराणि वस्तूनि स्वादितानि सर्वेभ्योऽपि तेभ्यो भगवन्नामाक्षरयोर्माधुर्यं गरिष्ठमिति भावार्थः। अत्र भगवन्नामाक्षरमाहात्म्यात् अल्पज्ञोऽल्पशक्तिरपि जीवः, अनेकजन्मवृत्तांतप्रत्यक्षीकरणशक्तिमान् जायते। अतः अशक्तेऽपि जीवे शक्तिसम्बन्धस्थापनात् अतिशयोक्त्यलङ्कारस्य ध्वनिः। पद्यमिदं रसगंगाधरे (पृ० १३३) अतिशयोक्तिव्यञ्जनायुदाहृतम्। शार्दूलविक्रीडितं वृत्तम्॥ ७॥

वज्रं पापमहीभृतां[1] भवगदोद्रेकस्य[2] सिद्धौषधं
मिथ्याज्ञाननिशाविशालतमसस्तिग्मांशुबिम्बोदयः।
क्रूरक्लेशमहीरुहामुरुतर[3]ज्वालाजटालः शिखी
द्वारं निर्वृतिसद्मनो विजयते कृष्णेति वर्णद्वयम्॥ ८॥

[1] प० ब पापभृतां सतां। [2] बा०—भव०। [3] नि०—'मुहभर'

वज्रमिति॥ पापमहीभृतां पापानि एव महीभृतः पर्वताः, तेषां। वज्रं वज्रवत्प्रशस्तम्। भवगदोद्रेकस्य भव संसार एव गदः रोगः तस्य उद्रेकः आधिक्यं तस्य। सिद्धौषधं सिद्धं अमोघं, अनिष्फलमित्यर्थः, औषधं। मिथ्याज्ञाननिशाविशालतमसः मिथ्याज्ञानं अविद्या सैव निशा रात्रिः, तस्या विशालं महत्, तमः अन्धकारः तस्य। तिग्मांशुबिम्बोदयः तिग्माः तीक्ष्णाः अंशवः किरणाः यस्य स तिग्मांशुः सूर्यः, तस्य बिम्बं मण्डलं, तस्य उदयः। क्रूरक्लेशमहीरुहां क्रूराः दुःसहाः ये क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाख्याः त एव महीरुहाः वृक्षाः तेषाम्। उरुतरज्वालाजटालः उरुतराः दीर्घतराः ज्वालाः शिखाः ताभिः जटालः प्रचुर इति यावत्। शिखी अग्निः। तथा च निर्वृतिसद्मनः निर्वृतिः मोक्षः एव सद्म गृहं तस्य। द्वारम्। किं तत्?। 'कृष्ण' इति। वर्णद्वयं अक्षरयुगलम्। विजयते सर्वोत्कर्षेण वर्तते। यथा वज्रं पर्वतान् नाशयति, औषधं रोगान्

हन्ति, सूर्यः अन्धकारं अपहरति, वह्निश्च वृक्षान् भस्मसात्करोति तथैव भगवन्नाम पापानाम्, भवरोगस्य, मिथ्याज्ञानस्य, क्लेशानां च निवारकम्, पुनः च मोक्षस्य दायकमिति भावार्थः । पापादीनां महीभृदादिभिरभेदनिरूपणात् रूपकमलङ्कारः । पद्यमिदं पण्डितराजविरचितकर्णालहर्यां (५८) उपलभ्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

रे चेतः कथयामि ते हितमिदं वृन्दावने चारयन्
वृन्दं कोऽपि गवां नवाम्बुदनिभो बन्धुर्न कार्यस्त्वया ।
सौन्दर्यामृतमुद्भिरद्भिरभितः[1] संमोह्य मन्दस्मितै-
रेष त्वां तव वल्लभांश्च विषयानाशु क्षयं नेष्यति ॥ ९ ॥

[1]. प°–०. असितः । [2]. बा०–संयोज्य.

रे चेत इति ॥ रे चेतः हे मन । ते तुभ्यं । इदं वक्ष्यमाणम् । हितं हितकरं वाक्यम् । कथयामि । यत्– त्वया । वृन्दावने गवां वृन्दं समूहम् । चारयन् । नवाम्बुदनिभः नवः नूतनः अम्बुदः मेघः तत्सदृशः श्यामवर्ण इत्यर्थः । कोऽपि अर्थात् श्रीकृष्णः । बन्धुः सखा । न कार्यः । अत्र कारणमाह । एष श्रीकृष्णः । अभितः सर्वतः । सौन्दर्यामृतं सौन्दर्यस्य अमृतम् । उद्भिरद्भिः उद्गमद्भिः । मन्दस्मितैः मन्दहासैः । संमोह्य वशीकृत्य । त्वां तव वल्लभान् प्रियान् । विषयान् शब्दस्पर्शरूपादीन् । च । आशु शीघ्रम् । क्षयं नेष्यति नाशयिष्यति । हे चित्त त्वया वृन्दावनविहारिणः श्रीकृष्णस्य चरणयोः प्रीतिः कार्या–असौ लीलयैव अतिशयकार्यं त्वां शब्दादीन् विषयांश्च नाशयिष्यतीति भावार्थः विरोधिलक्षणया लभ्यते । अत्र आक्षेपालङ्कारः । तल्लक्षणं च काव्यप्रकाशे ' निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥ ' इति । अत्र हि ' रे चित्त त्वया भगवतो ध्यानं कार्यम् ' इति वक्तुमिष्टं तत्र निषिध्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

अध्यास्येयां वितरति परां प्रीतिमन्तर्निमग्ना[2]
कण्ठे लग्ना[2] हरति नितरां यान्तरध्वान्त[2]जालम् ।

तां द्राक्षाद्यै[1]रपि बहुमतां माधुरीमुद्गिरन्तीं
कृष्णेत्याख्या कथय रसने यद्यसि त्वं रसज्ञा ॥ १० ॥

[1] वा०—०मप्रां [2] वा०—लप्रां [3]. प०—D. [4]०ग्राधि० [5] नि०—द्राक्षीयै. । वा०—द्राक्षायैः

अव्याख्येयामिति ॥ हे रसने जिह्वे। यदि त्वं। रसज्ञा रसान् मधुरादीन् जानातीति रसज्ञा। सत्य असि। तर्हि— या आख्येति शेष। अन्तर्निमग्ना अन्तः हृदये निमग्ना प्रविष्टा। अव्याख्येयां व्याख्यातुमयोग्यां अनिर्वचनीयामित्यर्थः। परां उत्कृष्टाम्। प्रीतिं परितुष्टिम्। वितरति ददाति तथा च। या कण्ठे गले। लग्ना संयुक्ता सर्वदोच्चारिता इत्यर्थः। आन्तरध्वान्तजालं आन्तरं अन्तर्मध्ये मानसं ध्वान्तस्य अन्धकारस्य अज्ञानस्येति भावः जालं समूहम्। नितरां निःशेषेण। हरति नाशयति। द्राक्षाद्यै आद्यशब्देन सिताशर्करामध्वादीनां ग्रहणम्। अपि। बहुमतां बहुदृतां तदपेक्षयापि अधिकतराम्। माधुरीं मधुरताम्। उद्गिरन्तीं उद्वमन्तीम्। ताम्। 'कृष्ण' इति आख्यां अभिधानम्। कथय। हे जिह्वे, यतस्त्वं रसान् जानासि अत एव रसज्ञेत्युच्यसे—किन्तु तदैव ते नाम सार्थकं स्यात् यदा तस्य श्रीकृष्णस्य नामोच्चारणं करोषि यत्खलु हृदि स्थितं अनिर्वचनीयमानन्दं ददाति, सर्वदोच्चारितं अज्ञानजन्यं तमो नाशयति तथा च यस्य माधुर्यं सर्वोत्कर्षेण वर्तते—इति भावार्थः। मन्दाक्रान्तावृत्तम् ॥ १० ॥

सन्त्येवास्मिञ्जगति बहवः पक्षिणो रम्यरूपा—
स्तेषां मध्ये मम तु महती वासना चातकेषु।
यैरभ्यर्थ्यै[1]रथ निजसखं[2] नीरदं[3] स्मारयद्भि-
श्चित्तारूढं[4] भवति किमपि ब्रह्म कृष्णाभिधानम् ॥ ११ ॥

[1]. नि० यैरभ्यर्थ्यै० [2] प० D. निजसुखं [3] प० H. नीरज [4]. र स्मृत्यारूढं

सन्तीति ॥ अस्मिन् जगति रम्यरूपाः मनोहराकाराः। बहवः पक्षिणः सन्ति एव। किन्तु। तेषां सर्वेषाम्। मध्ये चातकेषु मम महती। वासना आदरबुद्धिः, प्रीतिरित्यर्थः। यैः चातकैः। अभ्यर्थ्यै प्रत्यर्थ्यैः। अथ प्रत्यक्षानन्तरम्। निजसखं स्वबन्धुम्। नीरदं मेघम्। स्मारयद्भिः। कृष्णाभिधानं 'कृष्ण' इति ख्यातम्। किमपि अनिर्वचनीयम्। ब्रह्म चित्ता-

रूढं स्मृतिपथगतम् । भवति । चातकान् दृष्ट्वा मेघस्मरणं जायते, मेघसदृशवर्णत्वेन च भगवतः श्रीकृष्णस्य स्मृतिरुत्पद्यते, अतः सर्वपक्षिषु चातक एव मम श्रेष्ठ इति भावार्थः । स्मरणालङ्कारोऽयम् । तल्लक्षणं च काव्यप्रकाशे— 'यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः । स्मरणम् ।' इति । पद्यमिदं रसगङ्गाधरे (पृ० २२१) स्मरणालङ्कार उदाहृतम् । मन्दाक्रान्तावृत्तम् ॥ ११ ॥

विष्वङ्नीच्या[1] भुवनमखिलं भासते यस्य भासा
सर्वासामप्यहमिति[2] विदां[3] प्रत्ययालम्बनं[4] यः ।
तं पृच्छन्ति स्वहृदयमनावेदिनो[5] विष्णुमन्या-
नन्यायोऽयं शिव शिव नृणां केन वा वर्णनीयः ॥ १२ ॥

[1] नि०—विष्वङ्नीच्या । [2] र० सर्वेषामप्यहमयमिति. [3] नि० च मत. [4] वै०—गूढमालम्बनं. [5] नि०—स्वहृदयतला°.

विष्वङ्नीच्येति ॥ यस्य विष्णोः । विष्वङ्नीच्या विष्वक् अञ्चतीति विष्वङ्नीची सर्वव्यापिनी तया । भासा कान्त्या प्रकाशेनेत्यर्थः । अखिलं समस्तं भुवनं जगत् । भासते द्योतते । 'अहं' इति सर्वासां अपि । विदां ज्ञानानाम् । यः विष्णुः । प्रत्ययालम्बनं हेतुभूतः आश्रयः । सर्वे जीवाः 'अहं अस्मि' इत्याकारकेण अहंकारेण स्वकीयं अस्तित्वं विदन्ति—वस्तुतश्च जीवब्रह्मणोरैक्यम्—अतः 'अहं' इति अहंकारज्ञानस्य हेतुभूतः, मूलभूतः, विष्णुरूपं ब्रह्मैवेति भावः । स्वहृदयम् । अनावेदिनः अजानन्तः स्वहृदय एव विष्णुस्तिष्ठतीति अजानानाः । तं विष्णुम् । अन्यान् पृच्छन्ति—कासौ विष्णुरिति अन्यान् जनान् पृच्छन्ति । अयम् । नृणां मनुष्याणाम् । अन्यायः अनुचितं कर्म । केन वा वर्णनीयः । शिव शिव इति खेदे । यस्य विष्णोः प्रकाशेन सर्वं जगदिदं भासते, यो विष्णुः सर्वेषां ज्ञानानां मूलकारणं, स्वहृदि स्थितमपि तं विष्णुं यदि नराः अन्यान् पृच्छन्ति, तर्हि महान् खेदविषयोऽयम् इति भावार्थः । पद्यमिदं रसगङ्गाधरे (पृ ४५३) विचित्रालङ्कार उदाहृतम् । उक्तं च तत्र—'अत्र जीवरूपेण सकललोकप्रत्यक्षसिद्धस्य परमेश्वरस्य प्रतिपत्त्यर्थं परान्प्रति प्रश्नोऽनुकूलाभासः । मुख्यमनुकूलं तु स्वहृदयमेव ।' इति । विचित्रालङ्कारलक्षणं च तत्रैव—'इष्टसिद्ध्यर्थमिष्टैषिणा क्रियमाणमिष्टविपरीताचरणं विचित्रम्' इति । मन्दाक्रान्तावृत्तम् ॥ १२ ॥

सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिः सेव्यतां
चिन्तायामसि सस्पृहं यदि तदा चक्रायुधश्चिन्त्यताम् ।
आलापं यदि कांक्षसि[1] स्मररिपोर्गाथा[2] तदालप्यतां[3]
स्वापं[4] वाञ्छसि चेन्निरर्गलसुखे[5] चेतः सखे[6] सुप्यताम् ॥१३॥

[1] प०—वाञ्छसि [2] र०—मधुरिपो° [3] नि०—°लाप्यता । प०—[3] कथ्यतां
[4] प०—[3] स्वापं [5] बा. निरालसुखे, प०—[3] निरर्गलसखे [6] नि० सुखे

सेवायामिति ॥ रे सखे मित्र । चेतः मदीयचित्त । यदि सेवायां कस्यापीति शेषः । साभिलाषं अभिलाषेण इच्छया सहितम् । असि, तर्हि लक्ष्मीपतिः विष्णुः । सेव्यताम् । यदि चिन्तायां ध्याने । सस्पृहं साभिलाषम् । असि, तदा चक्रायुधः चक्रं आयुधं यस्य स विष्णुरित्यर्थः । चिन्त्यतां ध्यायताम् । यदि आलापं संभाषणम् । कांक्षसि इच्छसि । तदा स्मररिपोः स्मरस्य कामदेवस्य रिपुः शत्रुः शिवः तस्य । गाथा कथा । आलप्यतां कीर्त्यताम् । स्वापं निद्राम् । वाञ्छसि इच्छसि । चेत्, तर्हि निरर्गलसुखे निर्गता अर्गला प्रतिबन्धः, क्षणिकत्वादिरूपः, यस्मात् तत् निरर्गलं नित्यमित्यर्थः, एवंभूते सुखे, नित्यानन्दे ब्रह्मणीत्यर्थः । सुप्यतां चित्तवृत्तेरन्यत्र तत्रैव लीनेन स्थीयताम् । पद्यमिदं रसगंगाधरे (पृ. ४८३) परिसंख्यालङ्कारे उदाहृतम् । तल्लक्षणं च तत्रैव—" सामान्यतः प्राप्तस्यार्थस्य कस्याचिद्विशेषाद्व्यावृत्तिः परिसंख्या " इति । अत्र हि प्रथमयोः चरणयोः विष्णुभक्तिः प्रक्रान्ता, किन्तु तृतीये चरणे सहसा स्मररिपोः शङ्करस्योल्लेखः कृतः । स च प्रकृतभङ्गमापादयति । अगत्या चाच्युतराधमोहकेन विष्णुशिवयोस्तादात्म्यापादनेन यथाकथञ्चिदस्य दोषस्य समर्थनं कृतम् । किन्तु रसगंगाधरे ' मधुरिपो ' इति पाठ उपलभ्यते—स एव च समीचीनतर इति नास्ति सन्देहलेशोऽपि । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

भवद्ग्रीष्मप्रौढातपनिवहसंतप्ततनवो
बलादुन्मूल्य द्राक् निगडमविवेकव्यतिकरम् ।
विशुद्धेऽस्मिञ्जातामृतसरसि नेराज्यशिशिरे
विगाहन्ते दूरीकृतकलुषजाला[1] सुकृतिन[2] ॥ १४ ॥

[1] बा०—० वर्षा । नि०—०मार्या. । [2] नि०—करटिनः

भवेति ॥ भवग्रीष्मप्रौढातपनिवहसंतप्तवपुषः भवः संसार एव ग्रीष्मस्य ऋतोः प्रौढः प्रचंडः आतपनिवहः आतपसमूहः, तेन संतप्तं वपुः शरीरं येषां ते। अविवेकव्यतिकरं अविवेकः अज्ञानं तस्य व्यतिकरः आधिक्यं यस्मिन्। तं निगडं शृंखलारूपं बन्धनम्। द्राक् झटिति। बलात् उन्मूल्य उत्पाट्य। अस्मिन् नैराश्यशिशिरे नैराश्यं आशाराहित्यं तेन शिशिरे शीतले। विशुद्धे निर्मले। आत्मामृतसरसि आत्मैव अमृतसरः तस्मिन्। दूरीकृतकलुषजालाः दूरीकृतं कलुषाणां पापानां जालं यैस्ते। सुकृतिनः पुण्यभाजः। विगाहन्ते मज्जन्ति। ये संसारदुःखैस्तापितास्ते अज्ञानलक्षणं बन्धनं उत्पाट्य अस्मिन् ब्रह्मानन्दे मग्ना सुखमनुभवन्ति—इति भावार्थः। पद्मभिद् रसगंगाधरे (पृ. २३२) एकदेशविवर्तिसावयवरूपकालङ्कार उदाहृतम्। तल्लक्षणं च तत्रैव "एकदेशे उपात्तविषयिके अवयवे विशेषेण स्फुटतया वर्तनादेकदेशविवर्ति" इति। अत्र सहचरैर्निगडादिरूपकैः सुकृतिषु गजरूपकमाक्षिप्यते। शिखरिणीवृत्तम् ॥ १४ ॥

बन्धोन्मुक्त्यै खलु मखमुखान् कुर्वते कर्मपाशा-
न्तः शान्त्यै मुनिशतमतानल्पचिन्तां भजन्ति।
तीर्थे मज्जन्त्यशुभजलधेः[1] पारमारोढुकामा
सर्वं प्रामादिकमिह[2] भवभ्रान्तिभाजां नराणाम् ॥ १५ ॥

[1] बा०-मज्जन्त्यशुजलनिधे । [2] बा०-परमाप्तु सकामाः । [3] बा०-कामादिकमिह

बन्धेति ॥ बन्धोन्मुक्त्यै बन्धस्य संसारबन्धनस्य उन्मुक्त्यै मोक्षाय। मखमुखान् मखा यज्ञाः मुखे आदौ येषां तान् यज्ञादीन् इत्यर्थः। कर्मपाशान् कर्मणां बन्धनानि। कुर्वते रचयन्ति खलु—नहि बन्धनसाधनैः बन्धनान्मुक्तिः। अन्तःशान्त्यै चित्तशान्त्यर्थं। मुनिशतमतानल्पचिन्तां मुनीनां व्यासादीनां यानि शतानि तेषां मतं अभिप्रायः, सिद्धान्त इत्यर्थः, तस्य अनल्पां महतीं चिन्ताम्। भजन्ति सेवन्ते। नहि चिन्ताकरणेन चिन्ताभावरूपा मनःशान्तिर्लभ्यते। अशुभजलधेः अशुभं पापं तस्य जलधेः समुद्रस्य। पारं। आरोढुकामाः आरोढुं तुं कामो येषां ते। तीर्थे गंगादौ। मज्जन्ति। नहि मज्जनेन तरणं सम्भाव्यते। एवं भवभ्रान्तिभाजां भवे संसारे

या भ्रान्ति भ्रमणं तां भजन्ते तेषां । नराणां इह लोके । सर्वं कार्यजातम् भ्रामादिकं विवेकशून्यम् । पद्यमिदं रसगंगाधरे (पृ ४५२) विचित्रालङ्कार उदाहृतम् । अत्र मोक्ष इष्टः, किन्तु इष्टस्य तस्य कर्मकरणरूप विपरीताचरणं वर्णितम् । मन्दाक्रान्ता वृत्तम् ॥ १५ ॥

प्रथमं चुम्बितचरणा जंघाजानूरुनाभिहृदयानि[1] ।
आलिंग्य[2] भावना मे खेलतु[3] विष्णोर्मुखाब्जशोभायाम् ॥ १६ ॥

[1] नि०—°चक्राणि [2] र०—आश्लिष्य, प०D—आलम्ब्य [3] ना० तिष्ठतु ।

प्रथममिति ॥ मे मम । भावना चित्तवृत्ति । प्रथमं पूर्वं । चुंबितचरणा चुंबितौ, ध्यातौ इत्यर्थः, विष्णोः चरणौ यया सा । तदनन्तरं च । जंघाजानूरुनाभिहृदयानि जंघे च जानुनी च ऊरू च नाभिश्च हृदयं च तानि । आलिंग्य स्पृष्ट्वा । विष्णोः । मुखाब्जशोभायां मुखकमलशोभायां । खेलतु रमतम् । पद्यमिदं रसगंगाधरे (पृ. ४८०) पठ्यते । समासोक्तिरलङ्कारः । तल्लक्षणं च काव्यप्रकाशे—'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥' अत्र भावनायाः स्त्रीत्वात् प्रकृते तत्समुचितमेव चुम्बनादीति सूच्यते—इत्यन्युत्तरार्धः । गीतिवृत्तम् ॥ १६ ॥

तरणोपायमपश्यन्नयि[1] मामक जीव ताम्यसि कुतस्त्वम् ।
चेतःसरणावस्यां किं नागन्ता कदापि नन्दसुतः[2] ॥ १७ ॥

[1] नि०—अपि for अयि [2] ना०—चेत सरणावस्था किं नाय कदापि पुरुषस्य ।

तरणोपायमिति ॥ अयि मामक मदीय जीव । तरणोपायं संसारसागरात्तरणस्य उपायम् । अपश्यन् त्वं कुतः कस्मात् कारणात् । ताम्यसि संतप्तो भवसि । किं अस्यां । चेतःसरणौ चित्तवर्तनौ । नन्दसुतः कदा अपि न आगन्ता आगमिष्यति ? गीतिवृत्तम् ॥ १७ ॥

स्त्रियो मे मा सन्तु[1] क्षणमपि च माद्यद्गजघटा-
मदभ्राम्यद्भृंगावलिमधुरझंकारसुभगाः[2] ।
निमग्नाना यासु द्रविणरसपर्याकुलहृदा[3]
सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥ १८ ॥

[1] प०—D. मा भासन्तु । [2] र०—°संगीतसुभगाः । [3] नै०—द्रविणमदिरामूर्णितहृशां

श्रिय इति ॥ माद्यद्गजघटामदभ्राम्यद्भृंगावलिमधुरझंकारसुभगाः माद्यती मत्ता या गजानां घटा समूहः, तस्याः मदेन मदजलेन हेतोः भ्राम्यती या भृंगावलिः भ्रमरपंक्तिः तस्याः मधुरः मनोहरः यः झंकारः गुंजनं तैः सुभगाः मनोज्ञाः । श्रियः संपदः । ते क्षणं अपि च मा सन्तु । कथमिति चेत् ?—यासु श्रीषु । निमग्नानां, अत एव द्रविणरसपर्याकुलहृदां द्रविणस्य धनस्य रसः सुखास्वादः तेन पर्याकुलं हृदयं येषां तेषां । हरिचरणयोः विष्णुपादयोः । सपर्यासांकर्यं सपर्यायाः पूजायाः सांकर्यं सुलभत्वं । अस्तु । अयते गच्छति । नाह गजादिबहुलां लक्ष्मीमभिलषामि, यतो धनमदेन मनुष्यो भगवद्भक्तिं कदापि नैव भजति इति भावार्थः । लक्ष्मीप्रयुक्तदोषविशेषात् नरः गुणत्वेन प्रसिद्धामपि हरिभक्तिं द्वेष्टि । अत एव तिरस्कारास्योऽलङ्कारः । तल्लक्षणं च रसगंगाधरे—' दोषविशेषानुबन्धाद्गुणत्वेन प्रसिद्धस्यापि द्वेषस्तिरस्कारः ' इति । पद्यं चेदं तत्रैवोदाहृतम् (पृ० ५१०) । शिखरिणीवृत्तम् ॥ १८ ॥

किं निःशंकं[1] शेषे शेषे वयसः समागतो[2] मृत्युः ।
अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी जननी ॥ १९ ॥

[1]. बा०—निःशंकः । [2]. र०—वयसि समागतो ।

किमिति ॥ स्वजीवं प्रति कवेरुक्तिः । वयसः आयुषः । शेषे अवशेषे, वृद्धावस्थायामित्यर्थः । निःशंकं निर्भयं यथा स्यात्तथा । किं शेषे स्वपिषि । मृत्युः समागतः, प्रत्यासन्नो विद्यते । अथवा—सुखं निःशंकम् । शयीथाः स्वपिहि । जाह्नवी गंगा जननी निकटे जागर्ति । पद्यमिदं रसगंगाधरे (पृ० ४२१) ' शेषे वयसस्समागतो मृत्युः ' इति पाठभेदेन आक्षेपालंकार उदाहृतम् । वैद्यस्तु—' अप्पयदीक्षितस्य पंडितराज प्रत्युक्तिरियमिति लोकप्रवादः ' इत्याह । गीतिवृत्तम् ॥ १९ ॥

संतापयामि[1] किमहं धावं धावं[2] धरातले हृदयम्[3] ।
अस्ति मम शिरसि सततं नन्दकुमारः प्रभुः परमः ॥ २० ॥

[1]. नि०—संतापयामि । [2]. बा०—धावन् धावन् [3]. नि०—यदय ।

संतापयामीति ॥ धरातले पृथिव्याम् । धावं धावं धावित्वा धावित्वा । किं किमर्थम् । अहं हृदयं संतापयामि । यतः मम शिरसि परमः प्रभुः

नन्दकुमारः मम हितसाधनाय सततं निरन्तरम्। आस्ते विद्यते। अत्र हि अनुप्रासा वृत्तिर्व्यज्यते। यथा वेदं रसगंगाधरे (पृ० ७९) भृत्यास्यस्य भावस्य ध्वनावुदाहृतम्। आर्यावृत्तम् ॥ २० ॥

रे रे मनो मम मनोभवशासनस्य
पादाम्बुजद्वयमनारतमानमंतम्[1]।
किं मां निपातयसि संसृतिगर्तमध्ये
नैतावता तव गमिष्यति पुत्रशोकः ॥ २१ ॥

[1] नि०—आमनंतम्।

रे रे इति ॥ रे रे मम मनः चेत। मनोभवशासनस्य मनोभवः मनसः जातः कामदेव इत्यर्थः, तस्य शासनः नाशयिता शङ्करः तस्य। पादाम्बुजद्वयं चरणकमलयुगलम्। अनारतं निरन्तरम्। आनमन्तं प्रणमन्तं माम्। संसृतिगर्तमध्ये संसृतिः संसारः स एव गर्तः विवरः तस्य मध्ये। किं निपातयसि। एतावता तव पुत्रशोकः न गमिष्यति। मनसः पुत्रः कामदेवः, स च भगवता शङ्करेण भस्मसात्कृतः, तद्वैरं च निर्यातयितुं हे मनः यदि शङ्करभक्तं मां पीडयसि, पुनः पुनः संसारबन्धने क्षिपसि, नैव तव पुत्रदाहजन्यः शोकः शमिष्यति—इति भावार्थः। अनुता तव शङ्करेण सह, किन्तु तस्य कमप्यपकारं कर्तुमशक्तः त्वं शङ्करभक्तं मां पीडयसीति तात्त्वम्। एतदिदं रसगंगाधरे (पृ० ४९४) प्रत्यनीकालङ्कार उदाहृतम्। तल्लक्षणं च तत्रैव—'प्रतिपक्षसबन्धिनस्तिरस्कृतिः प्रत्यनीकम्।' इति। वसन्ततिलकावृत्तम् ॥ २१ ॥

मरकतमणिमेदिनीधरो वा तरुणतरस्तरुरेष वा तमालः।
रघुपतिमवलोक्य तत्र दूराद्दयितनिकरैरिति संशयः प्रपेदे ॥ २२ ॥

मरकतेति ॥ तत्र दण्डकारण्य इति शेषः। ऋषिनिकरैः ऋषिसमूहैः। रघुपतिं रामचन्द्रं। दूरात् अवलोक्य। इति वक्ष्यमाणः। संशयः प्रपेदे प्राप— कीदृश इति वर्णयति—। एष मरकतमणिमेदिनीधरः मरकतमणीनां मारकतानां मेदिनीधरः वृक्षः, वा अथवा एष तरुणतरः युवा। तमालः तरुः तमालाख्यो नीलवृक्षः। ससंदेहालङ्कारोऽत्र। तल्लक्षणं च काव्यप्रकाशे

" ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः " इति । एतदिदं रसगङ्गाधरे (पृ० २५७) ससन्देहालंकारोदाहृतम् । पुष्पिताग्रावृत्तम् ॥

तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुरा कुतः ।
इति रघुपतेः कायच्छायाविलोकनकौतुकै
र्वनवसतिभिः[1] कैः कैरादौ न संदिदिहे जनैः ॥ २३ ॥

[1] वे०—कायच्छायाविलोकनतत्परैरुदितकुतुकैः ।

तरणितनयेति ॥ वनवसतिभिः वने वसतिः निवासः येषां तैः । कैः कैः जनैः । रघुपतेः श्रीरामचन्द्रस्य । कायच्छायाविलोकनकौतुकैः कायस्य शरीरस्य छाया कान्तिः तस्या विलोकने कौतुकं विस्मयः येषां तैः । इति वक्ष्यमाणप्रकारेण । आदौ पूर्वं । न संदिदिहे संदेहः कृतः । तं संदेहप्रकारं वक्ति— । एषा अग्रतो दृश्यमाना । तरणितनया तरणेः सूर्यस्य तनया कन्या यमुनेत्यर्थः । स्यात् भवेत्—इति संशये निश्चयो जायते—न । यतः सा यमुना । तोयमयी जलमयी । रामसूर्तिस्तु न तथा । मरकतमणिज्योत्स्ना मरकतमणेः हरिन्मणेः ज्योत्स्ना कान्तिः । वा स्यात्—पुनर्निश्चयो भवति— न । यतः सा मधुरा कुतः । रामसूर्तिस्तु मधुरा । अत्र वर्णतादृश्यात् वनवासिभिः हि संदिदिहे—पूर्वं यमुनाभ्रान्तिः, पुनर्जलाभावदर्शनात् तदभावनिश्चयः—पुनः मरकतमणिज्योत्स्नासंदेहः, पुनस्तत्रमाधुर्याभावदर्शनात् तदभावनिश्चयः । अतः निश्चयगर्भसंदेहालङ्कारोऽत्र । उदाहृतं चैतद्रसगङ्गाधरे (पृ० २५७) अस्मिन्नेवालङ्कारे । हरिणी वृत्तम् । तल्लक्षणं—" रसयुगहयैः स्नौ म्रौ स्लौ गो यदा हरिणी तदा " इति ॥ २३ ॥

चपला जलदाच्च्युता लता वा तरुमुख्यादिति संशये निमग्नः ।
गुरुनिःश्वसितैः कपिर्मनीषी निरणैषीदथ तां वियोगिनीति ॥२४॥

चपलेति ॥ इव जलदात् मेघात् । च्युता पतिता । चपला विद्युत् । वा अथवा । तरुमुख्यात् वृक्षमुख्यात् कल्पवृक्षादित्यर्थः । च्युता लता कल्पवल्ली । इति संशये निमग्नः । कपिः हनूमान् । मनीषी बुद्धिमान् । अथ । गुरुनिःश्वसितैः गुरुभिः दीर्घैः श्वासैः । ताम् सीतां । वियोगिनी रामचन्द्रात्

विरहिता । इति निरणैषीत् निश्चितवान् । अत्र सीताया कनकवर्णत्वेन कृशत्वेन च तां दृष्ट्वा हनुमतो मनसि चपलाया कल्पवल्लयाश्च संदेह उदभूत् स च तस्या दीर्घनिःश्वासदर्शनानन्तरं सा सीतैवेति निश्चयेन तिरोहितः । अतः निश्चयान्तः संसंदेहालङ्कारोऽयम् । एतदुदाहरणे च पठ्यते रसगङ्गाधरे (पृ० २५८) पुष्पिताग्रा वृत्तम् ॥ २४ ॥

भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
नाशो हन्त सतामसत्पथजुषामायुः शतानां[1] शतम् ।
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि स
किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः ॥ २५ ॥

[1] ख०, वे०, शे०, बा०—सेमाना

भूतिरिति ॥ नीचगृहेषु अधमगृहेषु । भूतिः संपत्तिः । विप्रसदने विप्राणां ब्राह्मणानां सदने गृहे । दारिद्र्यकोलाहलः दारिद्र्येण निर्धनत्वेन कोलाहलः बालानां रोदनरवः । हन्त इति खेदे । सतां सन्मार्गावलम्बिनां पुरुषाणाम् । नाशः अकालमृत्युः । असत्पथजुषां असत्पथं असन्मार्गं दुर्मार्गमिति यावत् जुषन्ते सेवन्ते तेषाम् । शतानां शतं सहस्रं वर्षाणि । आयुः जीवनम् । एतादृशीं तव दुर्नीतिं अन्यायम् । वीक्ष्य दृष्ट्वा । हे जगदीश । कोपदहनज्वालाजटालः अपि खलु कोपः एव दहनः अग्निः तस्य ज्वालाभिः शिखाभिः जटालः पूर्णः, क्रोधाग्निपूर्ण इत्यर्थः । किं कुर्वे किं करोमि, न किमपि कर्तुं शक्तः अस्मि । कथमिति चेत्—यत् यस्मात् कारणात् । अहं दीनः अशक्तः । भवान् च ईश्वरः सर्वशक्तिमान् । हे भगवन् एष तवान्यायो यत् नीचानां संपत्तिः किन्तु ब्राह्मणानां गृहे अश्रितव्यमपि नास्ति, सज्जनाः शीघ्रं म्रियन्ते, दुर्जनाः पुनश्चिरजीविनो भवन्ति, दृष्टेमन्यायं महान् मे क्रोध उत्पद्यते किन्तु असमर्थत्वात्, ईश्वरस्य तव कार्यप्रतीकारं कर्तुं न शक्नोमि—इति भावार्थः । शार्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

आ मूलाद्गलसानोर्मलयवलयितादा च कूलात्पयोधे—
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशंकं वदन्तु ।
मुद्रीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां[1]
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥२६॥

१. बा० °भाग्यभाजां हृषाणाम्

आ मूलादिति ॥ अधुना ग्रन्थोपसंहारश्लोकाः । रत्नसानोः उत्तरदिशास्थस्य मेरुपर्वतस्य । मूलात् आ मूलपर्यन्तं । मलयवलयितात् मलयाख्येन दक्षिणदिशास्थेन पर्वतेन वलयितात् वेष्टितात् । पयोधेः समुद्रस्य कूलात् आ तीरपर्यन्तं । उत्तरतः दक्षिणपर्यन्तं अखिले भारतवर्षे इत्यभिप्रायः । यावन्तः । काव्यप्रणयनपटवः काव्यानां प्रणयने रचने पटवः चतुराः । सन्ति । ते सर्वे । निःशंकं निर्भयं, निष्प्रत्यूहमिति यावत् । वदन्तु कथयन्तु । मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां मृद्वीका द्राक्षा तस्याः मध्यात् निर्यन् निर्गच्छन् मसृणः कोमलः रसः तस्य झरी प्रवाहः तस्य माधुरी मधुरता तस्याः भाग्यं सौष्ठवं, ऐश्वर्यं वा, तत् भजन्ति सेवन्ते इति तासां । वाचां वाणीनां । आचार्यतायाः गुरुतायाः । पदं स्थानं । अनुभवितुं उपभोक्तुं । मदन्यः मत्तः पंडितराजात् अन्यः । कः धन्यः भाग्यशाली । अस्ति इति । अहमेवाखिले भारतवर्षे काव्यरचनाचतुर इति जगन्नाथस्य गर्वोक्तिः । उदाहृतं च पद्यमेतत् रसगंगाधरे (पृ० ८४) गर्वाख्यस्य भावस्य वर्णने । लक्षणं चास्य भावस्य तत्रैव— ' रूपयौवनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपराक्षेपेणं गर्वः ' इति ॥ स्रग्धरावृत्तम् ॥ २६ ॥

गिरां देवी वीणागुणरणन[1]हीनादरकरा[2]
यदीयानां वाचामनृतमयमाचामति रसम् ।
वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
रधुन्वन्मूर्धानं नृपशुरथवायं पशुपतिः ॥ २७ ॥

[1] वा० "गुणरसन"... [2] वा० "कला"...

गिरामिति ॥ गिरां वाणीनां । देवी अधिष्ठात्री—भगवती सरस्वतीत्यर्थः । वीणागुणरणनहीनादरकरा वीणायाः गुणाः तन्त्रीनामकानि लौहसूत्राणि तेषां रणने वादने हीनादरः शून्याभिलाषः करः हस्तः यस्याः सा । यदीयानां यस्य पंडितराजस्य संबन्धिनीनाम् । वाचां वाणीनाम् । अमृतमयं रसम् । आचामति आस्वादयति । तस्य पंडितपतेः जगन्नाथस्य । श्रवणसुभगं श्रवणयोः कर्णयोः सुभगं मधुरम् । वचः आकर्ण्य श्रुत्वा । मूर्धानं शिरः । अधुन्वन् अकम्पयन् । ' महारम्यतममिदमिति सतोषेण शिरःकम्पनं हि लोके

तत्सूचकचेष्टात्वेन सुप्रसिद्धमेव' इत्यच्युतरायः। यः अस्ति सः। अयं नृपशु ना मनुष्यः पशुरेव। अथवा। पशुपतिः शंकरः। मदीयकविता-माधुर्यं पातुं सरस्वत्यपि बद्धादरा स्ववीणावादनकर्म त्यजति, एतादृशीं मत्कविता श्रुत्वा यः कश्चिद्धर्षविस्मयाभ्यां शिरो न कंपयति, सोऽरसज्ञत्वात् पशुतुल्यो नरः, अथवा रागद्वेषादिशून्यो मुक्तः साक्षात् शंकरो ज्ञेय इति भावार्थः॥ अतिशयोक्तिरलङ्कारः। शिखरिणीवृत्तम्॥ २७॥

मद्वाणि मा कुरु विषादमनादरेण[1]।
मात्सर्यमग्नमनसां[2] सहसा[3] खलानाम्।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसितमां[4] कियतो[5] विलासान्॥ २८॥

१. बा०—मद्वाचमङ्कुशविषादमनादरेण २. र०—°मन्दमनसा। बा०—°भुग्न-मनसा। ३. बा०—तरसा ४. बा०—धास्यतितमाम्। र०—धास्यसि सताम् ५. नि०—कति नो। र०—विपुल विलासम्।

मद्वाणीति॥ हे मद्वाणि। मात्सर्यमग्नमनसां मात्सर्ये असूयायाम्। परोत्कर्षासहिष्णुत्वे इत्यर्थः, मग्नं मनो येषां तेषाम्। खलानां दुष्टानाम्। अनादरेण दुष्टैः कृतेनेति तात्पर्यम्। सहसा विषादं दुःखम्। मा कुरु। यतः। काव्यारविन्दमकरन्दमधुव्रतानां काव्यमेव अरविन्दं कमलं तस्य यो मकरन्दः रसः तस्य पायिनो मधुव्रतानां भ्रमराणां—काव्यास्वादनतत्पराणा-मित्यर्थः। आस्येषु मुखेषु। कियतः बहूनित्यर्थः। विलासान् विभ्रमान्। धास्यसितमां अतिक्रमेण धारयिष्यसि। ईर्ष्यालुभिरनादृतासीति मा दुःखिता भूः, सहृदयास्त्वां ध्रुवमास्वादयिष्यन्तीति स्ववाणीं प्रति पण्डितराजस्योक्तिः। अत्र खलान् प्रत्यवज्ञा सूच्यते। उदाहृतं चैतत्पद्यं रसगंगाधरे (पृ ५०९) अवज्ञालङ्कारे। वसन्ततिलकावृत्तम्॥ २८॥

मधु द्राक्षा साक्षादमृतमथ वामाधररुधा
कदाचित्केषांचिन्न खलु विदधीरन्नपि मुदम्।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथमणितिः॥ २९॥[1]

1. Some editions read this verse after the 27th.

मधिति ॥ मधु, द्राक्षा, साक्षात् अमृतं, अथ वामाधरसुधा गोपिवधरामृत–यद्यपि सर्वाण्येतानि सर्वेषां सदा हर्षमुत्पादयन्ति, किन्तु कदाचित् केषांचित् खलु–अर्थात् कस्मिन्नपि विशिष्टे काले, मनसो विरक्तभावे वा। मुदं हर्षम् । न विदधीरन् न जनयेयुः । अपि । ते मन्दमतयः मन्दबुद्धयः । अहहेति खेदे । जीवन्तः अपि ध्रुवं मृतका एव । येषां जगन्नाथमणितिः जगन्नाथवाणी । आनन्दं न जनयति । अत्र स्वकविताया मध्वादिभ्य सर्वेभ्य आधिक्य दर्शितम् । व्यतिरेकालङ्कारोऽयम् । शिखरिणीवृत्तम् ॥ २९ ॥

निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय[1] त्वं संमुखे मादृशां
नो चेद्दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः ॥ ३० ॥

[1]. प०–D. स्वय ।

निर्माण इति ॥ हे सखे । यदि । अत्यन्तपाकद्रवन्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां अत्यतपाकेन द्रवत् क्षरत् यत् मृद्वीकाया द्राक्षाया मधु क्षौद्र तस्य या माधुरी मधुरता तस्या यो मद गर्व तस्य परीहारे अपहरणे उद्धुराणां अग्रेसराणां गिरां वाणीनाम् । निर्माणे रचने । नितरां अत्यन्त । मार्मिक तत्त्वज्ञः । असि । तर्हि त्वं मादृशां संमुखे काव्यं सुखेन कथय । नो चेत् । आत्मना स्वय । कृतं आचरितं । दुष्कृतं पापम् । स्वान्तात् मनसः । बहिः मा । कृथा कुरु । यद्यलौकिककाव्यनिर्माणे कुशलोऽसि तर्हि निर्भयं मादृशां संमुखे काव्यं पठ, अन्यथा तत् स्वमनस्येव मुद्रयित्वा तूष्णीं तिष्ठेति भावार्थः । इयं कविगर्वोक्तिः । पद्यमिदं रसगङ्गाधरे (पृ० ६३) पठ्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

धुर्यैरपि माधुर्यैः[1] द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम्[2]
वन्द्येव[3] माधुरीयं पंडितराजस्य कवितायाः ॥ ३१ ॥

[1]. बा०–माधुर्ये । [2]. बा०–°माक्षिकादीनां । [3]. प०–D. अन्येषा प. remarks that E puts this verse at the end of Vilāsa-

धुर्यैरिति ॥ द्राक्षाक्षीरेक्षुमाक्षिकसुधानां द्राक्षा मृद्वीका, क्षीरं पयः, इक्षु, माक्षिकं मधु, सुधा अमृतं तेषाम् । माधुर्यैः । धुर्यैः प्रशस्यैः सद्भिः । अपि । इयं पंडितराजस्य कविताया माधुरी वन्द्या प्रशस्यतरेत्यर्थः । अत्र पंडितराजकविताया माधुर्यात् सर्वेभ्योऽपि उत्कर्षवर्णनं, अतो व्यतिरेकालङ्कारः । गीतिवृत्तम् ॥ ३१ ॥

शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि संभाविता
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
संप्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पंडितराजराजितिलकेनाकारि लोकाधिकम्[1] ॥ ३२ ॥

1. नि० and the Ms. D omit this verse.

शास्त्राणीति ॥ शास्त्राणि दर्शनव्याकरणादीनि । आकलितानि आलोचितानि, सम्यगधीतानीत्यर्थः । सर्वे अपि । नित्यविधयः सन्ध्यावन्दनादयः । संभाविता कृताः । दिल्लीवल्लभपाणिपल्लवतले दिल्लीवल्लभः दिल्लीपतिः शाहजहानाभिधः तस्य पाणिपल्लवः करकिसलयः तस्य तले तदाश्रयेणेत्यर्थः । नवीनं । वयः आयुः, यौवनमिति यावत् । नीतं क्षपितं । संप्रति वृद्धावस्थायामित्यर्थः । उज्झितवासनं उज्झिताः त्यक्ताः । वासना इच्छा यया स्यात्तथा । मधुपुरीमध्ये मथुरायां । हरिः विष्णुः । सेव्यते । पंडितराजराजितिलकेन पंडितराजानां राजिः श्रेणी तस्याः तिलकेन मुख्येन श्रेष्ठेनेति यावत् । सर्वं कर्म । लोकाधिकं अलौकिकं । अकारि कृतम् । 'ई' नामके आदर्शपुस्तके तु तृतीयचरणमेवं पठ्यते—'सम्यन्धकशासनस्य नगरे तत्त्वं पर चिन्त्यते' । तस्यायमर्थः—अन्धकशासनस्य अन्धकरिपोर्महादेवस्य । नगरे काश्यामित्यर्थः । परं तत्त्वं ब्रह्मास्त्रं । चिन्त्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ३२ ॥

दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शंकया ।
मदीयपद्यरत्नानां मंजूषैषा[1] कृता मया[2] ॥ ३३ ॥

[1] भा०—मञ्जूषेयम् । [2] बा०—कृतिर्मम ।

इति पंडितराजश्रीजगन्नाथविरचिते भामिनीविलासे शान्तविलासश्चतुर्थः ॥

दुर्वृत्ता इति ॥ दुर्वृत्ताः दुष्टं वृत्तं आचारः येषां ते । जारजन्मानः जारेभ्यः उपपतिभ्यः जन्म येषां ते । मदीयपद्यानि । हरिष्यन्ति स्वकीयत्वेन

स्थापयिष्यन्ति । इति शोकया भयेन । मदीयपद्यरत्नानां मदीयपद्यान्येव रत्नानि तेषाम् । एषा । मंजूषा पेटिका । मया कृता । यथा मंजूषास्थितानि रत्नानि चोरा अपहर्तुं न शक्नुवन्ति तथा स्वविरचितानि पद्यानि अथात्र भामिनीविलासाख्ये ग्रन्थे एकीकृत्य सुरक्षितानि कृतानि । अनुष्टुप्वृत्तम् ॥३३॥

॥ इति चपकव्याख्याने शान्तविलासः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

BHĀMINĪVILĀSA

(A Collection of Stray Verses in Sanskrit)

ENGLISH TRANSLATION

IV. ŚĀNTA VILĀSA

1. Let this mind of mine, which is distressed by a number of spreading flames of a wild fire taking its rise in the circle of a great forest in the form of pleasures of senses, act like a Cakora towards the moon in the form of the face of मुकुंद which is the abode of all sweetness and in which beauty is ever on the increase.

2. O you, who are a support to the lotuses in form of the eyes of लक्ष्मी the daughter of the ocean, quickly cool me, who am apt to break under the force of the excess of mental pains more troublesome than raging fire, by glances pleasing to the three worlds and removing the pride of the greatness of the blowing morning lotuses.

3. Let the wonderful line of clouds, resting on the trees on the banks of (यमुना) the daughter of Kalinda mountain, encircled by hundreds of lightnings of permanent lustre and removing the fresh troubles of men through compassion even when only remembered, be the subject of my contemplation (lit. kiss my mind).

4. Let the वनाल tree which illumines the region of the forest on the skirts of (यमुना) the daughter of Kalinda mountain, taking away the burden of the fatigue of frequent going and coming in the journey (birth and death in this संसार) of living beings encircled by rows of creepers (the गोपीs) and endowed with sweet splendour, soon remove my troubles entirely.

5. O lord! I, a shameless creature, being filled with pride, do not, even in dream remember the advice (contained in the उपनिषद् etc.) which you imparted to

me by pure words sweet like nectar. Even though I have thus committed hundreds of faults, you still count me as one of your own O lord of Yadus! there is no store of mercy greater than yourself, nor is there a person more arrogant than myself.

